17-(1). Now as regards the objection, why if man is man's offspring, those sprung of the idiotic etc, are not like the parents, we reply Only that limb or organ of the body becomes defective, whose original representative part in the spermo-plasm has been rendered defective, if there is no potential defect there is no manifest deformity either. Therefore the position admits of both possibilities

सर्वस्य चात्मजानीन्द्रियाणि, तेषां भावाभावहेतुर्दैवं; तस्मान्नैकान्ततो जडादिभ्यो जाताः पितृसदृशरूपा भवन्ति ॥ १७ ॥

सर्वस्य બધાની सबकी, इन्द्रियाणि ઇન્દ્રિયો इन्द्रियाँ, आत्मजानि આત્મજ છે आत्मज है, तेषाम् તેઓના इनके, भावाभाव- ભાવ અને અભાવનુ भाव और अभावका, हेतुः કારણ कारण, दैवम् દૈવ છે दैव है, तस्मात् તેથી इस लिए, जडादिभ्य· જડાદિથી जडादिने, जाताः ઉત્પન્ન થયેલા उत्पन्न हुए, एकान्ततः અવશ્ય पितृसदृशरूपा. માતાપિતા જેવા मातापिताके समान रूपवाले, न भवन्ति થતા નથી नहीं होते ॥ १७ ॥

17. In every case the sense-faculties are derived from the spirit; the presence or absence of these faculties is determined, however, by destiny. Thus it is that the offsprings of the idiotic etc., are not of necessity like their parents

न चात्मा सत्स्विन्द्रियेषु ज्ञः, असत्सु वा भवत्यज्ञः; न ह्यसत्त्वः कदाचिदात्मा, सत्त्वविशेषाच्चोपलभ्यते ज्ञानविशेष इति ॥ १८ ॥

इन्द्रियेषु सत्सु ઇન્દ્રિયો હોય તો इन्द्रियोंके होने पर, आत्मा આત્મા आत्मा, ज्ञ જ્ઞાની થાય છે ज्ञानी होता है, असत्सु वा અથવા ન હોય તો अथवा न होने पर, अज्ञ અજ્ઞાની अज्ञानी, भवति થાય છે होता है, न च એમ પણ નથી ऐसा भी नही है, हि કારણકે क्योंकि, आत्मा આત્મા आत्मा, कदाचित् કદી પણ कभी भी, असत्त्व न મનરહિત હોતો નથી मनरहित नही होता, सत्त्वविशेषात् च અને સત્ત્વવિશેષથી और सत्त्वविशेषसे, ज्ञानविशेष જ્ઞાનવિશેષ ज्ञानविशेष, उपलभ्यते इति પ્રાપ્ત થાય છે प्राप्त होता है ॥ १८ ॥

18. It is not that the self is aware when the senses are present, and unware in their absence The truth is that the self is never without the mind, and because it is possessed of the mind it is also seen to be possessed of knowledge.

भवन्ति चात्र—

न कर्तुरिन्द्रियाभावात् कार्यज्ञानं प्रवर्तते ।
या क्रिया वर्तते भावैः सा विना तैर्न वर्तते ॥१९॥
जानन्नपि मृदोऽभावात् कुम्भकृन्न प्रवर्तते ।

१९. या क्रिया वर्तते–बै. क्रिया वर्तते (क-त द.)
„ या क्रिया वर्तते भावै–चै, क्रिया वर्तते या तु (ब.च ब्र ध.)

अत्र च આ વિષયમાં इस विषयमें, भवन्ति શ્લોકો છે કે श्लोक हैं कि, कर्तुः કર્તાને कर्ताको, इन्द्रियाभावात् ઇન્દ્રિયોના અભાવથી इन्द्रियोंके अभावसे, कार्यज्ञानम् કાર્યનું જ્ઞાન कार्यका ज्ञान, न प्रवर्तते થતું નથી नहीं होता, या क्रिया જે ક્રિયા जो क्रिया, यैः भावैः જે ભાવોવડે जिन भावोंसे, वर्तते થાય છે होती है, सा તે वह, तैः विना તેઓ સિવાય उनके विना, न वर्तते થતી નથી नहीं होती, कुम्भकृत् કુંભાર कुम्हार, जानन् अपि ઘડાને બનાવવાનું જાણતાં છતાં પણ घड़ेको बनाना जानते हुए भी, मृदः માટીના मिट्टीके, अभावात् અભાવને લીધે अभावके कारण, न प्रवर्तते પ્રવૃત્ત થતો નથી प्रवृत्त नहीं होता ॥ १९½ ॥

Here are verses again—

19-19½. In the absence of the senses, the agent cannot manifest any activity. Whatever operation proceeds from certain factors, in the absence of those factors, it cannot take place In the absence of clay, the potter, though skilful, cannot function.

श्रूयतां चेदमध्यात्ममात्मज्ञानबलं महत् ॥२०॥
इन्द्रियाणि च संक्षिप्य मनः संक्षिप्य चञ्चलम् ।
प्रविश्याध्यात्ममात्मज्ञः स्वे ज्ञाने पर्यवस्थितः ॥२१॥
सर्वत्रावहितज्ञानः सर्वभावान् परीक्षते ।

इदम् આ यह, अध्यात्मम् च અધ્યાત્મજ્ઞાન अध्यात्मज्ञान, श्रूयताम् સાંભળો सुनो, आत्मज्ञानबलम् આત્મજ્ઞાનનું બળ आत्मज्ञानका बल, महत् મોટું છે महान् है, इन्द्रियाणि ઇન્દ્રિયોને इन्द्रियोंको, संक्षिप्य વિષયોમાંથી પાછી વાળી विषयोंसे रोक कर, चञ्चलम् અને ચંચળ और चचल, मनः च મનને પણ मनको भी, संक्षिप्य આત્મા સિવાયના વિષયથી પાછું વાળી आत्मासे अतिरिक्त विषयसे रोक कर, अध्यात्मम् આત્મતત્ત્વમાં आत्मतत्त्वमें, प्रविश्य પ્રવેશ કરી प्रवेश करके, स्वे ज्ञाने આત્મજ્ઞાનમાં आत्मज्ञानमें, पर्यवस्थितः સંપૂર્ણપણે સ્થિત થયેલો संपूर्णतया स्थित हुआ, आत्मज्ञः આત્મજ્ઞાની आत्मज्ञानी, सर्वत्र સઘળામાં सर्वत्र, अवहितज्ञानः સમાહિત જ્ઞાનવાળો થઈ समाहित ज्ञानी हो कर, सर्वभावान् સઘળા ભાવોને सब भावोंको, परीक्षते જાણી લે છે जान लेता है ॥ २०-२१½ ॥

20-21½. Now listen to the sovereign power of the knowledge of the self—the spiritual knowledge. The knower of the self, having stilled the senses and the fickle mind, and having come into his own and being established in his own awareness,—his vision extending everywhere, contemplates all existences.

गृह्णीष्व चे(वे)दमपरं भरद्वाज विनिर्णयम् ॥२२॥
निवृत्तेन्द्रियवाक्चेष्टः सुप्तः स्वप्नगतो यदा ।
विषयान् सुखदुःखे च वेत्ति नाज्ञोऽप्यतः स्मृतः ॥२३॥

भरद्वाज હે ભરદ્વાજ हे भरद्वाज, इदम् अपरम् આ બીજો इस दूसरे, विनिर्णयम् च નિર્ણય પણ निर्णय को भी, गृह्णीष्व ગ્રહણ કરો ग्रहण करो, निवृत्त-इन्द्रिय-वाक्-चेष्टः ઇન્દ્રિયો- વાણી અને ચેષ્ટારહિત इन्द्रियों-वाणी और चेष्टारहित, सुप्तः નિદ્રાધીન મનુષ્ય सोया हुआ मनुष्य, यदा જ્યારે जब, स्वप्नगतः સ્વપ્ન અવસ્થામાં હોય છે स्वप्नावस्थामें होता है, विषयान् ત્યારે વિષયોને तब विषयोंको, सुखदुःखे च તથા સુખદુઃખને तथा सुखदुखको, वेत्ति જાણે છે जानता है, अतः એટલા માટે इसी लिए, अपि પણ भी, अज्ञः આત્માને અજ્ઞાની आत्माको अज्ञानी, न स्मृत કહ્યો નથી नहीं कहा है ॥ २२-२३ ॥

22-23. O Bharadwaja, accept also this fresh conclusion. Having withdrawn from the activities of the sense-organs and speech, the sleeping man who has passed into the dream-state,

२०. चेदम्—वेदम् (च)
२१. संक्षिप्य—संगृह्य (च. ज. त)
,, ,, —सयम्य (ग.)
२१½. सर्वत्रावहितज्ञानः—सर्वत्र विहितज्ञानः (द.)

२३. स्वप्नगतो—स्वप्नगतान् (च. ज. ग.)

cognises the objects and pleasure and pain, therefore the self is said never to exist without awareness

नात्मज्ञानादृते चैकं ज्ञानं किञ्चित् प्रवर्तते ।
न ह्येको वर्तते भावो वर्तते नाप्यहेतुकः ॥ २४ ॥

आत्मज्ञानात् આત્મજ્ઞાન आत्मज्ञानके, ऋते સિવાય विना, किञ्चित् च કોઈપણ कोई भी, ज्ञानम् જ્ઞાન ज्ञान, एकम् ઇન્દ્રિયાદિ કરણરૂપ સહાય વિના इन्द्रियादि करणरूप सहायके विना, न प्रवर्तते પ્રવર્તતું નથી प्रवृत्त नहीं होता, हि કેમકે क्योंकि, भाव. ઉત્પન્ન હોનાર પદાર્થ उत्पन्न होनेवाला पदार्थ, एक. કારણરહિત થઈ એકલો कारणरहित हो कर अकेला, न वर्तते ઉત્પન્ન થતો નથી उत्पन्न नहीं होता, अहेतुक. अपि અને કર્તા વગર પણ और कर्ताके विना भी न वर्तते ઉત્પન્ન થતો નથી उत्पन्न नहीं होता ॥ २४ ॥

24. There is no cognition of any kind without self awareness, no consequent can exist independently or without a cause.

तस्माज्ज्ञः प्रकृतिश्चात्मा द्रष्टा कारणमेव च ।
सर्वमेतद्भरद्वाज निर्णीतं जहि संशयम् ॥ २५ ॥

तस्मात् તેથી इसी लिए, आत्मा આત્મા आत्मा, ज्ञ જ્ઞાની ज्ञानवान, प्रकृति. च વિકારરહિત विकाररहित, द्रष्टा દ્રષ્ટા द्रष्टा, कारणम् एव च અને કારણસ્વરૂપ છે और कारण है, भरद्वाज हे ભરદ્વાજ! हे भरद्वाज!, एतत् सर्वम् એ સઘળું यह सब, निर्णीतम् નક્કી કરેલું છે निर्णीत हुआ है, संशयम् સંશયને सशयको, जहि છોડો छोड़ दो ॥ २५ ॥

25 Therefore the self is the knower, the archetype, the seer and the final cause. O Bharadwaja! all this has been definitely established, hence abandon all doubt

अध्यायोक्तविषया: —

तत्र श्लोकौ—

हेतुर्गर्भस्य निर्वृत्तौ वृद्धौ जन्मनि चैव यः ।
पुनर्वसुमतिर्या च भरद्वाजमतिश्च या ॥ २६ ॥
प्रतिज्ञाप्रतिषेधश्च विशदश्चात्मनिर्णयः ।
गर्भावक्रान्तिमुद्दिश्य खुड्डीकां तत्प्रकाशितम् ॥ २७ ॥

तत्र તે વિષયમાં उस विषयमें, श्लोकौ ઉપસંહારના બે શ્લોકો છે કે उपसंहारके दो श्लोक हैं कि, गर्भस्य ગર્ભની गर्भकी, निर्वृत्तौ ઉત્પત્તિમાં उत्पत्तिमें, वृद्धौ વૃદ્ધિમાં वृद्धिमें, जन्मनि च एव અને જન્મમાં और जन्ममें, य हेतु. જે કારણ છે जो कारण है, या च જે जो, पुनर्वसुमति. પુનર્વસુનો મત છે पुनर्वसुका मत है, या च તથા જે तथा जो, भरद्वाजमतिः ભરદ્વાજનો મત છે તે भरद्वाजका मत है वह, प्रतिज्ञाप्रतिषेध. च પ્રતિજ્ઞાનો પ્રતિષેધ प्रतिज्ञाका प्रतिषेध, विशदः आत्मनिर्णय च અને આત્માનો સ્પષ્ટ નિર્ણય और आत्माका स्पष्ट निर्णय, तत् તે સઘળું वह सब, खुड्डीकाम् गर्भावक्रान्तिम् ખુડ્ડીકાગર્ભાવક્રાન્તિને खुड्डीका गर्भावक्रान्तिको, उद्दिश्य ઉદ્દેશીને लक्ष्य करके, प्रकाशितम् પ્રકાશિત કર્યું છે प्रकाशित किया है ॥ २६-२७ ॥

Here are the two recapitulatory verses—

26-27. The cause of the manifestation, development and birth of the fetus, what the opinion of Atreya is concerning this subject, and what the opinion is of Bharadwaja; the objection to the proposition, the final conclusion concerning the self—all this has been set forth in this minor chapter relating to the formation of the fetus.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने खुड्डीकागर्भावक्रान्तिशारीरं नाम तृतीयोऽध्यायः ॥ ३ ॥

२४ नात्मज्ञानादृते चैकं ज्ञानं किञ्चित् प्रवर्तते—आत्मज्ञानादृते चैकं ज्ञानं किञ्चिन्न वर्तते (ख. ग. त.)

२७. तत्प्रकाशितम्—तत्प्रकाशितम् (च ग)

इति આ પ્રમાણે इस प्रकार, अग्निवेशकृते અગ્નિવેશે રચેલા अग्निवेशसे बनाये, चरकप्रतिसंस्कृते तन्त्रे અને ચરકથી પ્રતિસંસ્કાર પામેલા આ શાસ્ત્રમાં और चरकके द्वारा संस्कृत इस शास्त्रके, शारीरस्थाने શારીરસ્થાનમાં शारीरस्थानमें, 'खुड्डीकागर्भावक्रान्तिशारीरम्' 'ખુડ્ડીકાગર્ભાવક્રાંતિશારીર' 'खुड्डीकागर्भावक्रान्तिशारीर', नाम નામનો नामका, तृतीय ત્રીજો तीसरा, अध्याय. અધ્યાય સંપૂર્ણ થયો अध्याय समाप्त हुआ ॥ ३ ॥

3. Thus in the section on Human Embodiment in the treatise compiled by Agnivesa and revised by Caraka, the third chapter entitled "The Minor chapter on the formation of the fetus" is completed.

चतुर्थोऽध्यायः ।

ચોથો અધ્યાય अध्याय चौथा

Chapter IV

महतीगर्भावक्रान्तिशारीरोपक्रमः—

अथातो महतीं गर्भावक्रान्तिं शारीरं व्याख्यास्यामः ॥ १ ॥

इति ह स्माह भगवानात्रेयः ॥ २ ॥

अथ अतः હવે અહીંથી अब आगे, 'महतीम् गर्भावक्रान्तिम् शारीरम्' 'મહતીગર્ભાવક્રાંતિશારીર' નામના અધ્યાયનું 'महतीगर्भावक्रान्तिशारीर' नामके अध्यायका, व्याख्यास्यामः વ્યાખ્યાન કરશું व्याख्यान करेंगे ॥ १ ॥

भगवान् ભગવાન भगवान, आत्रेयः આત્રેયે आत्रेयने, इति ह આ વિષયમાં નીચે પ્રમાણે જ इस विषयमें निम्न प्रकारसे ही, आह स्म કહેલું છે कहा है ॥ २ ॥

1. We shall now expound "The major chapter on the formation of the fetus in the section on the Human Embodiment."

2. Thus declared the worshipful Atreya.

अस्मिन्नध्याये व्याख्यास्यमाना विषयाः—

यतश्च गर्भः संभवति, यस्मिंश्च गर्भसंज्ञा, यद्विकारश्च गर्भः, यया चानुपूर्व्याऽभिनिर्वर्तते कुक्षौ, यश्चास्य वृद्धिहेतुः, यतश्चास्याजन्म भवति, यतश्च जायमानः कुक्षौ विनाशं प्राप्नोति, यतश्च कार्त्स्न्येनाविनश्यन् विकृतिमापद्यते, तदनुव्याख्यास्यामः ॥ ३ ॥

गर्भ ગર્ભ गर्भ, यतः च જે કારણથી जिन कारणोंसे, संभवति ઉત્પન્ન થાય છે बनता है, यस्मिन् च જેની जिसकी, गर्भसंज्ञा ગર્ભસંજ્ઞા થાય છે गर्भसंज्ञा होती है, गर्भ. ગર્ભ गर्भ, यद्-विकारः च જેનો વિકાર છે जिनका विकार है, यया જે और जिस, आनुपूर्व्या ક્રમ પ્રમાણે परिपाटीसे, कुक्षौ ઉદરમાં कुक्षिमें, अभिनिर्वर्तते નિષ્પન્ન થાય છે निष्पन्न होता है, य च अस्य જે એની जो इसकी, वृद्धिहेतुः વૃદ્ધિનું કારણ છે वृद्धिका हेतु है, यतः च જેનાથી जिस कारणसे, अस्य એની इसकी, अजन्म અનુત્પત્તિ अनुत्पत्ति, भवति થાય છે होती है, यत च જે કારણથી जिस कारणसे, जायमान ગર્ભ જન્મ પામતો गर्भ उत्पन्न होता हुआ, कुक्षौ ઉદરમાં कुक्षिमें, विनाशम् નાશ नष्ट, प्राप्नोति પામે છે होता है, यत च અને જે કારણથી और जिस कारणसे, कार्त्स्न्येन ગર્ભ સંપૂર્ણ गर्भ सपूर्ण, अविनश्यन् નાશ ન પામતો क्लिष्ट न हो कर, विकृतिम् વિકૃતિને विकृतिको, आपद्यते પામે છે प्राप्त होता है, तत् તેનું उसका, अनुव्याख्यास्याम. વ્યાખ્યાન કરશું व्याख्यान करेंगे ॥ ३ ॥

3. Whence the conception arises, to which the name of 'embryo' is given, whose modification the embryo is, in what order the various stages of the embryo develop in the womb, what makes the embryo wax, by what agency it is prevented from forming

३. अजन्म भवति—अवृद्धिर्भवति (इ)

in the womb, and by what agency, having formed, it perishes in the womb, and why again while not completely destroyed it gets deformed— all this we shall explain in due order.

मातृतः पितृत आत्मतः सात्म्यतो रसत सत्त्वत इत्येतेभ्यो भावेभ्यः समुदितेभ्यो गर्भः संभवति। तस्य ये येऽवयवा यतो यतः संभवतः संभवन्ति तान् विभज्य मातृजादीनवयवान् पृथक् पृथगुक्तमग्रे ॥ ४ ॥

मातृत॰ માતા माता, पितृतः પિતા पिता, आत्मत આત્મા आत्मा, सात्म्यत સાત્મ્ય सात्म्य, रसत રસ रस, सत्त्वत. અને મન और मन, इति એમ इस प्रकार, एतेभ्य એ इन, समुदितेभ्य સમિલિત समिलित, भावेभ्य. ભાવોથી भावोंसे, गर्भ ગર્ભ गर्भ, सभवति ઉત્પન્ન થાય છે बनता है, संभवत॰ तस्य ઉત્પન્ન થતા તે ગર્ભના उत्पन्न होते हुए उस गर्भके, ये ये જે જે जो जो, अवयवा અવયવો अवयव, यतः यतः જે જે ભાવથી जिस जिस भावसे, सभवन्ति ઉત્પન્ન થાય છે बनते हैं, तान् તે તે उन उन, मातृजादीन् માતૃજ વગેરે मातृजादि, अवयवान् અવયવોને अवयवोंको, पृथक् पृथक् પૃથક્ પૃથક્ अलग अलग, विभज्य વિભાગ પાડીને विभाग करके, अग्रे उक्तम् આગલા અધ્યાયમાં કહ્યા છે अगले अध्यायमें कह दिये हैं ॥ ४ ॥

4. The conception arises from the sum of causative factors emanating from the mother the father, the spirit, the concordance, the nourishment and the mind. As to which of embryonic parts are derived from which of these six coefficient causes at the time of conception and thererfter, we have already described them having classified them under different heads.

शुक्रशोणितजीवसंयोगस्य गर्भसंज्ञत्वम्—

शुक्रशोणितजीवसंयोगे तु खलु कुक्षिगते गर्भसंज्ञा भवति ॥ ५ ॥

कुक्षिगते तु ગર્ભાશયમાં થયેલા कुक्षिगत, शुक्र-शोणित- શુક્ર-શોણિત शुक्र शोणित, जीव-संयोगे खलु અને જીવના સંયોગતુ और जीवके संयोगकी, गर्भसंज्ञा 'ગર્ભ એ નામ' 'गर्भ यह संज्ञा', भवति થાય છે होती है ॥ ५ ॥

5 The appellation of conception is given to that union of semen, ovum and the spirit, which takes place in the womb

गर्भस्य पञ्चभूतविकारचेतनाधिष्ठानभूतत्वसाधनम्—

गर्भस्तु खल्वन्तरिक्षवाय्वग्नितोयभूमिविकारश्चेतनाधिष्ठानभूतः।

गर्भ तु ગર્ભ તો गर्भ तो, खलु ખરેખર सचमुच, अन्तरिक्ष- આકાશ आकाश, वायु- વાયુ वायु, अग्नि- અગ્નિ अग्नि, तोय- જલ जल, भूमि- અને ભૂમિનો और भूमिका, विकार વિકાર છે विकार है, चेतनाधिष्ठानभूत અને આત્માનુ ભોગાયતન છે और आत्माका भोगायतन है।

6-(1) The embryo is a compound product of the ether, air, fire, water and earth and is the dwelling place of the spirit

एवमनया युक्त्या पञ्चमहाभूतविकारसमुदायात्मको गर्भश्चेतनाधिष्ठानभूतः; स ह्यस्य षष्ठो धातुरुक्तः ॥ ६ ॥

एवम् આ પ્રમાણે इस तरह, अनया युक्त्या આ યોજના અનુસાર इस युक्तिके अनुसार, पञ्चमहाभूत- પાંચ મહાભૂતના पचमहाभूतोंके, विकार- વિકારના विकारोंका, समुदायात्मक સમુદાયસ્વરૂપ समुदायस्वरूप,

६. गर्भश्चेतनाधिष्ठानभूत॰ – गर्भश्चेतनाधात्वधिष्ठानभूतः (ग. न.)

,, एवमनया–एवमनयैव (ग)

गर्भः ગર્ભ गर्भ, चेतना-अधिष्ठानभूत આત્માનું ભોગાયતન છે चेतनाका भोगायतन है, स हि તે આત્મા જ वह आत्मा ही, अस्य આ ગર્ભનો इस गर्भकी, षष्ठ: છઠ્ઠો छट्ठी, धातु: ધાતુ धातु, उक्तः કહેલો છે कही गई है ॥ ६ ॥

6. Looked at from this standpoint the embryo is the sum of the modifications occasioned in the proto-elements and is the resort of the spirit; thus the spirit has been said to be the sixth element of the embryo.

कुक्षौ गर्भोत्पत्तिप्रकारः—

यथा चानुपूर्व्याऽभिनिर्वर्तते कुक्षौ तां व्याख्यास्यामः—

यथा च જે जिस आनुपूर्व्या ક્રમાનુસાર क्रमसे, कुक्षौ ગર્ભ ગર્ભાશયમાં गर्भ कुक्षिमें, अभिनिर्वर्तते નિષ્પન્ન થાય છે निष्पन्न होता है, ताम् તેનું उसका, अनुव्याख्यास्याम વ્યાખ્યાન કરશું व्याख्यान करेंगे,

7-(1). Now we shall explain by what stages the embryo develops in the womb.

गते पुराणे रजसि नवे चावस्थिते शुद्धस्नातां स्त्रियमव्यापन्नयोनिशोणितगर्भाशयामृतुमतीमाचक्ष्महे। तया सह तथाभूतया यदा पुमानव्यापन्नबीजो मिश्रीभावं गच्छति, तदा तस्य हर्षोदीरितः परः शरीरधात्वात्मा शुक्रभूतोऽङ्गादङ्गात् संभवति।

पुराणे रजसि જૂનું રજ पुराने रजके, गते નીકળી જાય निकल जानेपर, नवे च અને નવું રજ और नये रजके, अवस्थिते સ્થિત થાય ત્યારે स्थित होने पर अव्यापन्न- વિકારરહિત अविकृत, योनि-शोणित- જેનાં યોનિ-શોણિત योनि-आर्तव, गर्भाशयाम् અને ગર્ભાશય છે એવી और गर्भाशयवाली, शुद्धस्नाताम् શુદ્ધ અને નાહેલી शुद्ध और नहाई हुई, स्त्रियम् સ્ત્રીને स्त्रीको, ऋतुमतीम् ઋતુમતી ऋतुमती, आचक्ष्महे કહીએ છીએ कहते हैं, तथाभूतया તેવી જાતની इस प्रकारकी, तया सह તે સ્ત્રીની સાથે उस स्त्रीके साथ, यदा જ્યારે जब, अव्यापन्नबीजः અવિકૃત બીજવાળો अविकृत बीजवाला, पुमान् પુરુષ पुरुष, मिश्रीभावम् સંયોગને मैथुन, गच्छति પામે છે करता है, तदा तस्य ત્યારે તે પુરુષનો तब उस पुरुषके, हर्ष-उदीरितः હર્ષપ્રેરિત हर्षसे प्रेरित, पर ઉત્કૃષ્ટ श्रेष्ठ, शरीरधात्वात्मा શરીરના ધાતુઓનો સાર शरीरकी धातुओंका सार, शुक्रभूत વીર્યરૂપે शुक्ररूपसे, अङ्गात् अङ्गात् અંગે અંગમાંથી अगप्रत्यंगोंसे, संभवति ઉત્પન્ન થાય છે निकलता है;

7-(2) Now we have in mind the woman of child-bearing stage whose generative organs, ova and uterus are normal and who has gone through the purificatory bath on the completion of the last menstrual period with the fresh blood having replaced the lost blood When with a woman of this description, a man of unvitiated sperm unites in the sex-union, then impelled by orgasm there flows from every cell and tissue that quintessence of bodily secretions, the semen

स तथा हर्षभूतेनात्मनोदीरितश्चाधिष्ठितश्च बीजरूपो धातुः पुरुषशरीरादभिनिष्पत्योचितेन पथा गर्भाशयमनुप्रविश्यार्तवेनाभिसंसर्गमेति ॥७॥

तथा તેવી રીતે उसी प्रकार, हर्षभूतेन હર્ષપૂર્ણ हर्षमय, आत्मना આત્માથી आत्मासे, उदीरितः પ્રેરિત પ્રેરિત, अधिष्ठित च અને અધિષ્ઠિત और अधिष्ठित, स. તે वह, बीजरूपः બીજરૂપ बीजरूप, धातु: ધાતુ धातु,

७ यथा—यथा (घ)
, ता व्याख्यास्याम.—तदनुव्याख्यास्याम· (घ ज)
,, शुद्धस्नाताम्—पुनःशुद्धस्नाताम् (घ)
,, तदा तस्य—तस्य (घ)

७ अधिष्ठितश्च बीजरूपो धातु·—अधिष्ठितबीजधातुः (क, ध)
,, उचितेन—उदितेन (ड.)

पुरुषशरीरात् પુરુષના શરીરમાંથી पुरुषके शरीरसे, अभिनिष्पत्य બહાર નીકળીને बाहर निकल कर, उचितेन पथा ઉચિત માર્ગદ્વારા उचित मार्गसे, गर्भाशयम् ગર્ભાશયમાં गर्भाशयमें, अनुप्रविश्य પ્રવેશીને प्रविष्ट हो करके, आर्तवेन આર્તવ સાથે आर्तवके साथ, अभिसंसर्गम् સંયોગને संयोगको, एति પામે છે प्राप्त होता है ॥ ७ ॥

7. That semen having thus been set into motion by the ecstatic self and informed by it, emerging from the man's body mixes with the secretion of the woman after entering the womb through the proper channel.

गर्भे भूतग्रहणक्रमः—

तत्र पूर्वं चेतनाधातुः सत्त्वकरणो गुणग्रहणाय प्रवर्तते; स हि हेतुः कारणं निमित्तमक्षरं कर्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यो गुणी ग्रहणं प्रधानमव्यक्तं जीवो ज्ञः पुद्गलश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति ।

तत्र पूर्वम् તેમાં પ્રથમ उसमें प्रथम, सत्त्वकरण. મનરૂપ કરણથી યુક્ત मनरूप करणवाला, चेतनाधातुः આત્મા आत्मा, गुणग्रहणाय ભૂતોના ગ્રહણ માટે भूतोंके ग्रहणके लिए, प्रवर्तते પ્રવૃત્ત થાય છે प्रवृत्त होता है, सः हि તે આત્મા वही आत्मा, हेतु હેતુ हेतु, कारणम् કારણ कारण, निमित्तम् નિમિત્ત निमित्त, अक्षरम् અક્ષર अक्षर, कर्ता કર્તા कर्ता, मन्ता મનનશીલ मनन करनेवाला, वेदिता જ્ઞાતા ज्ञाता, बोद्धा બોદ્ધા बोद्धा, द्रष्टा દ્રષ્ટા द्रष्टा, धाता ધાતા धाता, ब्रह्मा બ્રહ્મા ब्रह्मा विश्वकर्मा વિશ્વકર્મા विश्वकर्मा, विश्वरूप. વિશ્વરૂપ विश्वरूप, पुरुष પુરુષ पुरुष, प्रभव પ્રભવ प्रभव अव्यय અવ્યય अव्यय, नित्यः નિત્ય नित्य, गुणी ગુણી गुणवाला, ग्रहणम् ગ્રહણ (ગ્રહણ કરનાર) ग्रहण (ग्रहण करनेवाला), प्रधानम् પ્રધાન प्रधान, अव्यक्तम् અવ્યક્ત अव्यक्त, जीवः જીવ जीव, ज्ञः જ્ઞ ज्ञ (ज्ञानी), पुद्गल. પુદ્ગલ पुद्गल, चेतनावान् ચેતનાવાન चेतनावान, विभु વિભુ विभु, भूतात्मा च ભૂતાત્મા भूतात्मा, इन्द्रियात्मा च ઇન્દ્રિયાત્મા इन्द्रियात्मा, अन्तरात्मा च इति અને અન્તરાત્મા કહેવાય છે और अन्तरात्मा कहाता है,

8-(1) There in the womb, the conscious element (the spirit) which has the mind for the instrument, proceeds first of all to gravitate to itself the needed ingredients This conscious element is, accordingly, said to be variously the cause, the region, the instrument, the imperishable, the agent, the thinking one, the knower, the understanding one the seer the dispenser, the great one, the universal architect, the omniform, the supreme person, the creative source, the unchanging, the eternal, the substratum of qualities, the seizer, the chief the unmanifest, the individual soul, the knower, the ego, the conscious one, the infinite, the soul of creatures, the soul of the senses and the inner soul

स गुणोपादानकालेऽन्तरिक्षं पूर्वतरमन्येभ्यो गुणेभ्य उपादत्ते, यथा—प्रलयात्यये सिसृक्षुर्भूतान्यक्षरभूत आत्मा सत्त्वोपादानः पूर्वतरमाकाशं सृजति, ततः क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुरः; तथा देहग्रहणेऽपि प्रवर्तमानः पूर्वतरमाकाशमेवोपादत्ते, ततः क्रमेण व्यक्ततर-

८ चेतनाधातु सत्त्वकरण —चेतनाधातु सत्त्वोपादान (प)
,, सत्त्वकरण.—सत्त्वोपकरण (ध)
,, प्रवर्तते—वर्तते (भ)
,, वेदिता—बोधयिता (ध)
,, विभुर्भूतात्मा—प्रभु. भूतात्मा (ध)

८. सत्त्वोपादान —सत्त्वोपादाम (द)
,, व्यक्ततर°—व्यक्तभव (प)
,, वाय्वादिकांश्चतुर —वाय्वादींश्चतुर. (ध.)

गुणान् धातून् वाय्वादिकांश्चतुरः । सर्वमपि तु खल्वेतद्गुणोपादानमणुना कालेन भवति ॥ ८ ॥

स. ते वह, गुणोपादान- भूतनुं ग्रहण करवाने भूतोंका ग्रहण करते, काले समये समय, अन्येभ्यः बीजा अन्य, गुणेभ्य भूतोमांथी भूतोसे, पूर्वतरम् प्रथम पहले, अन्तरिक्षम् आकाशनुं आकाशको, उपादत्ते ग्रहण करे छे ग्रहण करता है, यथा जेम जैसे, प्रलय-अत्यये प्रलयने अंते प्रलयके अन्तमे, भूतानि भूतोने महाभूतोंकी, सिसृक्षुः सरजवानी इच्छावाळो सृष्टिकी इच्छावाला, अक्षरभूत. अविनाशी अविनाशी, आत्मा आत्मा आत्मा, सत्त्वोपादानः मनरूप करणथी युक्त थईने सत्त्वरूप करणवाला हो कर, पूर्वतरम् प्रथम प्रथम, आकाशम् आकाशने आकाशको, सृजति सरजे छे बनाता है, ततः त्यार पछी फिर, क्रमेण क्रमशः क्रमसे, व्यक्ततर- अधिक स्पष्ट अधिक स्पष्ट, गुणान् गुणवाळा गुणवाले, वाय्वादिकान् वायु आदि वायु आदि, चतुरः चार चार, धातून् भूतोने रचे छे धातुओंको रचता है, तथा तेवीज रीते वैसे ही, देहग्रहणे अपि शरीरनुं ग्रहण करवामां देहके ग्रहणमें भी, प्रवर्तमानः प्रवृत्त थतो आत्मा प्रवृत्त होता आत्मा, पूर्वतरम् प्रथम प्रथम, आकाशम् एव आकाशनुज आकाशकोही, उपादत्ते ग्रहण करे छे ग्रहण करता है, ततः त्यार पछी उसके बाद, व्यक्ततरगुणान् स्पष्ट गुणवाळा स्पष्ट गुणवाले, वाय्वादिकान् वायु आदि वायु आदि, चतुरः चार चार, धातून् भूतोने भूतोंको, क्रमेण क्रमशः क्रमशः, उपादत्ते ग्रहण करे छे ग्रहण करता है, सर्वम् खलु अपि सर्व सभी, एतत् आ यह, गुणोपादानम् तु भूतोनुं ग्रहण भूतोंका ग्रहण, अणुनाकालेन अति अल्प काळमां बहुत थोडे समयमें, भवति थाय छे हो जाता है ॥ ८ ॥

8. This one, at the time of gravitating the elements to itself, draws the ether before the other elements Just as at the close of the period of dissolution, the creative self desirous of creating the world anew having the mind for his base, first creates the ether, then in due order, the remaining four elements namely the air, and the other proto-elements of more and more pronounced characteristics, even so, in procuring together to itself an individual body, it (the self) first takes the ether alone, then in due order the other elements, having more and more pronounced characteristics, beginning with air. All this gravitating of elements takes place in an infinitesimal fraction of time.

प्रथमे मासि गर्भस्य स्वरूपम्—

स सर्वगुणवान् गर्भत्वमापन्नः प्रथमे मासि संमूर्च्छितः सर्वधातुकलुषीकृतः खेटभूतो भवत्यव्यक्तविग्रहः सदसद्भूताङ्गावयवः ॥ ९ ॥

सः ते वह, सर्वगुणवान् सर्व भूतोथी युक्त सब भूतोसे युक्त, गर्भत्वम् गर्भभावने गर्भरूपको, आपन्नः पामी प्राप्त हो कर, प्रथमे प्रथम प्रथम, मासि मासमां मासमें, सम्मूर्च्छितः सारी रीते मिश्रित सुमिश्रित, सर्वधातु- तथा सर्व धातुओथी तथा सब धातुओंसे, कलुषीकृत. कलुषित बनतो कलुषित बनता हुआ, खेटभूतः श्लेष्म जेवो श्लेष्मसदृश, अव्यक्तविग्रहः अस्पष्ट शरीरवाळो अव्यक्त शरीरवाला, सदसद्भूत- अर्थात् विद्यमान तथा अविद्यमान अर्थात् सत और असत्, अङ्गावयव. अंग अने प्रत्यंगवाळो अग और प्रत्यगवाला, भवति थाय छे होता है ॥ ९ ॥

9. The spirit having now become the embryo, in the first month after conception being well compounded and tinged with all the elements, appears as a jelly-like mass of no particular shape, and with limbs emergent and latent.

द्वितीये मासि गर्भस्य स्वरूपम्—

द्वितीये मासि घनः संपद्यते पिण्डः पेश्यर्बुदं

वा। तत्र घनः पुरुषः, पेशी स्त्री, अर्बुदं नपुंसकम् ॥ १० ॥

द्वितीये मासि બીજે માસે ગર્ભ दूसरे मासमें गर्भ, घन पिण्डः ગાંઠના આકારમાં ઘન ग्रन्थिके रूपमें घन, पेशी પેશી पेशी, अर्बुदम् वा કે અર્બુદ या अर्बुद, सम्पद्यते થાય છે होता है, तत्र તેમાં उनमें, घन ઘન હોય તો घन होने पर, पुरुष પુરુષ पुरुष, पेशी પેશી હોય તો पेशी होने पर, स्त्री સ્ત્રી स्त्री, अर्बुदम् અને અર્બુદ હોય તો और अर्बुद होने पर, नपुंसकम् નપુંસક થાય છે नपुंसक होता है ॥ १० ॥

10. In the second month this mass hardens into the form either of a knot or a tendon or an egg Of these the knot-shaped is male, the tendon-shaped female, the egg-shaped eunuch.

तृतीये मासि गर्भस्य स्वरूपम्—

तृतीये मासि सर्वेन्द्रियाणि सर्वाङ्गावयवाश्च यौगपद्येनाभिनिर्वर्तन्ते ॥ ११ ॥

तृतीये मासि ત્રીજે મહિને तीसरे मासमें, यौगपद्येन એકીસાથે एक साथ, सर्वेन्द्रियाणि સર્વ ઇન્દ્રિયો सब इन्द्रियाँ, सर्वाङ्गावयवा च અને સર્વ અંગ તથા તેના અવયવો और सब अंग तथा उनके अवयव, अभिनिर्वर्तन्ते ઉત્પન્ન થાય છે बनते है ॥ ११ ॥

11 In the third month all the sense-organs and all the limbs emerge together.

गर्भस्य महाभूतप्रभवो भावा —

तत्रास्य केचिदङ्गावयवा मातृजादीनवयवान् विभज्य पूर्वमुक्ता यथावत्। महाभूतविकारप्रविभागेन त्विदानीमस्य तांश्चैवाङ्गावयवान् कांश्चित् पर्यायान्तरेणापरांश्चानुव्याख्यास्यामः।

तत्र ત્યાં वहा, मातृजादीन् માતૃજાદિ मातृजादि, अवयवान् અવયવોનો अवयवोंको, यथावत् સારી રીતે सम्यक् प्रकार, विभज्य વિભાગ કરીને विभक्त करके, अस्य આ ગર્ભના इस गर्भके, केचित् કેટલાક कई, अङ्गावयवाः અંગ અને તેના અવયવો अंग और उनके अवयव, पूर्वम् પૂર્વ અધ્યાયમાં पूर्व अध्यायमें, उक्ताः કહ્યાં છે कहे है, इदानीम् तु પણ હવે परन्तु अब, अस्य એના इस गर्भके, तान् च एव તેમાંના उन्हींमेंसे, कांश्चित् કેટલાંક कई, अङ्गावयवान् અંગ અને અવયવોનુ अङ्ग और अवयवोंको, पर्यायान्तरेण નામાન્તરથી नामान्तरसे, अपरान् च અને બીજા અવયવોનુ પણ और दूसरे अवयवोंका भी, महाभूतविकार- પંચ મહાભૂતના વિકારના पंचमहाभूतके विकारके, प्रविभागेन વિભાગ અનુસાર विभाग अनुसार, अनुव्याख्यास्याम. વ્યાખ્યાન કરશુ व्याख्यान करेंगे,

12 Some of the body-parts of the fetus have already been enumerated under various heads, such as those derived from the mother etc. Now we shall enumerate under different names with reference to the modifications of the five elements, the self-same body-parts as also some additional ones

मातृजादयोऽप्यस्य महाभूतविकारा एव। तत्रास्याकाशात्मकं शब्दः श्रोत्रं लाघवं सौक्ष्म्यं विवेकश्च, वाय्वात्मकं स्पर्शः स्पर्शनं रौक्ष्यं प्रेरणं धातुव्यूहनं चेष्टाश्च शारीर्यः, अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यं च, अबात्मकं रसो रसनं शैत्यं मार्दवं स्नेहः क्लेदश्च, पृथिव्यात्मकं गन्धो घ्राणं गौरवं स्थैर्यं मूर्तिश्चेति ॥ १२ ॥

अस्य આ ગર્ભના इस गर्भके, मातृजादयः માતૃજાદિ ભાવો मातृजादि भाव, अपि પણ भी, महाभूतविकारा મહાભૂતના વિકાર पचमहाभूतके विकार, एव જ છે ही है, तत्र તેમાં उनमें, शब्द. શબ્દ शब्द, श्रोत्रम् શ્રોત્ર श्रोत्र, लाघवम् લઘુતા लघुता, सौक्ष्म्यम् સૂક્ષ્મતા सूक्ष्मता, विवेक च અને વિવેક (શારીર ભાવોનું પરસ્પર પૃથક્પણુ) और विवेक (शारीर भावोंका परस्पर पृथक्त्व), अस्य એ આના ये इसके, आकाशात्मकम् આકાશના વિકારો છે आकाशके विकार है, स्पर्श. સ્પર્શ स्पर्श, स्पर्शनम् સ્પર્શનેન્દ્રિય स्पर्शनेन्द्रिय, रौक्ष्यम् રૂક્ષતા

रूक्षता, प्रेरणम् પ્રેરણા प्रेरणा, धातुव्यूहनम् ધાતુરચના धातुरचना, शारीरं. અને શરીરની और शरीरकी, चेष्टाः च ચેષ્ટાઓ चेष्टायें, वाय्वात्मकम् એ વાયુના વિકાર છે ये वायुके विकार हैं, रूपम् રૂપ रूप, दर्शनम् દર્શન दर्शनेन्द्रिय, प्रकाशः દીપ્તિ दीप्ति, पक्तिः પરિપાક परिपाक, औष्ण्यम् च અને ઉષ્ણતા और उष्णता, अग्न्यात्मकम् એ અગ્નિના વિકાર છે ये अग्निके विकार हैं, रस રસ रस, रसनम् રસના रसना, शैत्यम् શીતતા शीतता, मार्दवम् મૃદુતા मृदुता, स्नेह. સ્નેહ स्नेह, क्लेद. च અને ક્લેદ और क्लेद, अबात्मकम् એ જલના વિકાર છે ये जलके विकार हैं, गन्ध ગન્ધ गन्ध, घ्राणम् ઘ્રાણ घ्राणेन्द्रिय, गौरवम् ગૌરવ गुरुता, स्थैर्यम् સ્થિરતા स्थिरता, मूर्ति च અને કઠિનતા और कठिनता, पृथिव्यात्मकम् એ પૃથ્વીના વિકાર છે ये पृथ्वीके विकार हैं ॥ १२ ॥

12. Even those parts derived from the mother etc., are in fact only modifications of their five basic elements. In the fetus the constituents of the ether are—sound, audition, lightness, fineness and space; those belonging to air are tangibility, sense of touch, roughness, impulsion, the marshalling and maintaining of the humors of the body and its movements, those belonging to light are form, vision, brightness, digestion and heat, those belonging to water are taste, the sense of taste, coldness, softness, unctuousness and wetness, those belonging to earth are odour, the sense of smell, weight, steadfastness and hardness.

लोकपुरुषयोस्तुल्यत्वदर्शनम्—

एवमयं लोकसंमितः पुरुषः। यावन्तो हि लोके मूर्तिमन्तो भावविशेषास्तावन्तः पुरुषे, यावन्तः पुरुषे तावन्तो लोके इति, बुधास्त्वेवं द्रष्टुमिच्छन्ति ॥ १३ ॥

एवम् આ પ્રમાણે इस प्रकार, अयम् આ यह, पुरुष. પુરુષ पुरुष, लोकसंमित લોકતુલ્ય છે लोकतुल्य है, हि કેમકે क्योंकि, लोके લોકમાં लोकमें, यावन्त. જેટલા जितने, मूर्तिमन्त મૂર્તિમાન मूर्तिमान, भावविशेषा ભાવવિશેષો છે भावविशेष हैं, तावन्त તેટલા उतने, पुरुषे પુરુષમાં છે पुरुषमें है, यावन्त અને જેટલા और जितने, पुरुषे પુરુષમાં છે पुरुषमें है, तावन्त. તેટલા उतने, लोके इति લોકમાં છે लोकमें है, बुधा तु બુદ્ધિમાન પુરુષો बुद्धिमान तो, एवम् એમ ऐसा, द्रष्टुम् જોવાને देखना, इच्छन्ति ઇચ્છે છે चाहते हैं ॥ १३ ॥

13 Thus the individual man is an epitome of the universe As much diversity of substance and quality as is found in the world outside even so much exists in man, and as much in man, so much in the world outside Thus the wise like to regard the nature of existence

गर्भस्येन्द्रियाण्यङ्गावयवाश्च यौगपद्येनोत्पद्यन्ते, जातस्योत्तरकालजा भावाः—

एवमस्येन्द्रियाण्यङ्गावयवाश्च यौगपद्येनाभिनिर्वर्तन्तेऽन्यत्र तेभ्यो भावेभ्यो येऽस्य जातस्योत्तरकालं जायन्ते; तद्यथा—दन्ता व्यञ्जनानि व्यक्तीभावस्तथायुक्तानि चापराणि। एषा प्रकृतिः, विकृतिः पुनरतोऽन्यथा।

एवम् આમ इस तरह, ये જે ભાવો जो भाव, अस्य એના इसके, जातस्य જન્મ્યા जन्मके, उत्तरकालम् પછી बाद, जायन्ते ઉત્પન્ન થાય છે उत्पन्न होते हैं, तेभ्य તે उन, भावेभ्यः ભાવો भावोंको, अन्यत्र સિવાય छोड़ कर, अस्य આ ગર્ભની इस गर्भकी, इन्द्रियाणि ઇન્દ્રિયો इन्द्रियाँ, अङ्गावयवा च અને અંગ તથા અવયવો और अंग तथा अवयव, यौगपद्येन એક સાથે एक साथ, अभिनिर्वर्तन्ते ઉત્પન્ન થાય છે उत्पन्न होते हैं,

१४. व्यक्तीभाव' – शुक्ररजोव्यक्तीभाव' (ध.)

तत् यथा જેમકે जैसे कि, दन्ताः દાંત दात, व्यञ्जनानि દાઢી, મૂછ, સ્તન વગેરે दाढी, मूंछ, स्तन आदि, व्यक्तीभाव શુક્ર તથા શોણિતનું પ્રકટ થવુ शुक्र तथा शोणितका प्रकट होना, तथायुक्तानि અને તેના જેવા और ऐसे, अपराणि च બીજા બુદ્ધ્યાદિ ભાવો જન્મ્યા પછી ઉત્પન્ન થાય છે अन्य बुद्ध्यादिभाव जन्मके बाद उत्पन्न होते है, एषा આ यह, प्रकृतिः પ્રકૃતિ છે प्रकृति है, अतः અને એનાથી इससे, अन्यथा पुन વિપરીત विपरीत, विकृतिः વિકૃતિ છે विकृति है।

14-(1) Thus the sense-organs and the limbs of the fetus manifest them selves simultaneously Apart from these phenomena there are some which appear after the birth of the infant, these are the teeth, secondary sexual signs, and signs of puberty and such other traits This is the natural order, contrary to this is unnatural

स्त्रीपुंनपुंसकाना वैशेषिका भावा —

सन्ति खल्वस्मिन् गर्भे केचिन्नित्या भावाः, सन्ति चानित्या केचित्। तस्य य एवाङ्गावयवाः सन्तिष्ठन्ते, त एव स्त्रीलिङ्गं पुरुषलिङ्गं नपुंसकलिङ्गं वा बिभ्रति। तत्र स्त्रीपुरुषयोर्ये वैशेषिका भावाः प्रधानसंश्रया गुणसंश्रयाश्च, तेषां यतो भूयस्त्वं ततोऽन्यतरभावः।

अस्मिन् આ इस, गर्भे खलु ગર્ભમાં गर्भमें, केचित् કેટલાક कई, नित्या નિત્ય नित्य, भावाः ભાવો भाव, सन्ति છે है, केचित् અને કેટલાક और कई एक, अनित्या च અનિત્ય ભાવો अनित्य भाव, सन्ति छे है, तस्य તેના इनके, ये एव જે જે जो ही, अङ्गावयवा અંગ અને અવયવો अग और अवयव, सन्तिष्ठन्ते સ્થાયી રહે છે स्थायी रहते है, ते एव તેઓજ वे ही, स्त्रीलिङ्गम् સ્ત્રીલિંગ स्त्रीलिंग, पुरुषलिङ्गम् પુરુષલિંગ पुरुषलिंग, नपुंसकलिङ्गम् वा કે નપુંસકલિંગ अथवा नपुंसकलिंगको, बिभ्रति ધારણ કરે છે धारण करते है, तत्र તેમાં उनमें, स्त्रीपुरुषयो. સ્ત્રીપુરુષના स्त्री और पुरुषके, प्रधानसंश्रया· આત્માશ્રિત आत्माश्रित, गुणसंश्रयाः च અને ભૂતાશ્રિત और भूताश्रित, ये જે जो, वैशेषिका ખાસ खास, भावा ભાવો છે भाव होते है, तेषाम् તેમાંથી उनमेंसे, यतः જે ભાવની जिस भावकी, भूयस्त्वम् અધિકતા હોય છે अधिकता होती है, तत तेने અનુસરી उसीके अनुसार, अन्यतरभाव એમાંથી એક થાય છે दोनोंमें से किसी एककी उत्पत्ति होती है,

14-(2). Now in the fetus there are some characteristics which are permanent and some which are temporary. Those parts alone of the fetus which persist throughout life are called the primary signs of sex, whether male, female or neuter. Those distinctive (mutually exclusive) characteristics of man and woman are partly dependant on the self and partly on the material element, the sex differentiation is due to the preponderance of one or the other of these factors.

तद्यथा—क्लैब्यं भीरुत्वमवैशारद्यं मोहोऽनवस्थानमधोगुरुत्वमसहनं शैथिल्यं मार्दवं गर्भाशयबीजभागस्तथायुक्तानि चापराणि स्त्रीकराणि, अतो विपरीतानि पुरुषकराणि, उभयभागावयवा नपुंसककराणि भवन्ति ॥ १४ ॥

तत् यथा જેમકે जैसे कि, क्लैब्यम् કલૈબ્ય क्लीवता, भीरुत्वम् ભીરુતા भीरुता, अवैशारद्यम् અકૌશલ્ય अचातुर्य, मोह મોહ मोह, अनवस्थानम् ચિત્તચાંચલ્ય चलचित्तता, अधोगुरुत्वम् નીચેના ભાગની ગુરુતા

१४. तत्र-तत. (ब)

१४ मोहोऽनवस्थानमधोगुरुत्वम्–मोहोऽवस्थानमधोगुरुत्वम् (ङ ग. द प)

,, मार्दव गर्भाशयबीजभागस्तथायुक्तानि–मार्दव तथा युक्तानि(प)

,, बीजभाग.–बीजभावा (प)

,, उभयभागावयवा –'उभयभागभावानि' इति 'उभयभावा' इति च पाठ (ब.)

निम्न भागका भारीपन, असहनम् અસહિષ્ણુતા असहिष्णुता, शैथिल्यम् શિથિલતા शिथिलता, मार्दवम् મૃદુતા मृदुता, गर्भाशय- ગર્ભાશયનો गर्भाशयका, बीजभाग. બીજભાગ बीजभाग, तथायुक्तानि અને એના જેવા और ऐसे अपराणि च બીજા ભાવો अन्य भाव, स्त्रीकराणि સ્ત્રીકર થાય છે स्त्रीजनक होते हैं, अत. આથી इनसे, विपरीतानि વિપરીત ભાવો विपरीत भाव, पुरुषकराणि પુરુષકર થાય છે पुरुषजनक होते हैं, उभयभागावयवा બન્ને પ્રકારના અવયવોવાળા ભાવો दोनों प्रकारके अवयवोंवाले भाव, नपुंसककराणि નપુંસકકર नपुंसकजनक, भवन्ति થાય છે होते है ॥ १४ ॥

14 Thus weakness, timidity, artlessness, confusion, fickleness, heaviness of the nether limbs, want of forbearance, frailty, softness, the uterine part of the seed and such other feminine traits determine the female sex, traits opposite to these determine the male sex. When there is an equal distribution of both traits there is the neuter sex

इन्द्रियोत्पत्तिसमकालमेव गर्भस्य चेतसि वेदनानिर्बन्ध, तृतीये मासि गर्भे द्वैहृदय्योत्पत्ति —

तस्य यत्कालमेवेन्द्रियाणि संतिष्ठन्ते, तत्कालमेव चेतसि वेदना निर्बन्धं प्राप्नोति, तस्मात्तदाप्रभृति गर्भः स्पन्दते, प्रार्थयते च जन्मान्तरानुभूतं यत् किंचित्, तद् द्वैहृदय्यमाचक्षते वृद्धाः ।

तस्य તેને उस गर्भकी, यत्कालम् एव જે સમયે जिस समय ही, इन्द्रियाणि ઇન્દ્રિયો इन्द्रिया, संतिष्ठन्ते ઉત્પન્ન થાય છે बन जाती है, तत्कालम् एव તે જ સમયે उसी समय, चेतसि ચિત્તમાં मनमें, वेदना સુખદુઃખનુ જ્ઞાન सुखदु खका ज्ञान, निर्बन्धम् પ્રાદુર્ભાવ व्यक्त, प्राप्नोति પામે છે होता है, तस्मात् તેથી इस लिए, तदाप्रभृति ત્યારથી માંડીને उस समयसे लेकर, गर्भ ગર્ભ गर्भ, स्पन्दते ફરકવા લાગે છે फड़कने लगता है, यत् किञ्चित् અને જે કઈ और जो कुछ, जन्मान्तर- પૂર્વજન્મમાં पूर्वजन्ममें, अनुभूतम् च અનુભવેલુ હોય છે તે अनुभूत होता है उसको, प्रार्थयते ચાહે છે चाहता है, वृद्धा વૃદ્ધો वृद्ध, तत् તેને उसे, द्वैहृदय्यम् દોહદ दोहद, आचक्षते કહે છે कहते है।

15-(1) When the sense-organs appear in the fetus at that very time sentience lays hold of its mind Consequently from that time the embryo is seen to throb and yearn for this or that thing, experienced in the past existence; this condition is called the bicardiac state by the experienced.

मातृजं चास्य हृदयं मातृहृदयेनाभिसंबद्धं भवति रसवाहिनीभिः संवाहिनीभिः; तस्मात्तयोस्ताभिर्भक्तिः संस्पन्दते। तच्चैव कारणमवेक्षमाणा न द्वैहृदय्यस्य विमानितं गर्भमिच्छन्ति कर्तुम् ।

अस्य च એનું इस गर्भका, मातृजम् માતૃજન્ય मातामे उत्पन्न, हृदयम् હૃદય हृदय, रसवाहिनीभिः રસવાહી रसवाहिनी, सवाहिनीभि· નાડીઓ દ્વારા नाडियोंके द्वारा, मातृहृदयेन માતાના હૃદય સાથે माताके हृदयसे, अभिसंबद्धम् બંધાયેલુ बन्धा हुआ, भवति રહે છે रहता है, तस्मात् તેથી इससे, तयो. भक्तिः તે બન્નેની ઇચ્છા उन दोनोंकी इच्छा, ताभि. તે નાડીઓ દ્વારા इन नाडियोंके द्वारा, संस्पन्दते આવાગમન કરે છે गमनागमन करती है, तत् एव च અને તે જ और उसी, कारणम् કારણને कारणको, अवेक्षमाणा च લક્ષમાં રાખતા देखते हुए, गर्भम् ગર્ભને गर्भको, द्वैहृदय्यस्य विमानितम् અપ્રાપ્ત દોહદવાળો अप्राप्त दोहदवाला, कर्तुम् કરવાને करना, न इच्छन्ति ઇચ્છતા નથી नहीं चाहते।

---

१५ तत्कालमेव चेतसि-तत्कालमेवास्य चेतसि (क. च.)

१५. रसवाहिनीभि —रसहारिणीभिः (च)

,, ताभिर्भक्ति —ताभिर्मुक्ति (प.)

,, संस्पन्दते—सपद्यते (ष. च)

,, न द्वैहृदय्यस्य विमानित—द्वैहृदय्याविमानितम् (क ङ च)

15-(2). The heart of the fetus, taking its rise from the mother, is connected with the mother's own heart by the channels that carry nourishment, incidentally inclinations are also conveyed by these channels Having this fact in view, the wise do not wish to see the fetus baulked of its desires originating either in its own heart or in that of the mother.

द्वैहृदय्यविमानने दोषा —

विमानने ह्यस्य दृश्यते विनाशो विकृतिर्वा। समानयोगक्षेमा हि तदा भवति गर्भेण केषुचिदर्थेषु माता। तस्मात् प्रियहिताभ्यां गर्भिणीं विशेषेणोपचरन्ति कुशलाः ॥ १५॥

हि કારણકે क्योंकि अस्य એની इसकी, विमानने ઇચ્છા પૂરી ન થતાં इच्छा पूरी न होने पर, विनाश એનો વિનાશ इसका विनाश, विकृतिः वा અથવા વિકૃતિ अथवा विकृति, दृश्यते જોવામાં આવે છે देखी जाती है, तदा ત્યારે उस समय, माता માતા माता, केषुचित् કેટલાક कुछ, अर्थेषु વિષયોમાં भावोंमें, गर्भेण ગર્ભની સાથે गर्भके साथ, समानयोगक्षेमा हि સમાન યોગક્ષેમવાળી समान योगक्षेमवाली, भवति હોય છે होती है, तस्मात् તેથી इससे, कुशलाः કુશળ મનુષ્યો कुशल मनुष्य, प्रियहिताभ्याम् પ્રિય અને હિતકર આહારવિહારોથી प्रिय और हितकर आहार-विहारोंसे, गर्भिणीम् ગર્ભિણીના गर्भिणीका, विशेषेण ખાસ કરીને विशेष रूपसे, उपचरन्ति ઉપચાર કરે છે उपचार करते है ॥ १५ ॥

15. For, from such thwartings, it is seen that the fetus is either destroyed or deformed. At this time the mother's well-being in some respects is identical with that of the fetus; because of this the skilled physicians minister exceedingly to the pregnant women with endearing and wholesome things

गर्भिण्या लिङ्गानि—

तस्या गर्भापत्तेर्द्वैहृदय्यस्य च विज्ञानार्थं लिङ्गानि समासेनोपदेक्ष्यामः। उपचारसाधनं ह्यस्य ज्ञाने, ज्ञानं च लिङ्गतः, तस्मादिष्टो लिङ्गोपदेशः ।

तस्याः તે ગર્ભિણીને उस गर्भिणीके गर्भापत्तेः ગર્ભની પ્રાપ્તિના गर्भप्राप्तिके, द्वैहृदय्यस्य च અને દોહદના और दोहदके, विज्ञानार्थम् જ્ઞાન માટે ज्ञानके लिए, समासेन સંક્ષેપથી सक्षेपसे, लिङ्गानि લક્ષણોને लक्षणोंको, उपदेक्ष्यामः ઉપદેશ કરશું कहेंगे, हि કારણકે क्योंकि, अस्य એનું इसके, ज्ञाने જ્ઞાન થતાં जानने पर, उपचारसाधनम् ઉપચાર થઈ શકે છે उपचार हो सकता है, ज्ञानम् च અને જ્ઞાન और ज्ञान, लिङ्गतः લક્ષણોથી થાય છે लक्षणसे होता है, तस्मात् તેથી इस लिए, लिङ्गोपदेश લક્ષણોનો ઉપદેશ लक्षणोंका उपदेश, इष्टः આવશ્યક છે इष्ट है।

16 (1). Now with a view to ascertaining pregnancy and the bicardiac condition, we shall describe the symptoms in brief. Knowledge is essential for treatment; and knowledge comes from a study of the symptoms; therefore the exposition of the symptoms is a desideratum.

तद्यथा—आर्तवादर्शनमास्यसंस्रवणमनन्नाभिलाषश्छर्दिररोचकोऽम्लकामता च विशेषेण श्रद्धाप्रणयनमुच्चावचेषु भावेषु गुरुगात्रत्वं चक्षुषोर्ग्लानिः स्तनयोः स्तन्यमोष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यमत्यर्थं श्वयथुः पादयोरीषल्लोमराज्युद्गमो योन्याश्चाटालत्वमिति गर्भे पर्यागते रूपाणि भवन्ति ॥१६॥

१६ गर्भापत्ते —गर्भोत्पत्ते. (च)
,, उपचारसाधनम्—उपचारसंबोधनम द ध)
,, ह्यस्य ज्ञाने—ह्यस्याज्ञाने दोष ।प.
,, ज्ञान—दोषज्ञान च द. प)

तत् यथा જેમકે जैसे कि, आर्तव-अदर्शनम् આર્તવ ન દેખાવું आर्तवका न दीखना, आस्य-संस्रवणम् મોઢામાંથી લાળ સરવી मुखसे लार गिरना, अन्नानभिलाष. અન્નની અનિચ્છા अन्नकी अनिच्छा, छर्दिः ઉલટી वमन, अरोचकः અરુચિ अरुचि, विशेषेण વિશેષે કરીને विशेष कर, अम्लकामता च ખાટા પદાર્થોની ઇચ્છા खट्टे पदार्थोंकी इच्छा, उच्चावचेषु ઊંચાનીચા ऊंचनीच, भावेषु ભાવોમાં भावोंमें, श्रद्धा-प्रणयनम् ઇચ્છા થવી इच्छाका होना, गुरुगात्रत्वम् અંગોનું ભારેપણું शरीरका भारीपन, चक्षुषोः આંખોમાં नेत्रोंमें, ग्लानि. ગ્લાનિ ग्लानि, स्तनयोः સ્તનોમાં स्तनोंमें, स्तन्यम् દૂધનું પ્રકટ થવું दूधका प्रकट होना, ओष्ठयो. હોઠ होठ, स्तनमण्डलयो च અને સ્તનમંડળની और स्तनमण्डलका, अत्यर्थम् વિશેષ પ્રમાણમાં अत्यन्त, कार्ष्ण्यम् કાળાશ काला पड़ना, पादयोः પગે पैरोंमें, ईषत् श्वयथुः થોડો સોજો कुछ सूजन, लोमराजि- રૂવાંડાં रोमराजिका, उद्गम· ઊભાં થવાં खड़ा होना, योन्याः અને યોનિનું और योनिका, चाटालत्वम् વિસ્તૃતપણું चौड़ा होना, इति એ ये, गर्भे ગર્ભની गर्भकी, पर्यागते પ્રાપ્તિ થતાં प्राप्ति होने पर, रूपाणि લક્ષણો लक्षण, भवन्ति થાય છે होते हैं ॥१६॥

16. These symptoms are—the stoppage of menstruation, excessive salivation, dislike for food, vomiting, anorexia, excessive hankering for sour things, the exhibition of relish for all sorts of things, heaviness of the limbs, lack-lustre eyes, lactation, deep pigmentation of the lips and breasts, slight edema of the feet, growth of down on the abdomen, extension of the vagina—these are the indications of a growing conception.

गर्भोपघातकरान्भावान् विहाय गर्भिणी यदिच्छेत्तत्तस्यै दद्यात्—

सा यद्यदिच्छेत्तत्तदस्यै दद्यादन्यत्र गर्भोपघातकरेभ्यो भावेभ्यः ॥ १७ ॥

सा ગર્ભિણી गर्भिणी, यत् यत् જે જે जो जो, इच्छेत् ઇચ્છે चाहे, तत् तत् તે તે वह वह, गर्भोपघातकरेभ्यः ગર્ભને હાનિકારક गर्भके लिए हानिकारक, भावेभ्य ભાવો भावोंके, अन्यत्र સિવાય छोड़ कर, अस्यै તેને उसे, दद्यात् દેવું જોઈએ देना चाहिए ॥ १७ ॥

17 The pregnant woman should be given whatever she desires with the exception of such things as would injure the fetus.

गर्भोपघातकरा भावा —

गर्भोपघातकरास्त्विमे भावा भवन्ति, तद्यथा—सर्वमतिगुरूष्णतीक्ष्णं दारुणाश्च चेष्टाः;

इमे भावा· तु આ ભાવો ये भाव, गर्भोपघातकराः ગર્ભને હાનિ કરનારા गर्भको हानि पहुचानेवाले, भवन्ति થાય છે होते है, तत् यथा જેમકે जैसे, सर्वम् સઘળું सव, अतिगुरु- અતિ ગુરુ अति गुरु, उष्ण- અતિ ઉષ્ણ अति उष्ण, तीक्ष्णम् અને અતિ તીક્ષ્ણ અન્નપાન और अति तीक्ष्ण अन्नपान, दारुणा. च અને દારુણ और दारुण, चेष्टा. ચેષ્ટાઓ चेष्टायें;

18-(1) These things will tend to injure the fetus, namely, all those that are very heavy, heat-producing or pungent, and all violent movements.

इमांश्चान्यानुपदिशन्ति वृद्धाः—देवतारक्षोऽनुचरपरिरक्षणार्थं न रक्तानि वासांसि बिभृयान्न मदकराणि मद्यान्यभ्यवहरेन्न यानमधिरोहेन्न मांसमश्नीयात् सर्वेन्द्रियप्रतिकूलांश्च भावान् दूरतः परिवर्जयेत्, यच्चान्यदपि किञ्चित् स्त्रियो विद्युः ॥ १८ ॥

वृद्धा· વૃદ્ધો वृद्धलोग, इमान् આ इन, अन्यान् च બીજા ભાવોનો પણ अन्य भावोंका भी, उपदिशन्ति ઉપદેશ કરે છે उपदेश करते हैं, देवता- દેવતાઓના देवता, रक्षः- તથા રાક્ષસોના तथा राक्षसोंके, अनुचर-

१८. न मदकराणि मद्यान्यभ्यवहरेत्–न मदकराणि च चान्यभ्यवहरेत् (ख ग.)

અનુચરોથી अनुचरोंसे, परिरक्षणार्थम् રક્ષણ કરવા માટે रक्षणके लिए, रक्तानि રાતાં लाल, वासांसि વસ્ત્ર वस्त्र, न विभृयात् ધારણ ન કરવાં धारण न करे, मदकराणि મદકારી मदकारी, मद्यानि મદ્યોનું मद्योंको, न अभ्यवहरेत् સેવન ન કરવું न पीवे, यानम् વાહન પર वाहन पर, न अधिरोहेत् સ્વારી ન કરવી न चढे, मांसम् માંસ मास, न अश्नीयात् ખાવું નહિ न खाये, सर्वेन्द्रिय- સર્વ ઇન્દ્રિયોને सब इन्द्रियोंके, प्रतिकूलान् પ્રતિકૂળ प्रतिकूल, भावान् च ભાવોને भावोंको, स्त्रिय. અને વૃદ્ધ સ્ત્રીઓ और वृद्ध स्त्रिया, यत् अन्यत् જે બીજું जो दूसरा, अपि किञ्चित् કંઈ પણ कुछ भी, विदु જાણતી હોય जानती हों, तत् તેનો उसका दूरत: દૂરથી दूरसे, परिवर्जयेत् ત્યાગ કરવો त्याग करे ॥१८॥

18. The elderly people prescribe these other measures too, in order to shield the fetus from angelic and demoniac powers and their followers, the exepectant mother should not wear red habiliments nor indulge in intoxicating wines, nor ascend nor travel in a carriage, nor eat meat; in short, she should never come near anything that might injure her senses She should also keep away from whatever else that experienced women declare as harmful

प्रार्थनासंधारणे दोषा —

तीव्रायां तु खलु प्रार्थनायां काममहितमप्यस्यै हितेनोपहितं दद्यात् प्रार्थनाविनयनार्थम्। प्रार्थनासंधारणाद्धि वायुः प्रकुपितोऽन्तःशरीरमनुचरन् गर्भस्यापद्यमानस्य विनाशं वैरूप्यं वा कुर्यात् ॥ १९ ॥

प्रार्थनायाम् खलु ઇચ્છા इच्छाके, तीव्रायाम् तु તીવ્ર હોય તો तीव्र होने पर, प्रार्थनाविनयनार्थम् ઇચ્છાની निवृत्ति કરવા માટે इच्छाकी निवृत्तिके लिए, अस्यै આને इस सगर्भाको, कामम् अहितम् ખુશીથી અહિત વસ્તુ भले अहित वस्तु, अपि પણ भी, हितेन હિતકર વસ્તુની સાથે हितकर वस्तुके साथ, उपहितम् મેળવીને मिला कर, दद्यात् દેવી देवे, हि કારણકે क्योंकि, प्रार्थनासंधारणात् ઇચ્છા રોકવાથી इच्छाके रोकनेसे, प्रकुपित. પ્રકોપ પામેલો प्रकुपित हुआ, वायुः વાયુ वायु, अन्त - शरीरम् શરીરની અંદર शरीरके भीतर, अनुचरन् સંચાર કરતો घूमता हुआ, आपद्यमानस्य ઉત્પન્ન થતા बनते हुए, गर्भस्य ગર્ભનો गर्भका, विनाशम् નાશ विनाश, वैरूप्यम् वा કે વિકૃતિ या विरूपता, कुर्यात् કરે છે करता है ॥ १९ ॥

19. But if the longing becomes intolerable it is better to give the pregnant woman the desired object, be it injurious, having neutralized it to whatever extent possible by the addition of a wholecome ingredient, so that the longing is removed. For if the longing is completely repressed, the irritated vata moving inside the body will either destroy or deform the fetus.

चतुर्थे मासि गर्भस्य स्वरूपम्—

चतुर्थे मासि स्थिरत्वमापद्यते गर्भः, तस्मात्तदा गर्भिणी गुरुगात्रत्वमधिकमापद्यते विशेषेण ॥२०॥

चतुर्थे मासि ચોથે મહિને चौथे मासमें, गर्भ ગર્ભ गर्भ, स्थिरत्वम् સ્થિરતા स्थिरताको, आपद्यते પ્રાપ્ત કરે છે प्राप्त करता है, तस्मात् તેથી इस लिए, तदा ત્યારે उस समय, गर्भिणी ગર્ભિણી गर्भिणी, विशेषेण વિશેષે કરીને विशेषत., अधिकम् અધિક अधिक, गुरुगात्रत्वम् ભારી શરીરવાળી भारी शरीरवाली, आपद्यते બને છે होती है ॥ २० ॥

20. In the fourth month the fetus becomes stabilised; consequently the

१९ प्रकुपितो–कुपितो (च ज थ)

१९ प्रार्थनाविनयनार्थम्–प्रार्थनादित्यार्थम् (ग.)

pregnant woman shows a pronounced increase in the body-weight.

पञ्चमे मासि गर्भस्य स्वरूपम्—

पञ्चमे मासि गर्भस्य मांसशोणितोपचयो भवत्यधिकमन्येभ्यो मासेभ्यः, तस्मात्तदा गर्भिणी कार्श्यमापद्यते विशेषेण ॥ २१ ॥

पञ्चमे मासि પાંચમે મહિને पांचवें मासमें, अन्येभ्यः मासेभ्य. બીજા મહિનાઓ કરતાં अन्य मासोंकी अपेक्षा, गर्भस्य ગર્ભના गर्भके, मांस-शोणित- માંસ અને શોણિતની मास और शोणितकी उपचय. વૃદ્ધિ वृद्धि, अधिकम् અધિક अधिक, भवति થાય છે होती है, तस्मात् તેથી इस लिए, तदा ત્યારે उस समय, गर्भिणी ગર્ભિણી गर्भिणी, विशेषेण વિશેષ પ્રમાણમાં विशेष रूपसे, कार्श्यम् કૃશતાને कृशताको, आपद्यते પામે છે पाती है ॥ २१ ॥

21. In the fifth month there is a greater increase, to the fetus, in the accession of flesh and blood than during other months. Therefore at this time, the pregnant woman becomes exceedingly emaciated.

षष्ठे मासि गर्भस्य स्वरूपम्—

षष्ठे मासि गर्भस्य बलवर्णोपचयो भवत्यधिकमन्येभ्यो मासेभ्यः, तस्मात्तदा गर्भिणी बलवर्णहानिमापद्यते विशेषेण ॥ २२ ॥

षष्ठे मासि છઠ્ઠે મહિને छट्ठे मासमें, अन्येभ्य मासेभ्यः બીજા મહિનાઓ કરતાં अन्य मासोंकी अपेक्षा, गर्भस्य ગર્ભના गर्भके, बल-वर्ण- उपचयः બલ અને વર્ણની પુષ્ટિ बल तथा वर्णकी पुष्टि, अधिकम् અધિક अधिक, भवति थाय છે होती है, तस्मात् तदा તેથી ત્યારે इस लिए इस समय, गर्भिणी ગર્ભિણી गर्भिणी, विशेषण વિશેષે કરીને विशेष रूपसे, बल-वर्ण-हानिम् બલ અને વર્ણની હાનિને बल और वर्णकी हानिको, आपद्यते પામે છે पाती है ॥२२॥

22. बलवर्णोपचयो—मासशोणितोपचयो (च)

22. In the sixth month there is a greater increase in the accession of strength and pigmentation to the fetus than during the other months; consequently at this time the pregnant woman loses strength and color exceedingly.

सप्तमे मासि गर्भस्य स्वरूपम्—

सप्तमे मासि गर्भः सर्वैर्भावैराप्याय्यते, तस्मात्तदा गर्भिणी सर्वाकारैः क्लान्ततमा भवति ॥२३॥

सप्तमे मासि સાતમે મહિને सातवें मासमें, गर्भ. ગર્ભ गर्भः, सर्वै. भावै સર્વ ભાવોથી सब भावोंसे, आप्याय्यते વૃદ્ધિ પામે છે वृद्धि पाता है, तस्मात् तदा તેથી ત્યારે इस लिए उस समय, गर्भिणी ગર્ભિણી गर्भिणी, सर्वाकारै સર્વરૂપે सब रूपसे, क्लान्ततमा અત્યંત થાકી ગયેલી अधिक क्लान्त, भवति થાય છે हो जाती है ॥ २३ ॥

23. In the seventh month the fetus develops in all ways; therefore, at this time, the pregnant woman becomes exceedingly restless (tired)

अष्टमे मातृगर्भस्यो. परस्परमोजोग्रहणम्—

अष्टमे मासि गर्भश्च मातृतो गर्भतश्च माता रसहारिणीभिः संवाहिनीभिर्मुहुर्मुहुरोजः परस्परत आददाते गर्भस्यासंपूर्णत्वात् ।

अष्टमे मासि આઠમે મહિને आठवें मासमें, गर्भस्य ગર્ભની गर्भके, असंपूर्णत्वात् સંપૂર્ણતા ન હોવાથી असंपूर्ण होनेसे, रसवाहिनीभि. રસવાહિની रसवाहिनी, संवाहिनीभिः શિરાઓ દ્વારા नाड़ियों द्वारा, गर्भ च मातृत. ગર્ભ માતામાંથી गर्भ मातासे, माता च गर्भतः અને માતા ગર્ભમાંથી और माता गर्भसे, मुहुः मुहु વાર-

23. सर्वैर्भावैः—सर्वभावैः (ध.)
,, ,, —सर्वभावै सह (व)
24. रसहारिणीभि —रसवाहिनीभि (च. प.)
" गर्भस्यासपूर्णत्वात्—गर्भस्य सपूर्णत्वात् (क.च.ग.व.प.)

વાર વારવાર, परस्परत પરસ્પર परस्पर, ओज· ઓજસ ओजका, आददाते ગ્રહણ કરે છે ग्रहण करते रहते है,

24-(1) In the eighth month, on account of the yet incomplete formation of the fetus, there is a cotinuous transmission of vitality from the mother to the fetus and vice versa by means of the channels that carry the body-nutrient fluid

तस्मात्तदा गर्भिणी मुहुर्मुहुर्मुदा युक्ता भवति मुहुर्मुहुश्च म्लाना, तथा गर्भः; तस्मात्तदा गर्भस्य जन्म व्यापत्तिमद्भवत्योजसोऽनवस्थितत्वात्। त चैवार्थमभिसमीक्ष्याष्टमं मासमगण्यमित्याचक्षते कुशलाः ॥ २४ ॥

तस्मात् તેથી इस हेतुसे, तदा ત્યારે उस समय, गर्भिणी ગર્ભિણી गर्भिणी, मुहु मुहु· વારવાર वारबार, मुदा युक्ता આનંદયુક્ત हर्षयुक्त, मुहु· मुहुः અને વારંવાર और बारबार, म्लाना च હર્ષરહિત ग्लानियुक्त, भवति થાય છે हो जाती है, गर्भ ગર્ભ પણ गर्भ भी, तथा તે પ્રમાણે થાય છે वैसा ही होता है, तस्मात् તેથી अत, तदा ત્યારે उस समय, गर्भस्य जन्म ગર્ભનો જન્મ गर्भका जन्म, ओजस· ઓજસની ओजकी, अनवस्थितत्वात् અસ્થિરતાને લઈ अस्थिरताके कारण, व्यापत्तिमत् ઉપદ્રવયુક્ત उपद्रवयुक्त, भवति થાય છે होता है, कुशला કુશળ વૈદ્યો कुशल वैद्य, तम् च एव ते उस, अर्थम् બાબતને अर्थको, अभिसमीक्ष्य લક્ષ્યમાં લઈને ध्यानमें रखकर, अष्टमम् मासम् આઠમો મહિનો अष्टम मास, अगण्यम् ગર્ભિણી પાસે ગણવા યોગ્ય નથી गर्भिणीके पास गिनने योग्य नहीं है, इति એમ ऐसा, आचक्षते કહે છે कहते है ॥ २४ ॥

24 Therefore at this time the pregnant woman becomes momentarily joyful and momentarily distressed; in the same manner, also the fetus. Hence at this time the birth of the fetus is attended with risk because of the instability of the vital essence. It is on account of this consideration that the learned say that the eighth month is not to be reckoned upon

२४ म्काना-म्लाना (घ)
,, भवति-भवत्यपिकं (ध.)

प्रसवकाल· —

तस्मिन्नेकदिवसातिक्रान्तेऽपि नवमं माससुपादाय प्रसवकालमित्याहुरादशमान्मासात्। एतावान् प्रसवकालः, वैकारिकमतः परं कुक्षाववस्थानं गर्भस्य ॥ २५ ॥

तस्मिन् તે આઠમા મહિનાને उस अष्टम मासके, एक-दिवस-अतिक्रान्ते વીત્યે એક દિવસ થયા છતાં वाद एक दिन वीतने पर, अपि પણ भी, नवमम् मासम् નવમા માસને नवम मासको, उपादाय લઈને ले कर, आदशमात् દશમા दशम, मासात् માસપર્યન્ત मासपर्यन्त, प्रसवकालम् પ્રસવકાલ છે प्रसवकाल है, इति એમ ऐसा, आहु કહે છે कहते है, एतावान् આટલો इतना, प्रसवकाल પ્રસૂતિ થવાનો કાળ છે प्रसवकाल है अत. परम् એ પછીથી इसके वाद, गर्भस्य ગર્ભનું गर्भका, कुक्षौ ગર્ભાશયમાં कुक्षिमें, अवस्थानम् રહેવું निवास, वैकारिकम् વિકારવાળું છે विकारयुक्त है ॥२५॥

25. If the eighth month is passed even by a day, the ninth month having come in, thence till the tenth month is the period of delivery. This is the normal period of delivery. If the fetus stays longer in the womb, it is abnormal

२५ नवम मासमुपादाय प्रसवकालम्-नवमं मासमुपादाय [illegible]कालम् ([illegible])
,, आदशमान्मासात्-आद्वादशमासात् (ट)
,, दशमान्मासात्-द्वादशान्मासात् (ग)
,, अत. पर कुक्षाववस्थानम्-अन [illegible] (घ)

प्रकरणोपसंहारः—

एवमनयाऽऽनुपूर्व्याऽभिनिर्वर्तते कुक्षौ ॥ २६ ॥

एवम् આમ इस तरह, अनया આ इस, आनुपूर्व्या ક્રમાનુસાર क्रमसे, कुक्षौ ગર્ભ ઉદરમાં गर्भ कुक्षिमें, अभिनिर्वर्तते નિષ્પન્ન થાય છે निष्पन्न होता है ॥ २६ ॥

26 Thus by these stages the fetus develops in the womb.

कुक्षौ गर्भस्य वृद्धेर्हेतुः—

मात्रादीनां खलु गर्भकराणां भावानां संपदस्तथा वृत्तस्य सौष्ठवान्मातृतश्चैवोपस्नेहोपस्वेदाभ्यां कालपरिणामात् स्वभावसंसिद्धेश्च कुक्षौ वृद्धिं प्राप्नोति ॥ २७ ॥

मात्रादीनाम् खलु માતા આદિ माता आदि, गर्भकराणाम् ગર્ભકર गर्भोत्पादक, भावानाम् ભાવોની भावोंकी, संपदः સંપત્તિથી संपन्नतासे, तथा वृत्तस्य માતાના આચરણની गर्भिणीके आचारके, सौष्ठवात् ઉત્તમતાથી सम्यक् पालनसे, मातृत. एव માતાથીજ મળતાં माताहीसे प्राप्त, उपस्नेह- ઉપસ્નેહન उपस्नेहन, उपस्वेदाभ्याम् च તથા ઉપસ્વેદનથી एवं उपस्वेदनसे, कालपरिणामात् કાળક્રમે પરિપાક પામવાથી कालद्वारा परिपाक होनेसे, स्वभावसंसिद्धेः च અને સ્વાભાવિક વૃદ્ધિ- થવાથી और स्वभाववाला होनेसे, कुक्षौ ગર્ભ ઉદરમાં गर्भ उदरमें, वृद्धिम् વૃદ્ધિ वृद्धि, प्राप्नोति પામે છે पाता है ॥ २७ ॥

27. The fetus waxes in the womb by the excellence of the parts derived from the various embryo-forming elements like the mother etc, as also from the excellence of the expectant mother's regimen and the Upasweda and Upa sneha procedures, the passage of time, and finally from the course of nature.

गर्भस्याजन्मनि हेतुः—

यथा हि क्षवथूद्गारवातमूत्रपुरीषवेगान् प्रयतमानोऽप्यप्राप्तकालान्न लभते कृच्छ्रेण वाऽप्यवाप्नोति, तथाऽनागतकालं गर्भमपि प्रवाहमाणा, यथा चैषामेव क्षवथ्वादीनां सन्धारणमुपघातायोपपद्यते, तथा प्राप्तकालस्य गर्भस्याप्रवाहणमिति । सा यथानिर्देशं कुरुष्वेति वक्तव्या स्यात् ।

४० या ह्यनागतावी —यद्यनागतावी· (च)

४०. चास्या विकृता—चास्या (च)

,, वाऽप्यवाप्नोति—वा लभते (च)

यथा हि જેમકે जैसे, प्रयतमानः अपि પ્રયત્ન કરતાં છતાં પણ મનુષ્ય प्रयत्न करता हुआ भी मनुष्य, अप्राप्तकालान् સમય આવ્યા સિવાય बिना समयके, क्षवथु- છીંક छीक, उद्गार- ઓડકાર उद्गार, वात- વાયુ वायु, मूत्र- મૂત્ર मूत्र, पुरीष- અને મળના और टट्टीके, वेगान् વેગોને वेगोंको, न लभते પ્રાપ્ત કરતો નથી प्राप्त नहीं होता, कृच्छ्रेण वा अपि અથવા તો મુશ્કેલીએ अथवा तो कष्टसे, अवाप्नोति પ્રાપ્ત કરે છે प्राप्त होता है, तथा अनागत-कालम् તેવી જ રીતે સમય આવ્યા સિવાય वैसे ही बिना समयके, गर्भम् ગર્ભનુ गर्भको, प्रवाहमाणा अपि પ્રવાહણ કરતાં છતાં પણ પ્રસવને પામતી નથી, અથવા કષ્ટથી પામે છે प्रवाहण करने पर भी, प्रसवको नहीं पाती या कष्टसे पाती है, यथा च વળી જેવી રીતે और जैसे, एषाम् एव એ જ उन्हीं, क्षवथु-आदीनाम् છીંક વગેરેનુ छींक आदिको, संधारणम् રોકવુ रोकना, उपघाताय હાનિ માટે हानिके लिए, उपपद्यते થાય છે होता है, तथा તેવી રીતે उसी तरह, प्राप्तकालस्य ઉપસ્થિત કાળવાળા उपस्थित कालवाले, गर्भस्य ગર્ભનું गर्भका, अप्रवाहणम् इति અપ્રવાહણ પણ હાનિ માટે થાય છે अप्रवाहण भी हानिके लिए होता है, सा તેને उसे, यथानिर्देशम् આજ્ઞાનુસાર आज्ञानुसार, कुरुष्व કરજે कर, इति એ પ્રમાણે ऐसा, वक्तव्या स्यात् કહેવુ જોઈએ कहना चाहिए ।

40-(2). As one, though straining to sneeze, eructate or expel flatus, urine or feces prematurely in the absence of a natural urge, does not succeed or succeeds only with difficulty, similarly with the woman who strains prematurely in the absence of the labour-pains, just as, again, the suppression of sternutation etc, leads to injurious effects, so does the want of straining to deliver at the time of labour. She should be told to do as instructed.

तथा च कुर्वती शनैः पूर्वं प्रवाहेत, ततोऽनन्तरं बलवत्तरम्। तस्यां च प्रवाहमाणायां स्त्रियः शब्दं कुर्युः—'प्रजाता प्रजाता धन्यं धन्यं पुत्रम्' इति। तथाऽस्या हर्षेणाप्याय्यन्ते प्राणाः ॥ ४० ॥

तथा च અને તે પ્રમાણે और तदनुसार, कुर्वती કરતાં તેણે करती हुई वह, पूर्वम् પહેલાં प्रथम, शनैः ધીરે ધીરે धीरे धीरे, प्रवाहेत પ્રવાહણ કરવુ प्रवाहण करे, तस्याम् च प्रवाहमाणायाम् તે પ્રવાહણ કરતી હોય ત્યારે वह प्रवाहण करती हो उस समय, स्त्रियः સ્ત્રીઓએ स्त्रियाँ, प्रजाता પ્રસવ થયો છે प्रसव हुआ है, प्रजाता પ્રસવ થયો છે प्रसव हुआ है, धन्यम् ધન્ય धन्य, धन्यम् ધન્ય धन्य, पुत्रम् પુત્રને જન્મ આપ્યો છે पुत्रको जन्म दिया है, इति એ પ્રમાણે इस प्रकार, शब्दम् कुर्युः શબ્દ કરવો शब्द करें, तथा એ પ્રમાણે इस प्रकार, अस्याः એના इसके, प्राणाः પ્રાણો प्राण, हर्षेण હર્ષથી हर्षसे, आप्याय्यन्ते પુષ્ટ કરવામાં આવે છે पुष्ट किये जाते है ॥ ४० ॥

40. And acting accordingly, she must strain slowly in the beginning and gradually increase in force. To her who is straining to deliver, the attending women should cry thus "She has delivered—delivered—a fortunate, fortunate son" In this manner her spirits are exhilarated with joy.

प्रजातायाः अपराऽपतने उपचाराः—

यदा च प्रजाता स्यात्तदैवैनामवेक्षेत—काचिदस्या अपरा प्रपन्ना न वेति। तस्याश्चेदपरा न प्रपन्ना स्यादथैनामन्यतमा स्त्री दक्षिणेन पाणिना नाभेरुपरिष्टाद्बलवन्निपीड्य सव्येन पाणिना पृष्ठत उपसंगृह्य तां सुनिर्धूतं निर्धुनुयात् ।

यदा च અને જ્યારે और जब, प्रजाता स्यात् પ્રસવ થઈ જાય प्रसव हो जाय, तदा एव ત્યારે જ

४१. निपीड्य–निष्पीड्य (ब.)
,, सव्येन पाणिना–सव्येन (ब)
,, तां सुनिर्धूतं–सुनिर्धूता (ब)

तव ही, काचित् કોઈ સ્ત્રી कोई स्त्री, एनाम् એને इसे, अवेक्षेत જોતી રહે देखती रहे, अस्याः એની इसकी, अपरा ઓર अपरा, प्रपन्ना न वा इति પડી અથવા નહિ गिर गई या नहीं, तस्या તેની उसकी, अपरा ઓર अपरा, न प्रपन्ना स्यात् चेत् ન પડી હોય તો न गिरी हो तो, अथ પછી फिर, अन्यतमा स्त्री કોઈ એક સ્ત્રી कोई एक स्त्री, एनाम् એને इसे, दक्षिणेन જમણા दाहिने, पाणिना હાથ વડે हाथसे, नाभेः નાભિના नाभिके, उपरिष्टात् ઉપરના ભાગમાં ऊपरके भागमे, बलवत् જોરથી जोरसे, निपीड्य દબાવીને दबाकर, सव्येन ડાબા बायें, पाणिना હાથ વડે हाथसे, पृष्ठतः પીઠથી पृष्ठसे, उपसगृह्य પકડીને पकड़ कर, ताम् તેને उसे, सुनिर्धूतम् ખૂબ હાલે તેમ अच्छी तरह हिले ऐसे, निर्धुनुयात् હલાવે हिलावे ।

41-(1) As soon as she has delivered, one of the attending women should make sure whether the placenta has come down or not. If the placenta has not come down, one of the attending women while firmly pressing down the patient's abdomen just above the navel with her right hand, should, taking hold of the patient's back by the left hand, shake her by the manipulation called "expression of placenta"

अथास्याः पार्ष्ण्या श्रोणीमाकोटयेत् । अस्याः स्फिचावुपसंगृह्य सुपीडितं पीडयेत् । अथास्या वालवेण्या कण्ठतालु परिमृशेत् । भूर्जपत्रकाचमणिसर्पनिर्मोकैश्चास्या योनिं धूपयेत् ।

अथ અને પછી और फिर, पार्ष्ण्या પાનીથી पार्ष्णिसे, अस्याः એની इसकी, श्रोणीम् શ્રોણીને श्रोणीको, आकोटयेत् દબાવવી दबावे, अस्या. એના इसके, स्फिचौ નિતંબોને नितंबोंको, उपसंगृह्य પકડીને पकड़ कर, सुपीडितम् ખૂબ દબાય તેમ अच्छी तरह दबे ऐसे, पीडयेत् દબાવવા दबावे, अथ પછી उसके बाद, बालवेण्या વાળની વેણીથી बालोंकी वेणीसे, अस्या એના इसके, कण्ठतालु ગળા અને તાળવાને गले और तालुको, परिमृशेत् સ્પર્શ કરવો स्पर्श करे, भूर्जपत्र- અને ભોજપત્ર और भोजपत्र, काचमणि- કાચ काच, सर्पनिर्मोकैः च અને સાપની કાંચળી વડે और सापकी केंचुलीसे, अस्याः એની इसकी, योनिम् યોનિને योनिको, धूपयेत् ધૂપ દેવો धूप देवे ।

41-(2). The patient's buttocks should be pressed by the heels and taking hold of her thighs, they should be compressed tightly. Her throat and palate should be tickled with her braid of hair Her vagina should be fumigated with the leaves of birch, quartz and the slough of a snake.

कुष्ठतालीसकल्कं बल्वजयूषे मैरेयसुरामण्डे तीक्ष्णे कौलत्थे वा यूषे मण्डूकपर्णीपिप्पलीसंपाके वा संप्लाव्य पाययेदेनाम् । तथा सूक्ष्मैलाकिलिमकुष्ठनागरविडङ्गपिप्पलीकालागुरुचव्यचित्रकोपकुञ्चिकाकल्कं खरवृषभस्य वा जीवतो दक्षिणं कर्णमुत्कृत्य दत्त्वा जर्जरीकृत्य बल्वजक्वाथादीनामाप्लावनानामन्यतमे प्रक्षिप्याप्लाव्य मुहूर्तस्थितमुद्धृत्य तदाप्लावनं पाययेदेनाम् ।

४१. पार्ष्ण्या–पादपार्ष्ण्या (ज. झ ब)
,, अस्याः–तस्या. (ब.)

४१ बल्वजयूषे–बल्वजक्वाथे (च. ब)
,, पिप्पलीसंपाके–पिप्पलीक्वाथे (च झ. प.)
,, चव्यचित्रक–पिप्पलीस्वर्जिकाक्षारचित्रक (प)
,, विडङ्गपिप्पली–विडगकालविड्(चव्य)पिप्पली (ड)
,, खरवृषभस्य वा जीवत –खरस्य वृषभस्य वा जरत (ध)
,, जीवत –जरत (ड त प)
,, बल्वजक्वाथादीनामाप्लावनानामन्यतमे–बल्वजयूषादीनामाप्लावनानामन्यतमस्मिन् (ध. फ.)
,, ,, –बल्वजयूषादीनामन्यतमे (ध)

बल्वजयूपे બલ્વજના યૂષમાં बल्वजके यूषमें, तीक्ष्णे તીક્ષ્ણ तीक्ष्ण, मैरेय- મૈરેય मैरेय, सुरामण्डे અને સુરાના મંડમાં और सुराके मण्डमें, कौलत्थे वा અથવા કળથીના अथवा कुलथीके, यूपे યૂષમાં यूषमें, मण्डूकपर्णी- અથવા ખડબ્રાહ્મી और खड़ब्राह्मी, पिप्पली- અને પીપરના और पिप्पलीके, संपाके वा ક્વાથમાં क्वाथमें, कुष्ठ- કઠ कूठ, तालीस- અને તાલીસપત્રના और तालीसपत्रके, कल्कम् કલ્કને कल्कको, संप्लाव्य ઘોળીને घोल कर, एनाम् એને उसे, पाययेत् પિવરાવવો पिलावे, तथा તથા तथा, सूक्ष्म-एला- નાની એલચી छोटी इलायची, किलिम- દેવદાર देवदारु, कुष्ठ- કઠ कूठ, नागर- સૂંઠ सोंठ, विडङ्ग- વાવડિંગ वायविडग, पिप्पली- પીપર पिप्पली, कालागुरु- કાળું અગર काला अगर, चव्य- ચવ્ય चव्य, चित्रक- ચિત્રક चित्रक, उपकुञ्चिका- અને કાળીજીરીના और कृष्णजीरकके, कल्कम् કલ્કને कल्कको, जीवत वा અથવા જીવતા अथवा जीवित, खरवृषभस्य મારેલા સાંઢના मस्त साडके, दक्षिणम् જમણા दाहिने, कर्णम् કાનને कर्णको, उत्कृत्य કાપીને काट कर, दृषदि પથ્થર પર पत्थर पर, जर्जरीकृत्य પીસીને पीस कर, बल्वजक्वाथादीनाम् બલ્વજ ક્વાથ આદિ बल्वज क्वाथ आदि, आप्लावनानाम् દ્રવોમાંના द्रवोंमेंसे, अन्यतमे કોઈ એક દ્રવમાં किसी एक द्रवमें, प्रक्षिप्य નાખીને डाल कर, आप्लाव्य ઘોળી मिला कर, मुहूर्तस्थितम् મુહૂર્તભર રાખી मुहूर्तभर रख कर, उद्धृत्य ગાળીને छान कर, तत् आप्लावनम् તે ઘોળ उस घोलको, एनाम् એને इसे, पाययेत् પિવરાવવો पिला देवे।

41-(3) The paste of costus and himalayan silver fir diluted with the decoction of balvaja or with the scum of maireya and sura wines, or with the strong decoction of horse-gram or with the decoction of indian pennywort and long pepper, should be administered to her orally. Similarly the paste of small cardamoms, deodar, costus, ginger, embelia, long pepper, black eagle wood, piper chaba, white-flowered leadwort and black cumin or slicing off the right ear of a live fierce bull, and having mashed it up in a stone mortar and having soaked it for a while by placing it in any of the solutions of balvaja group of decoctives etc, it should be removed and the decanted solution administered orally.

शतपुष्पाकुष्ठमदनहिङ्गुसिद्धस्य चैनां तैलस्य पिचुं ग्राहयेत्। अतश्चैवानुवासयेत्। एतैरेव चाप्लावनैः फलजीमूतेक्ष्वाकुधामार्गवकुटजकृतवेधनहस्तिपिप्पल्युपहितैरास्थापयेत्। तदास्थापनमस्याः सह वातमूत्रपुरीषैर्निर्हरत्यपरामासक्तां वायोरेवाप्रतिलोमगत्वात्। अपरां हि वातमूत्रपुरीषाण्यन्यानि चान्तर्बहिर्मार्गाणि सज्जन्ति ॥ ४१ ॥

शतपुष्पा- શતપુષ્પા शतपुष्पा, कुष्ठ- કઠ कूठ, मदन- મીંઢળ मैनफल, हिङ्गु- અને હિંગથી और हींगसे, सिद्धस्य સિદ્ધ કરેલા सिद्ध किये हुए, तैलस्य તેલનું तैलका, पिचुम् પોતુ पिचु, एनाम् એને इसे, ग्राहयेत् ગ્રહણ કરાવવું ग्रहण करावे, अतः च एव અને એમાંથી જ और इसीमेंसे, अनुवासयेत् એને અનુવાસન આપવુ इसे अनुवासन देवे, एतैः एव च અને એ જ और इन्हीं, आप्लावनैः દ્રવોથી द्रवोंसे, फल- મીંઢળ मैनफल, जीमूत- કુકડવેલ बन्दाल, इक्ष्वाकु- કડવી તુંબડી कटु तुम्बी, धामार्गव- કડવાં ગલકાં धामार्गव, कुटज- કડાછાલ कुडा, कृतवेधन- કડવાં તૂરિયાં कडवी तोरई, हस्तिपिप्ली- અને ગજપીપરથી और गजपिप्पलीसे, उपहितैः યુક્ત युक्त, एतैः एव એ જ इन्हीं, आप्लावनैः દ્રવોથી द्रवोंसे, आस्थापयेत् આસ્થાપન દેવુ

४१ °जीमूत–°जीमूतक (त.)
,, हस्तिपिप्पली–हस्तिपर्णी (त. प)
,, अप्रतिलोमगत्वात्–अनुलोमगत्वात् (च.)
,, वायोरेवाप्रतिलोमगत्वात्–वायोरनुलोमगमनात् (व ह्र. ध.)
,, चान्तर्बहिर्मार्गाणि–चान्तर्बहिर्गमनशीलानि (व ज)
,, ,, –चान्तर्बहिर्मुखानि (ध. फ)
,, ,, चान्तर्बहिर्मागानि (फ.)

आस्थापन दे, तद् आस्थापनम् ते આસ્થાપન वह आस्थापन, वायो વાયુને वायुको, अप्रतिलोमगत्वात् एव અનુલોમ હોવાથી જ અર્થાત્ અનુલોમ કરતો જ अनुलोम होनेसे अर्थात् अनुलोम करते ही, वातमूत्रपुरीषैः વાયુ, મૂત્ર અને પુરીષ वायु, मूत्र और पुरीषके, सह સાથે साथ, आसक्ताम् ચોટી રહેલી लगी हुई, अपराम् અપરાને अपराको, निर्हरति બહાર કાઢે છે बाहिर लाता है, हि કારણકે क्योंकि, वातमूत्रपुरीषाणि વાયુ- મૂત્ર- મળ वायु-मूत्र- मल, अन्यानि च અને બીજા પણ और अन्य भी, बहिर्मार्गाणि બહાર નીકળનારાં बाहर निकलनेवाले, अपराम् અપરાના अपराके, अन्तः અંદરના ભાગમાં अन्दरके भागमें, सज्जन्ति ચોટેલાં હોય છે लगे हुए रहते है ॥ ४१ ॥

41. A swab soaked in the oil prepared of dill, costus, emetic nut, and asafetida should be inserted in the vagina. This very oil should be used as an enema, too. A corrective enema prepared of the above solutions with emetic nut, bristly luffa, bottle gourd, sponge gourd, kurchi, bitter luffa and elephant pepper should be given This enema by regulating the peristaltic movement of vata, will, while expelling flatus, urine and feces, effect the expulsion of the delayed after-birth. The flatus, urine, feces and other excreta which normally tend to go outwards stick to the placenta inside and obstruct it.

जातमात्रस्य कुमारस्य कार्याणि कर्माणि—

तस्यास्तु खल्वपरायाः प्रपतनार्थे कर्मणि क्रियमाणे जातमात्रस्यैव कुमारस्य कार्याण्येतानि कर्माणि भवन्ति;

तस्या तु खलु તેની उसकी, अपराया. ઓરને अपराको, प्रपतनार्थे પાડવા માટે गिरानेके लिए, कर्मणि क्रियमाणे ક્રિયા ચાલતી હોય તે સમયે क्रिया हो रही हो उसी समय, जातमात्रस्य एव તરત જન્મેલા तुरन्त जन्मे हुए, कुमारस्य કુમારને માટે कुमारके लिए, एतानि આ ये, कर्माणि કર્મ कर्म, कार्याणि भवन्ति કરવાનાં હોય છે करने योग्य होते है,

42-(1) On completing the procedure for the delivery of the after-birth, these are the measures to be carried out for the new-born child:

तद्यथा—अश्मनोः संघट्टनं कर्णयोर्मूले, शीतोदकेनोष्णोदकेन वा मुखपरिषेकः, तथा स क्लेशविहतान् प्राणान् पुनर्लभेत। कृष्णकपालिकाशूर्पेण चैनमभिनिष्पुणीयुर्यद्यचेष्टः स्याद् यावत् प्राणानां प्रत्यागमनम् (तत्तत् सर्वमेव कार्यम्)। ततः प्रत्यागतप्राणं प्रकृतिभूतमभिसमीक्ष्य स्नानोदकग्रहणाभ्यामुपपादयेत् ॥ ४२ ॥

तद् यथा જેમકે जैसे, कर्णयो. બન્ને કાનનાં दोनों कानके, मूले મૂળમાં मूलमें, अश्मनोः બે પથ્થર दो पत्थरोंका, संघट्टनम् પરસ્પર અથડાવવા आपसमें टकराना, शीतोदकेन શીતળ જળ વડે शीत जलसे, उष्णोदकेन वा અથવા ગરમ જળ વડે अथवा गरम जलसे, मुखपरिषेक· મુખ ઉપર સિંચન કરવુ मुँह पर छींटे देना, तथा એમ કરવાથી ऐसा करनेसे, सः તે वह, क्लेश- ક્લેશથી क्लेशसे, विहतान् મૂર્છિત થયેલા विकल हुए, प्राणान् પ્રાણોને प्राणोंको, पुन. ફરીથી फिरसे, लभेत પ્રાપ્ત કરે છે प्राप्त करता है, यदि એમ કરતાં પણ જો ऐसा करने पर भी यदि, अचेष्टः स्यात् ચેષ્ટા પ્રાપ્ત ન કરે તો चेष्टा प्राप्त न हो तो, प्राणानाम् પ્રાણો प्राण, प्रत्यागमनम् यावत् પાછા આવે ત્યાં સુધી फिरसे प्राप्त करे तब तक, एनम् એને इसको, कृष्णकपालिका-शूर्पेण સરખટની સળીઓના સૂપડા વડે सरकण्डोंसे बने हुए शूर्पसे, अभिनिष्पुणीयु. પવન નાખતાં રહેવુ वायु

४२ मुखपरिषेक –मुखे परिषेक. (च)
,, ,, –मुखपरिषेक (ग. द. फ.)
,, ,, –मुखेन परिषेक (क.)
,, अभिनिष्पुणीयुः–अभिनिष्पुणीयात (त.)

करते रहना चाहिए, (तत् तत् તે તે वह वह), सर्वम् एव બધું જ सभी, कार्यम् કરવુ જોઈએ करना चाहिए, ततः તે પછી उसके बाद, प्रत्यागतप्राणम् ચેતનયુક્ત થયેલા તેને चेतनाको प्राप्त हुए उसको, प्रकृतिभूतम् સ્વસ્થ स्वस्थ, अभिसमीक्ष्य જોઈને देख कर, स्नान- સ્નાન स्नान, उदकग्रहणाभ्याम् અને મળમાર્ગની શુદ્ધિ और मलमार्गकी शुद्धि, उपपादयेत्, કરાવવાં જોઈએ करवाना चाहिए ॥४२॥

42 They are —the striking of stones near the child's ear and the dashing of cold and warm water in the child's face. By these means the child regains the life-breath which was afflicted by the birth process. If it fails to revive by these methods, the child should be fanned with a winnowing basket made of reeds until respiration is established. All these measures should be carried out. Then finding the child fully revived, and naturally breathing, the toilet of the infant should be performed.

अथास्य ताल्वोष्ठकण्ठजिह्वाप्रमार्जनमारभेताङ्गुल्या सुपरिलिखितनखया सुप्रक्षालितोपधानकार्पासपिचुमत्या। प्रथमं प्रमार्जितास्यस्य चास्य शिरस्तालु कार्पासपिचुना स्नेहगर्भेण प्रतिसंछादयेत्। ततोऽस्यानन्तरं सैन्धवोपहितेन सर्पिषा कार्यं प्रच्छर्दनम् ॥ ४३ ॥

अथ તે પછી उसके बाद, सुपरिलिखित-नखया સારી રીતે કાપેલા નખવાળી अच्छी तरह काटे हुए नखवाली, सुप्रक्षालित- સારીપેઠે ધોએલ अच्छी तरह धुले हुए, उपधान- કોમળ આવરણવાળી कोमल आवरणसे युक्त, कार्पासपिचुमत्या અને રૂ વીંટાળેલી और रुई लपेटी हुई, अङ्गुल्या આંગળી વડે अंगुलीसे, अस्य એના उसके, तालु- તાળવુ तालु, ओष्ठ- હોઠ ओष्ठ, कण्ठ- કંઠ कण्ठ, जिह्वा- અને જીભની और जीभका, परिमार्जनम् સાફસુફી शोधन, आरभेत શરૂ કરવી જોઈએ प्रारंभ करना चाहिए, प्रथमम् પ્રથમ प्रथम, प्रमार्जित-आस्यस्य च મુખશુદ્ધિ કર્યા બાદ मुखशुद्धि करनेके बाद, अस्य એનુ इसके, शिरस्तालु બ્રહ્મરન્ધ્ર ब्रह्मरन्ध्रको, स्नेहगर्भेण સ્નેહપૂર્ણ स्नेहपूर्ण, कार्पासपिचुना રૂના પોતાથી रुईके फायेसे, प्रतिसंछादयेत् ઢાંકવુ જોઈએ ढाप देना चाहिए, ततः अनन्तरम् ત્યાર પછી उसके बाद, सैन्धव-उपहितेन સિંધવમિશ્રિત सिंधवमिश्रित, सर्पिषा ઘીથી घीसे, अस्य એને इसे, प्रच्छर्दनम् વમન वमन, कार्यम् કરાવવું જોઈએ कराना चाहिए ॥ ४३ ॥

43 This must commence with removing the mucus from the palate, lips, throat and tongue by using the fore-finger, which has been previously well manicured, and wound round with a well-washed swab of cotton. Having thus first wiped off the mucus, the child's head and palate should be rubbed with a cotton swab containing unctuous substance. Thereafter the emesis of the infant should be effected by a dose of ghee mixed with rock-salt

बालस्य नाडीकल्पनविधि.—

ततः कल्पनं नाड्याः। अतस्तस्याः कल्पनविधिमुपदेक्ष्यामः—

ततः તે પછી उसके बाद, नाड्या નાળનુ नालका, कल्पनम् છેદન કરવુ छेदन करना चाहिए, अतः આથી इस कारणसे, तस्या તેની उसकी, कल्पनविधिम् છેદનવિધિ छेदनविधिको, उपदेक्ष्यामः કહેશુ कहेंगे,

44-(1). Thereafter should be done the ligature and clipping of the cord We shall now lay down the instructions concerning the ligature and clipping.

४३ °प्रमार्जन—°मार्जन (च.)
,, उपधान—उपधानया (छ.)
,, प्रतिसंछादयेत्—पतिच्छादयेत् (क. ब.)

नाभिबन्धनात् प्रभृत्यष्टाङ्गुलमभिज्ञानं कृत्वा छेदनावकाशस्य द्वयोरन्तरयोः शनैर्गृहीत्वा तीक्ष्णेन रौक्मराजतायसानां छेदनानामन्यतमेनार्धधारेण छेदयेत्। तामग्रे सूत्रेणोपनिबध्य कण्ठेऽस्य शिथिलमवसृजेत्।

नाभिबन्धनात् નાભિબંધનથી नाभिबन्धनसे, प्रभृति માંડી ले कर, अष्टाङ्गुलम् આઠ આંગળ પર आठ अगुल पर छेदनावकाशस्य કાપવાના સ્થાન પર काटनेके स्थान पर, अभिज्ञानम् નિશાની चिह्न, कृत्वा કરી करके, द्वयो નાળને બન્ને नालको दोनों, अन्तरयो છેડાથી ओरसे, शनैः ધીમેથી धीरेसे, गृहीत्वा પકડીને पकड़ कर, रौक्म- સુવર્ણના सुवर्णके, राजत- રૂપાનાં चादीके, आयसानाम् અને લોઢાનાં और लोहेके, छेदनानाम् શસ્ત્રોમાંના शस्त्रोंमेंसे, अन्यतमेन કોઈ એક किसी एक, तीक्ष्णेन તીક્ષ્ણ तीक्ष्ण, अर्धधारेण અર્ધધાર શસ્ત્ર વડે अर्धधार शस्त्रसे, छेदयेत् કાપવી काटना चाहिए, अग्रे અગ્રભાગમાં अग्रभागमें, ताम् તેને उसे, सूत्रेण સૂત્રથી सूत्रसे, उपनिबध्य મજબૂત બાંધી जोरसे बाध कर, अस्य कण्ठे એના ગળામાં इसके गलेमें, शिथिलम् ઢીલી રહે તેમ शिथिल रख कर, अवसृजेत् લટકાવી દેવી लटका देना चाहिए।

44-(2) Measure out a length of eight fingers on the cord beginning with the root of the navel and carefully taking hold of the cord on either side of the mark, sever it with a sharp knife called "Ardha-dhara" made either of gold or silver or steel. Then having quickly tied a string to the stump, throw it loosely round the neck of the child

तस्य चेन्नाभिः पच्येत, तां लोध्रमधुकप्रियङ्गुसुरदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यज्यात्, एषामेव तैलौषधानां चूर्णेनावचूर्णयेत्। इति नाडीकल्पनविधिरुक्तः सम्यक् ॥४४॥

तस्य તેની उसकी, नाभि નાભિ नाभि, पच्येत चेत् પાકી આવે તો पक जाय तो, ताम् તેને उसको, लोध्र- લોધ્ર लोध्र, मधुक- જેઠીમધ मुलहठी, प्रियङ्गु- પ્રિયંગુ प्रियगु, सुरदारु દેવદાર देवदारु हरिद्रा- અને હળદરના और हल्दीके, कल्क- કલ્કથી कल्कसे, सिद्धेन પકાવેલા पकाये हुए, तैलेन તેલવડે तैलसे, अभ्यज्यात् અભ્યંગ કરવો अभ्यंग करना चाहिए, एषाम् एव અને એ જ और इन्हीं, तैलौषधाना તેલનાં ઔષધોનુ तैलके औषधोंको, चूर्णेन ચૂર્ણ चूर्ण, अवचूर्णयेत् ભભરાવવુ छिड़क देवे, इति આ પ્રમાણે इस प्रकार, नाडीकल्पनविधिः નાળ છેદવાનો વિધિ नाल काटनेकी विधि, सम्यक् સારી રીતે अच्छी तरह, उक्तः કહી દીધો છે कह दी है ॥४४॥

44. If the navel shows signs of suppuration, smear it with oil boiled with the paste of lodh, liquorice, perfumed cherry, turmeric and indian berberry. The navel should also be dusted with the powder of these herbs. Thus has been laid down the correct procedure with regard to the ligature and clipping of the umbilical cord

नाड्या असम्यक्छेदे दोषास्तच्चिकित्सा च—

असम्यक्कल्पने हि नाड्या आयामव्यायामोत्तुण्डिता-पिण्डलिका-विनामिका-विजृम्भिकाबाधेभ्यो भयम्। तत्राविदाहिभिर्वातपित्तप्रशमनैरभ्यङ्गोत्सादनपरिषेकैः सर्पिर्भिश्चोपक्रमेत गुरुलाघवमभिसमीक्ष्य ॥४५॥

४४ प्रभृत्यष्टाङ्गुलम्—हित्वाष्टाङ्गुलम् (फ.)
,, ,, —मित्वाष्टाङ्गुलम् (फ.)
,, द्वयोरन्तरयो· शनैर्गृहीत्वा—द्वयोरन्तरयो शनैर्ग्राहयित्वा (ढ)
,, अर्धधारेण—ऊर्ध्वधारेण (द ध.)

४४ सुरदारु—देवदारु (ध.)
,, ,, —दारु (क च.)
,, इति—एव· (ध)
४५ अभिममीक्ष्य—अभिसमीक्ष्य कुमारस्य (च.)

नाड्याः નાળના नालके, असम्यक्-कल्पने हि विषम-छेदनमां विषमछेदनमें, आयाम- લંબાઈ आयाम, व्यायाम પહોળાઈયુક્ત व्यायामसे युक्त, उत्तुण्डिता- ઊંચી આવેલ उत्तुण्डिता, पिण्डलिका- પિંડલિકા पिण्डलिका, विनामिका- વિનામિકા विनामिका, विजृम्भिका-અને વિજૃમ્ભિકા और विजृम्भिका, आबाधेभ्यः એ વિકારોનો इन विकारोंका, भयम् ભય છે भय है, तत्र તે બાબતમાં उस विषयमें, गुरुलाघवम् ગુરુતા તથા લઘુતાને गुरुता तथा लघुताको, अभिसमीक्ष्य વિચાર કરીને विचार करके, अविदाहिभिः અવિદાહી अविदाही, वातपित्त-प्रशमनैः વાતપિત્તપ્રશામક वातपित्तप्रशामक, अभ्यङ्ग- અભ્યંગ अभ्यङ्ग, उत्सादन- ઉત્સાદન उत्सादन, परिषेकैः પરિષેક परिषेक, सर्पिभिः च અને ઘી વડે और घृतों द्वारा, उपक्रमेत ચિકિત્સા કરવી જોઈએ चिकित्सा करनी चाहिए ॥४५॥

45 If the clipping of the cord has not been properly done, it may give rise to such affections as are extensive and elevated, Pinda-lika, Vinamika and Vijrimbhika In dealing with such disorders, the treatment should consist of oil-rubbing and spraying with medicaments and with medicated ghee that do not cause inflammation and that allay vata and pitta, having taken into consideration the gravity or lightness of the disorder.

कुमारस्य जातकर्मविधि —

अतोऽनन्तरं जातकर्म कुमारस्य कार्यम् । तद्यथा—मधुसर्पिषी मन्त्रोपमन्त्रिते यथाम्नायं प्रथमं प्राशितुं दद्यात् । स्तनमत ऊर्ध्वमेतेनैव विधिना दक्षिणं पातुं पुरस्तात् प्रयच्छेत् । अथातः शीर्षतः स्थापयेदुदकुम्भं मन्त्रोपमन्त्रितम् ॥४६॥

अतः अनन्तरम् આ પછી इसके बाद, कुमारस्य કુમારનું कुमारका, जातकर्म જાતકર્મ जातकर्म, कार्यम् કરવું જોઈએ करना चाहिए, तत् यथा જેમકે जैसे, प्रथमम् પહેલાં प्रथम, यथाम्नायम् શાસ્ત્રાનુસાર शास्त्रानुसार, मन्त्र-उपमन्त्रिते મન્ત્રોથી મંતરેલાં मन्त्रोंसे अभिमन्त्रित, मधुसर्पिषी મધ તથા ઘી मधु तथा घृत, प्राशितुम् પ્રાશન કરવા માટે प्राशन करनेके लिए, दद्यात् આપવાં देने चाहिएं, अतः ऊर्ध्वम् એ પછી इसके बाद, एतेन एव એ જ इसी, विधिना વિધિ પ્રમાણે विधि अनुसार, पुरस्तात् પ્રથમ प्रथम, दक्षिणम् જમણા दाहिने, स्तनम् સ્તનને स्तनको, पातुं પીવા માટે पीनेके लिए, प्रयच्छेत् આપવું देवे, अथ अतः એ પછી इसके बाद, मन्त्रोपमन्त्रितम् મન્ત્રથી મંતરેલા मन्त्रोंसे अभिमन्त्रित, उदकुम्भम् જળકુંભનું जलकुम्भको शीर्षतः એના માથા આગળ इसके मस्तककी ओर, स्थापयेत् સ્થાપન કરવું स्थापन करे ॥४६॥

46. Thereafter the infant's birth-rites should be performed. This is the procedure The child should first of all be fed with honey and ghee that have been sanctified with the utterings of appropriate scriptural texts There after in the same manner, the child should be suckled at the right breast first After this a water-pot, sanctified with the uttering of scriptural texts, should be placed near the head of the infant

कुमारस्य रक्षाविधिः —

अथास्य रक्षां विदध्यात्—आदानीखदिरकर्कन्धुपीलुपरूषकशाखाभिरस्या गृहं समन्ततः परिवारयेत् । सर्वतश्च सूतिकागारस्य सर्षपातसीतण्डुलकणकणिकाः प्रकिरेयुः । तथा तण्डुलबलिहोमः सततमुभयकालं क्रियेतानामकर्मणः ।

४६ अतोऽनन्तर—ततोऽनन्तर (ध)
,, यथाम्नाय—यथान्याय (ग)
,, अथात—अथास्य (ध)

४७. गृह—गृहं भिषक् (ड त.)
,, प्रकिरेयु.—प्रकिरेत् (च.)
,, उभयकाल—उभयतःकालम् (ष. ध)
,, क्रियेतानामकर्मणः—क्रियेत प्राङ् नामकर्मण (च. ष.)

द्वारे च मुसलं देहलीमनु तिरश्चीनं न्यसेत्। वचाकुष्ठक्षौमकहिङ्गुसर्षपातसीलशुनकणकणिकानां रक्षोघ्नसमाख्यातानां चौषधीनां पोट्टलिका बद्ध्वा सूतिकागारस्योत्तरदेहल्यामवसृजेत्, तथा सूतिकाया कण्ठे सपुत्रायाः, स्थाल्युदककुम्भपर्यङ्केष्वपि, तथैव च द्वयोर्द्वारपक्षयोः। कणककण्टकेन्धनवानग्निस्तिन्दुककाष्ठेन्धनश्चाग्निः सूतिकागारस्याभ्यन्तरतो नित्यं स्यात्।

अथ પછી इसके बाद, अस्य એની इसकी, रक्षाम् રક્ષાવિધિ रक्षाविधि विदध्यात् કરવી करनी चाहिए, आदानी- આદાની आदानी, खदिर- ખેર खैर, कर्कन्धु- બોરડી बेर, पीलु- પીલુ पीलु, परूषक- અને ફાલસાની और फालसेकी, शाखाभिः શાખાએ વડે शाखाओंसे, अस्याः એ સૂતિકાના इस सूतिकाके, गृहम् ઘરને घरको, समन्तत ચારે બાજુએથી चारों ओरसे, परिवारयेत् ઘેરી લેવુ घेर लेवे, सूतिकागारस्य સૂતિકાગૃહની सूतिकागृहके, सर्वत च બધી બાજુએ चारों ओर, सर्षप- સરસવ सरसों, अतसी- અળસી अलसी, तण्डुल- અને ચોખા और चावल, कणकणिका. એઓના કણ અને કણુકી इनके कण और कणिका, प्रकिरेयुः છાંટવાં छिड़क देवे, तथा તથા तथा, आनामकर्मण નામકર્મ પર્યંત नामकर्म पर्यन्त, सततम् દરરોજ लगातार, उभयकालम् બન્ને વખત दोनो समय, तण्डुल-बलि- ચોખાના બળિનો चावलकी वलिका, होम હોમ हवन, क्रियेत કરવો किया जाय, द्वारे च અને બારણામાં और दरवाजेमें, देहलीम् अनु ઉબરા પાસે देहलीके पास, मुसलम् મુસળને मुसलको, तिरश्चीनम् ત્રાંસુ तिरछा, न्यसेत् રાખવુ रख देवे, वचा- વજ वच, कुष्ठ- કઠ कूठ, क्षौमक- ક્ષૌમક क्षौमक, हिङ्गु- હિંગ हीग, सर्षप- સરસવ सरसों, अतसी- અળસી अलसी, लशुन- અને લસણ और लहसुन, कणकणिकानाम् એઓના કણ તથા કણુકીઓની इनके कण और कणिकाओकी, रक्षोघ्नसमाख्यातानाम् च તેમજ રક્ષોઘ્ન તરીકે કહેલી एव रक्षोघ्न वर्गमें वताई हुई, ओषधीनाम् ઓષધિઓની ओषधियोंकी, पोट्टलिकाम् પોટલી पोटली, बद्ध्वा બાંધીને बाध कर, सूतिकागारस्य સૂતિકાગૃહના सूतिकागृहकी, उत्तरदेहल्याम् ઉબરાની ઉપરની બાજુએ देहलीमे ऊपरकी ओर, अवसृजेत् લટકાવવી लटका देवे, तथा તથા तथा, सपुत्रायाः પુત્રસહિત पुत्रसहित, सूतिकाया સૂતિકાના सूतिकाके, कण्ठे કંઠમાં कण्ठमें, स्थाली- પાત્ર पात्र, उदकुम्भ- જળકુંભ जलकुम, पर्यङ्केषु अपि અને પલંગ પર પણ और पलंग पर भी, तथा एव તેવી જ રીતે उसी प्रकार, द्वयोः બન્ને दोनों, द्वारपक्षयोः च દરવાજાના પડખાંઓમાં પોટલી લટકાવવી किंवाडोंमें पोटलीको लटका देवे, कणक- કણક कणक, कण्टक- અને કાંટાનાં और कांटोंके, इन्धनवान् બળતણવાળો इन्धनवाला, अग्निः અગ્નિ अग्नि, तिन्दुक- અને તિન્દુકનાં और तिन्दुकके, काष्ठेन्धन લાકડાંના બળતણનો काष्ठके इन्धनवाला, अग्नि च અગ્નિ अग्नि, सूतिकागारस्य સૂતિકાગૃહની सूतिकागृहके, अभ्यन्तरत અંદરના ભાગમાં भीतरके भागमें, नित्यं स्यात् નિત્ય હોવો જોઈએ नित्य रहना चाहिए।

47-(1) Next the following protective measures should be taken Clipped branches of bitter luffa, catechu, wild jujube, trooth-brush tree and sweet falsah should be placed all round the dwelling house The lying in room should be bestrewed all over with rape-seed, linseed and whole and broken grains of rice Likewise, the sacrifice of rice-offerings should be performed regularly twice a day till the day of the naming ceremony At the entrance, a pounding club should be laid parallel to the threshold Sweet flag, costus, angelica, asafetida, rape-seed, linseed, garlic, kana and kanika and drugs which are reputed to ward off the evil spirits should be tied into packets and suspended from the top

४७ न्यसेत्–न्यस्त कुर्यात् (घ ज)

,, अतसीलशुन°–अनसी° (ब)

the top beam of the door-frame of the lying-in room. Likewise, these packets should be hung round the neck of the new mother, as also round that of the son; packets should also be placed in the cooking vessels, the water-pots and the couch, as well as at both sides of the entrance. Moreover within the lying-in room there should always be a fire kept burning with the thorns of fragrant poon and the wood of the false mangosteen.

स्त्रियश्चैनां यथोक्तगुणाः सुहृदश्चानुजागृयुर्दशाहं द्वादशाहं वा। अनुपरतप्रदानमङ्गलाशीःस्तुतिगीतवादित्रमन्नपानविशदमनुरक्तप्रहृष्टजन - संपूर्णं च तद्वेश्म कार्यम्। ब्राह्मणश्चाथर्ववेदवित् सततमुभयकाल शान्ति जुहुयात् स्वस्त्ययनार्थं कुमारस्य तथा सूतिकायाः। इत्येतद्रक्षाविधानमुक्तम् ॥ ४७ ॥

यथोक्तगुणाः કહેલ ગુણોવાળી कहे हुए गुणोंवाली, स्त्रिय. च સ્ત્રીઓ स्त्रियाँ, सुहृदः च અને સુહૃજ્જનોએ और सुहृज्जनोंको, दशाहम् દશ દિવસ दस दिन, द्वादशाहम् वा અથવા બાર દિવસ अथवा बारह दिन, अनुजागृयुः તેની પાસે જાગતાં રહેવું જોઈએ उसके पास जागते रहना चाहिए, अनुपरत- સતત लगातार, प्रदान- દાન दान, मङ्गल- મંગળ मगल, आशी- આશીર્વાદ आशीर्वाद, स्तुति- સ્તુતિ स्तुति, गीत- ગીત गीत, वादित्रम् વાદ્ય वाद्य, अन्नपान- તથા અન્નપાનવાળું तथा अन्नपानसे युक्त, विशदम् પવિત્ર पवित्र, अनुरक्त- અને પ્રેમાળ और प्रेमी, प्रहृष्ट- તેમજ પ્રસન્ન एवं प्रसन्न, जनसंपूर्णम् च મનુષ્યોથી ભરપૂર जनोंसे परिपूर्ण, तत् वेश्म તે ઘરને उस घरको, कार्यम् કરવું જોઈએ करना चाहिए, कुमारस्य કુમારના कुमारके, तथा તથા तथा, सूतिकायाः સુવાવડીના सूतिकाके, स्वस्त्ययनार्थम् કલ્યાણ માટે कल्याणार्थ, अथर्ववेदवित् અથર્વવેદને જાણનાર अथर्ववेदको जाननेवाला, ब्राह्मणः બ્રાહ્મણ ब्राह्मण, सततम् નિરન્તર निरन्तर, उभयकालम् બન્ને વખત दोनों समय, शान्तिम् जुहुयात् શાન્તિહોમ કરવો शान्तिहवन करे, इति એ પ્રમાણે इस प्रकार, एतत् આ यह, रक्षाविधानम् રક્ષાવિધાન रक्षाविधान, उक्तम् કહ્યું છે कहा है ॥ ४७ ॥

47. Also the women possessed of qualities mentioned earlier and who are well-wishers, should keep vigil by the lying-in woman for ten or twelve days. There should be incessant alms-giving, sounds of auspicious blessings, praise, song and of musical instruments in the house and it should be gay with feasting and drinking and filled with well-disposed and rejoicing crowds. A brahmana who is a knower of the Atharvaveda, should regularly offer peace-offerings to the fire, twice daily, for securing the welfare of both the child and the mother. Thus have been described the protective measures.

सूतिकाया दशदिवसावध्युपचारः—

सूतिकां तु खलु बुभुक्षितां विदित्वा स्नेहं पाययेत परमया शक्त्या सर्पिस्तैलं वसां मज्जानं वा सात्म्यीभावमभिसमीक्ष्य पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरचूर्णसहितम्। स्नेहं पीतवत्याश्च सर्पिस्तैलाभ्यामभ्यज्य वेष्टयेदुदरं महताऽच्छेन वाससा; तथा तस्या न वायुरुदरे विकृतिमुत्पादयत्यनवकाशत्वात्।

सूतिकाम् तु खलु સૂતિકાને सूतिकाको, बुभुक्षिताम् ભૂખી भूखी, विदित्वा જાણીને जान कर, सात्म्यीभावम् સાત્મ્ય થવાનો सात्म्य होनेका, अभिसमीक्ष्य વિચાર કરી विचार करके, पिप्पली- પીપર पिप्पली, पिप्पलीमूल- પીપરીમૂળ पिप्पलीमूल, चव्य- ચવ્ય चव्य, चित्रक-

४८ पाययेत–पाग्रयेत प्रथम (घ)
,, महताऽच्छेन–महना (ख. घ च)

ચિત્રક चित्रक, शृङ्गवेर- અને સૂંઠના और सोंठके, चूर्णसहितम् ચૂર્ણ સાથે चूर्णके साथ, सर्पि. ઘી घी, तैलम् તેલ तैल, वसाम् વસા वसा, मज्जानम् वा અથવા મજ્જારૂપ अथवा मज्जारूप, स्नेहम् સ્નેહને स्नेहको, परमया પરમ परम, शक्त्या શક્તિ અનુસાર शक्ति के अनुसार, पाययेत પિવરાવવો पिलावे, स्नेहम् સ્નેહ स्नेह, पीतवत्या च પીધા પછી पीनेके बाद, उदरम् ઉદર પર उदर पर, सर्पिस्तैलाभ्याम् ઘી અને તેલ घी और तैल, अभ्यज्य લગાવી लगा कर, महता મોટું बड़े, अच्छेन તથા નિર્મળ तथा निर्मल, वाससा વસ્ત્ર वस्त्रसे, उदरम् પેટ પર पेटको, वेष्टयेत् વીંટાળવું लपेटना चाहिए, तथा એમ કરવાથી ऐसा करनेसे, अनवकाशत्वात् અવકાશ ન મળવાથી अवकाश न मिलनेसे, वायु વાયુ वायु, तस्या તેના उसके, उदरे ઉદરમાં उदरमें, विकृतिम् વિકાર विकार, न उत्पादयति ઉત્પન્ન કરતો નથી उत्पन्न नहीं करता ।

48-(1) Finding the new mother hungry, she should, if endowed with a strong constitution, be made to drink unctuous beverages consisting of ghee or til oil, flesh-marrow or bone-morrow, whichever is found to be suitable, mixed with the powder of long pepper, roots of long pepper, piper chaba, white-flowered leadwort and ginger. After she has drunk the oily potion, her abdomen should be anointed with ghee and til oil and wrapped round tightly with a large piece of white cloth, thereby the vata in her stomach will not be able to produce disorders, being given no room.

जीर्णे तु स्नेहे पिप्पल्यादिभिरेव सिद्धां यवागूं सुस्निग्धां द्रवां मात्रशः पाययेत्। उभयतःकालं चोष्णोदकेन च परिषेचयेत् प्राक् स्नेहयवागूपानाभ्याम्। एवं पञ्चरात्रं सप्तरात्रं वाऽनुपाल्य क्रमेणाप्याययेत्। स्वस्थवृत्तमेतावत् सूतिकायाः ॥४८॥

स्नेहे जीर्णे तु અને સ્નેહ પચી ગયા પછી और स्नेह पच जाने पर, पिप्पल्यादिभि· एव પિપ્પલ્યાદિ ગણથી पिप्पल्यादि गणसे, सिद्धाम् સિદ્ધ કરેલી सिद्ध की हुई, सुस्निग्धाम् બહુ સ્નિગ્ધ बहुत स्नेहसे युक्त, द्रवाम् પાતળી पतली, यवागूम् યવાગૂ यवागू, मात्रशः માત્રાનુસાર मात्रानुसार, पाययेत् પિવરાવવી पिलावे, स्नेह-यवागू- સ્નેહ અને યવાગૂ स्नेह और यवागू, पानाभ्याम् प्राक् પીતાં પહેલાં पीनेसे पूर्व, उभयतः कालम् च બન્ને વખત दोनों समय, उष्णोदकेन તેને ગરમ જળ વડે उसे गरम जल द्वारा, परिषेचयेत् પરિષેચન કરવુ परिषेचन करना चाहिए, एवम् એ પ્રમાણે इस तरह, पञ्चरात्रम् પાંચ રાત્રિ पांच रात्रि, सप्तरात्रम् वा અથવા સાત રાત્રિ अथवा सात रात्रि तक, अनुपाल्य ચાલુ રાખી जारी रख कर, क्रमेण ક્રમથી क्रमसे, आप्याययेत् પ્રસૂતાનાં શરીર તથા બળને પૂર્ણ કરવાં प्रसूताके शरीर तथा बलको पूर्ण करना चाहिए, एतावत् આટલુ इतना, सूतिकायाः સૂતિકા માટે सूतिकाके लिए, स्वस्थवृत्तम् સ્વસ્થવૃત્ત છે स्वस्थवृत्त है ॥ ४८ ॥

48. After the oily potion has been digested, she should be made to drink medicated gruel with long pepper etc, mentioned above and well-seasoned with unctuous substances and also rendered thin, according to the prescribed dose. At both the times, i e immediately before drinking the oily potion and the gruel, she should be sprinkled over with warm water. Having observed this regimen for five or seven nights, the mother should be gradually nourished Thus far has been described the regimen of the lying-in woman in health.

---

४८ °काल–°कालमच्छेन (व त)
,, मात्रश –मात्राश. (ध)
,, ,, –मात्रा (ध.)

तस्यास्तु खलु यो व्याधिरुत्पद्यते स कृच्छ्रसाध्यो भवत्यसाध्यो वा, गर्भवृद्धिक्षयितशिथिलसर्वधातुत्वात्, प्रवाहणवेदनाक्लेदनरक्तनिःस्रुतिविशेषशून्यशरीरत्वाच्च; तस्मात्तां यथोक्तेन विधिनोपचरेत्; भौतिकजीवनीयबृंहणीयमधुरवातहरसिद्धैरभ्यङ्गोत्सादनपरिषेकावगाहनान्नपानविधिभिर्विशेषतश्चोपचरेत्; विशेषतो हि शून्यशरीराः स्त्रियः प्रजाता भवन्ति ॥ ४९ ॥

तस्या तु खलु તેને उसे, य व्याधिः જે રોગ जो रोग, उत्पद्यते ઉત્પન્ન થાય છે उत्पन्न होता है, स તે वह, गर्भवृद्धि- ગર્ભની વૃદ્ધિથી गर्भकी वृद्धिसे, क्षयित-शिथिल-सर्वधातुत्वात् સર્વ ધાતુઓ ક્ષીણ તથા શિથિલ થવાથી सर्वधातुओंके क्षीण तथा शिथिल होनेसे, प्रवाहण- અને પ્રવાહણ और प्रवाहण, वेदना-પ્રસવવેદના प्रसववेदना, क्लेदन- ક્લેદન क्लेदन, रक्तनिःस्रुतिविशेष- અને રક્તના અમુક પ્રકારના સ્રાવથી रक्तके विशिष्ट प्रकारके स्रावसे, शून्य-शरीरत्वात् च શરીર ખાલી થઈ જવાથી शरीर खाली हो जानेसे, कृच्छ्रसाध्य- કષ્ટસાધ્ય कष्टसाध्य, असाध्यः वा કે અસાધ્ય या असाध्य, भवति થાય છે होता है, तस्मात् તેથી इस लिए, ताम् તેની उसकी, यथोक्तेन કહેલ कही हुई, विधिना વિધિ અનુસાર विधिके अनुसार, उपचरेत् ઉપચર્યા કરવી उपचर्या करनी चाहिए, भौतिक- ભૌતિક भौतिक, जीवनीय- જીવનીય जीवनीय, बृंहणीय- બૃંહણીય बृंहणीय, मधुर- મધુર मधुर, वातहर- અને વાતહર ઔષધોથી और वातहर औषधोंसे, सिद्धैः સિદ્ધ કરેલા સ્નેહાદિથી सिद्ध किये हुए स्नेहादिसे, अभ्यङ्ग- અભ્યંગ अभ्यंग, उत्सादन- उत्सादन, परिषेक- પરિષેક परिषेक, अवगाहन- અવગાહન अवगाहन, अन्नपानविधिभिः અને અન્નપાનવિધિઓથી और अन्नपान-विधानोंसे, विशेषतः च વિશેષે કરીને विशेष करके, उपचरेत् ઉપચર્યા કરવી જોઈએ उपचर्या करनी चाहिए, हि કારણ કે क्योंकि, प्रजाता- સુવાવડી प्रसूता, स्त्रियः સ્ત્રીઓ स्त्रियाँ, विशेषतः વિશેષે કરીને विशेष करके, शून्यशरीरा ખાલી શરીરવાળી शून्य शरीरवाली, भवन्ति હોય છે होती हैं ॥४९॥

४९. °धातुत्वात्–°शरीरधातुत्वात् (ज.)
,, °मधुरवातहरसिद्धै–°वातहरसिद्धै (प)

49 The disorders arising in a lying-in woman are either difficult or impossible of cure Since her entire humoral economy has been depleted and broken up by the demand made on it for the growth of the fetus and since the body is drained of vitality by the delivery throes, the loss of fluids and of blood, she should therefore be tended in the prescribed manner, and particular care should be taken to treat her with inunction-massage, shower-bath, immersion-bath and dietary modes which have been medicated with articles of magical, life-promoting, roborant, sweet and vata-destroying properties For, women who have recently delivered, become exceedingly empty in their bodies.

कुमारस्य नामकरणसंस्कारः—

दशमे त्वहनि सपुत्रा स्त्री सर्वगन्धौषधैर्गौरसर्षपलोध्रैश्च स्नाता लघ्वहतशुचिवस्त्रं परिधाय पवित्रेष्टलघुविचित्रभूषणवती च संस्पृश्य मङ्गलान्युचितामर्चयित्वा च देवतां शिखिनः शुक्लवाससोऽव्यङ्गांश्च ब्राह्मणान् स्वस्ति वाचयित्वा कुमारमहतानां च वाससां संचये प्राक्शिरसमुदक्शिरसं वा संवेश्य देवतापूर्वं द्विजातिभ्यः प्रणमतीत्युक्त्वा कुमारस्य पिता द्वे नामनी कारयेन्नाक्षत्रिकं नामाभिप्रायिकं च ।

दशमे अहनि तु અને દશમે દિવસે और दसवें दिन, सर्वगन्धौषधैः સંપૂર્ણ ગન્ધદ્રવ્યોથી सपूर्ण गन्ध-

५० दशमे त्वहनि–दशम्या निश्यतीतायां (ग घ)
,, गौरसर्षपलोध्रैश्च–गौरसर्षपैश्च (ख ग)
,, °शुचिवस्त्रं परिधाय–°वस्त्रपरिहिता (घ)
,, कुमारमहतानां च वाससां संचये–कुमारमहतेन शुचिना ससाऽऽच्छादयेत् (ग घ)
,, कुमारमहतानां च–कुमारमहतेन शुचिना (च)

द्रव्योंसे, गौरसर्षप- तथा સફેદ સરસવ तथा सफेद सरसों, लोध्रै च અને લોધ્રથી और लोध्रसे, स्नाता નાહીને स्नान करके, लघु- હલકું हलका, अहत- નવું नया, शुचि- તેમજ પવિત્ર एवं पवित्र, वसनम् વસ્ત્ર वस्त्र, परिधाय પહેરીને पहन कर, पवित्र- तथा પવિત્ર तथा पवित्र, इष्ट- ઇષ્ટ इष्ट, लघु- હળવાં लघु, विचित्र- અને વિચિત્ર और विचित्र, भूषणवती च આભૂષણો ધારણ કરીને आभूषण धारण करके, सपुत्रा પુત્રસહિત पुत्रसहित, स्त्री માતા माता, मङ्गलानि મંગળ દ્રવ્યોને मंगल द्रव्योंको, संस्पृश्य સ્પર્શ કરી स्पर्श करके, उचिताम् યોગ્ય योग्य, देवताम् च દેવતાનું देवताका, अर्चयित्वा અર્ચન કરીને अर्चन करके, शिखिन· શિખાયુક્ત शिखायुक्त, शुक्लवासस શ્વેત વસ્ત્રવાળા श्वेतवस्त्रधारी, अव्यङ्गान् च અને ખોડ રહિત और विकृत अगसे रहित, ब्राह्मणान् બ્રાહ્મણો પાસે ब्राह्मणोंसे, स्वस्ति वाचयित्वा સ્વસ્તિવાચન કરાવી स्वस्तिवाचन कराके, अहतानाम् નવીન नवीन, वाससाम् વસ્ત્રોના वस्त्रोंके, सचये च સમૂહ પર समूह पर, प्राक्-शिरसम् પૂર્વ તરફ માથુ રાખી पूर्वकी ओर शिर रख कर उदक्-शिरसम् वा અથવા ઉત્તર તરફ માથુ રાખી अथवा उत्तरकी ओर शिर रख कर, संवेश्य સુવરાવી लिटा कर, देवतापूर्वम् પ્રથમ દેવતાને प्रथम देवताको, द्विजातिभ्य અને પછી બ્રાહ્મણોને और फिर ब्राह्मणोंको, प्रणमति પ્રણામ કરે છે प्रणाम करता है, इति એ પ્રમાણે ऐसा, उक्त्वा કહીને कह कर, कुमारस्य કુમારના कुमारका, पिता પિતાએ पिता, नाक्षत्रिकम् એક નક્ષત્ર પ્રમાણે एक नक्षत्रके अनुसार, आभिप्रायिकम् च तथा બીજું અભીષ્ટ तथा दूसरा अभीष्ट, नाम નામ नाम, द्वे नामनी એમ બે નામો ऐसे दो नाम, कारयेत् પાડવાં रक्खे।

50-(1) On the tenth day, the woman, together with the child, should bathe in water treated with all fragrant herbs and with white rapeseed and lodh, put on light, new and clean garments, deck herself with pure, coveted, light and variegated ornaments, touch auspicious objects and worship the appropriate deity, receive the blessings of brahmanas with unshorn locks, white garments and whole-bodies, then having wrapped the child who should be placed with his head either towards the east or the north in the folds of a new garment Declaring that it (the child) salutes the twice-born headed by the gods, the father of the child should give it two names, one name denoting the constellation under which it was born and the other of intended meaning

तत्राभिप्रायिकं घोषवदाद्यन्तस्थान्तमूष्मान्तं वाऽवृद्धं त्रिपुरुषानूकमनवप्रतिष्ठितं, नाक्षत्रिकं तु नक्षत्रदेवतासमानाख्यं द्व्यक्षरं चतुरक्षरं वा ॥५०॥

तत्र તેમાં इनमें, आभिप्रायिकम् અભીષ્ટ નામ अभीष्ट नाम, घोषवदादि- ઘોષ શબ્દથી શરૂ થતું घोष अक्षरसे शुरू होनेवाला, अन्तस्थान्तम् છેડે અન્તસ્થ અક્ષરવાળું अन्तमें अन्तस्थ अक्षरसे युक्त, ऊष्मान्तम् वा અથવા છેડે ઊષ્માક્ષરવાળું अथवा अन्तमें ऊष्माक्षरसे युक्त, अवृद्धम् વૃદ્ધિ અક્ષરોથી રહિત वृद्धि-अक्षरोंसे रहित, त्रिपुरुषानूकम् ત્રણ પેઢીના નામને મળતું तीन पेढियोंके नामके अनुकूल, अनवप्रतिष्ठितम् અને પ્રસિદ્ધ હોય એવું નામ રાખવું और प्रसिद्ध हो ऐसा नाम रखे, नाक्षत्रिकम् तु અને નક્ષત્ર અનુસાર નામ તો और नक्षत्रानुसार नाम तो, नक्षत्र- નક્ષત્રના नक्षत्रके, देवता- દેવતાની देवताके, समानाख्यम् સમાન સંજ્ઞાવાળું समान संज्ञावाला, द्व्यक्षरम् અને બે અક્ષરવાળું और दो अक्षरवाला, चतुरक्षरम् वा અથવા ચાર અક્ષરવાળું પાડવું अथवा चार अक्षरवाला रक्खे ॥५०॥

50 Of these, the meaningful name should have a sonant for its first

५० वाऽवृद्धं त्रिपुरुषानूकमनवप्रतिष्ठित–वृद्धत्रिपुरुषान्तर प्रतिष्ठित (व)

,, नक्षत्रदेवतासमानाख्य–नक्षत्रदेवतासयुक्त कृत (च त)

letter and for its last a semivowel or an ooshman (sibilants and the aspirate), should be free of diphthongs, reminiscent of one of the three ancestors (father, grand-father and great grand-father) and not new-fangled. The 'stellar' name shall be identical with that of the stellar deity and should be either disyllabic or tetrasyllabic

आयुष्मतां कुमाराणां लक्षणानि—

वृत्ते च नामकर्मणि कुमारं परीक्षितुमुपक्रमेतायुषः प्रमाणज्ञानहेतोः । तत्रेमान्यायुष्मतां कुमाराणां लक्षणानि भवन्ति ।

नामकर्मणि वृत्ते च નામકર્મ પૂરું થતાં नामकर्म पूर्ण होनेपर, आयुषः આયુનું आयुके, प्रमाणज्ञानहेतोः પ્રમાણ જાણવા માટે प्रमाणको जाननेके लिए, कुमारम् કુમારની कुमारकी, परीक्षितुम् પરીક્ષા કરવાનો परीक्षा करनेका, उपक्रमेत આરંભ કરવો आरभ करना चाहिए, तत्र અહીં यहा, आयुष्मताम् આયુષ્માન दीर्घायु, कुमाराणाम् કુમારોનાં कुमारोंके, इमानि આ ये, लक्षणानि લક્ષણો लक्षण, भवन्ति હોય છે होते हैं।

51-(1). The naming over, the infant should be examined with a view to learning the probable length of his life. Now the following are the signs of children that are going to be long-lived.

तद्यथा—एकैकजा मृदवोऽल्पाः स्निग्धाः सुबद्धमूलाः कृष्णाः केशाः प्रशस्यन्ते, स्थिरा बहला त्वक्, प्रकृत्याऽतिसंपन्नमीषत्प्रमाणातिवृत्तमनुरूपमातपत्रोपमं शिरः, व्यूढं दृढं समं सुश्लिष्टशङ्खसन्ध्यूर्ध्वव्यञ्जनसंपन्नमुपचितं वलिभमर्धचन्द्राकृति ललाटं, बहलौ विपुलसमपीठौ समौ नीचैर्वृद्धौ पृष्ठतोऽवनतौ सुश्लिष्टकर्णपुत्रकौ महाच्छिद्रौ कर्णौ, ईषत्प्रलम्बिन्यावसंगते समे संहते महत्यौ भ्रुवौ, समे समाहितदर्शने व्यक्तभागविभागे बलवती तेजसोपपन्ने स्वङ्गापाङ्गे चक्षुषी, ऋज्वी महोच्छ्वासा वंशसंपन्नेषदवनताग्रा नासिका, महदृजुसुनिविष्टदन्तमास्यम्, आयामविस्तारोपपन्ना श्लक्ष्णा तन्वी प्रकृतिवर्णयुक्ता जिह्वा, श्लक्ष्णं युक्तोपचयमूष्मोपपन्नं रक्तं तालु, महानदीनः स्निग्धोऽनुनादी गम्भीरसमुत्थो धीरः स्वरः, नातिस्थूलौ नातिकृशौ विस्तारोपपन्नावास्यप्रच्छादनौ रक्तावोष्ठौ, महत्यौ हनू, वृत्ता नातिमहती ग्रीवा, व्यूढमुपचितमुरः, गूढं जत्रु पृष्ठवंशश्च, विप्रकृष्टान्तरौ स्तनौ, असंपातिनी स्थिरे पार्श्वे, वृत्तपरिपूर्णायतौ बाहू सक्थिनी अङ्गुलयश्च, महदुपचितं पाणिपादं, स्थिरा वृत्ताः स्निग्धास्ताम्रास्तुङ्गाः कूर्माकाराः करजाः, प्रदक्षिणावर्ता सोत्सङ्गा च नाभिः, उरस्त्रिभागहीना समा समुपचितमांसा कटी, वृत्तौ स्थिरोपचितमांसौ नात्युन्नतौ नात्यवनतौ स्फिचौ, अनुपूर्वं वृत्तावुपचययुक्तावूरू, नात्युपचिते नात्यपचिते एणीपदे प्रगूढसिरास्थिसन्धी जङ्घे, नात्युपचितौ नात्यपचितौ गुल्फौ, पूर्वोपदिष्टगुणौ पादौ कूर्माकारौ, प्रकृतियुक्तानि वातमूत्रपुरीषगुह्यानि तथा स्वप्नजागरणायासस्मितरुदितस्तनग्रहणानि, यच्च किञ्चिदन्यदप्यनुक्तमस्ति तदपि सर्वं प्रकृतिसंपन्नमिष्टं, विपरीतं पुनरनिष्टम्। इति दीर्घायुर्लक्षणानि ॥ ५१ ॥

तद् यथा જેમકે जैसे, एकैकजाः એક એક ઉગેલા અર્થાત્ ભિન્ન ભિન્ન મૂળવાળા एक एक निकले हुए

५१. वृत्ते—कृते (क ष. द. ध.)

,, प्रकृत्याऽतिसपन्नम्—प्रकृत्याकृतिसुसपन्नम् (ष त)

,, °प्रमाणातिवृत्तम्—°प्रमाणातिरिक्तम् (ष)

५१. प्रकृतिवर्णयुक्ता—प्रकृतियुक्ता पाटलवर्णा (ड. त ष)

,, नातिकृशौ विस्तारोपपन्नौ—नातिकृशौ (ख ष)

,, गूढ जत्रु—दृढ जत्रु (ड.)

,, असपातिनी—असपातिनी (ष. ढ.)

,, ,, —असानुपातिनी (द.)

,, वातमूत्रपुरीषगुह्यानि—वातमूत्रपुरीषाणि (ख)

,, प्रकृतिसपन्नम्—प्रकृतियुक्तम् (क. ष)

अर्थात् भिन्न भिन्न मूलवाले, मृदव: मृदु कोमल, अल्पा: અલ્પ અલ્પ, स्निग्धा સ્નિગ્ધ स्निग्ध, सुबद्धमूला: મજબૂત મૂળવાળા सुदृढ मूलसे युक्त, कृष्णा કાળા काले, केशाः કેશ बाल, प्रशस्यन्ते પ્રશસ્ત ગણાય છે प्रशस्त माने जाते है, स्थिरा સ્થિર स्थिर, बहला અને સ્થૂળ और मोटी, त्वक् ત્વચા त्वचा, प्रकृत्या પ્રકૃતિથી प्रकृतिसे, अतिसंपन्नम् અતિશય સંપન્ન अतिशय सपन्न, ईषत्-प्रमाणातिवृत्तम् જરા પ્રમાણથી મોટું थोडा प्रमाणसे बड़ा, अनुरूपम् શરીરને અનુરૂપ देहके अनुकूल, आतपत्रोपमम् અને છત્ર જેવુ और छत्राकार, शिर: શિર शिर, व्यूढम् વિપુલ विशाल, दृढम् દૃઢ मजबूत, समम् સમાન समान, सुश्लिष्ट- સુબદ્ધ सुबद्ध, शङ्ख- શંખ शख, सन्धि- સન્ધિ सन्धि, ऊर्ध्वव्यञ्जन- તથા ઊર્ધ્વરેખાથી एव ऊर्ध्वरेखासे, संपन्नम् યુક્ત युक्त, उपचितम् પુષ્ટ पुष्ट, वलिभम् કરચલીવાળુ वलियोंसे युक्त, अर्धचन्द्राकृति તથા અર્ધચન્દ્રાકાર एवं अर्धचन्द्राकार, ललाटम् લલાટ ललाट, बहलौ સ્થૂળ मोटे, विपुल- વિશાળ विशाल, समपीठौ સમાન પીઠવાળા समान पीठवाले, समौ સમપ્રમાણ समप्रमाण, नीचैर्वृद्धौ નીચેના ભાગ તરફ વધેલા नीचेकी ओर बढे हुए, पृष्ठत પાછળના ભાગમાં બેઠેલા पीछेकी ओर झुके हुए, सुश्लिष्ट- તથા સુસયુક્ત एवं सुसयुक्त, कर्णपुत्रकौ કર્ણપુત્રક (કાનના છિદ્રથી બહાર જરા નાના વધેલા ભાગ) कर्णपुत्रक (कानके छिद्रसे बाहिर छोटेसे वृद्ध भाग), महाच्छिद्रौ અને મોટા છિદ્રવાળા और बड़े छिद्रयुक्त, कर्णौ બે કાન दो कान, ईषत् જરા थोड़ी, प्रलम्बिन्यौ લાંબી लटकती हुई, असङ्गते પરસ્પર ન મળેલી परस्पर न मिली हुई, समे સમાન समान, संहते ઘાટી घनी, महत्यौ તથા મોટી एव बडी, भ्रुवौ ભ્રૂકુટીઓ भ्रूकुटियॉ, समे સમાન समप्रमाण, समाहितदर्शने સ્થિર દૃષ્ટિવાળી स्थिर दृष्टिवाले, व्यक्तभागविभागे સ્પષ્ટ ભાગ વિભાગવાળી स्पष्टभाग विभागसे युक्त, बलवती બળવાન वलवान, तेजसा उपपन्ने તેજથી યુક્ત तेजसे युक्त, स्वङ्गापाङ्गे તથા સુંદર અંગ અને અપાંગવાળી एवं सुंदर अंग अपागसे युक्त, चक्षुषी આંખો ऑखें, ऋज्वी સરળ सीधी, महोच्छ्वासा લાંબા ઉચ્છ્વાસ લેનારુ दीर्घ उच्छ्वास लेनेवाली, वंशसम्पन्ना દાંડીની સંપત્તિવાળું शुभ नामावंशसे युक्त, ईषत् अवनताग्रा અગ્ર ભાગમાં જરા નમેલું अग्रभागमें थोड़ी झुकी हुई, नासिका નાક नासिका, महत् મોટું बड़ा, ऋजु- સરળ सरल, सुनिविष्ट- અને સારી રીતે ગોઠવાયેલા और भली प्रकार बैठे हुए, दन्तम् દાંતવાળુ दातोंवाला, आस्यम् મુખ मुख, आयाम- લંબાઈ लम्बाई, विस्तार- તથા પહોળાઈથી एव चौड़ाईसे, उपपन्ना યુક્ત युक्त, श्लक्ष्णा લીસી चीकनी, तन्वी પાતળી पतली, प्रकृतिवर्णयुक्ता સ્વાભાવિક વર્ણવાળી स्वाभाविक वर्णयुक्त, जिह्वा જીભ जीभ, श्लक्ष्णम् લીસુ चिकना, युक्तोपचयम् યોગ્ય પુષ્ટિવાળુ योग्य पुष्टतासे युक्त, ऊष्मोपपन्नम् ઊષ્માયુક્ત ऊष्मायुक्त, रक्तम् તથા લાલ तथा लाल, तालु તાળવુ तालु, महान् મોટો महान, अदीन દીનતારહિત दीनतारहित, स्निग्ध: સ્નિગ્ધ स्निग्ध, अनुनादी પડછંદો પાડનાર प्रतिध्वनियुक्त, गम्भीरसमुत्थ: ગંભીર गम्भीर, धीर: અને ધીર और धीर, स्वर: સ્વર स्वर, नातिस्थूलौ નહિ બહુ જાડા न बहुत मोटे, नातिकृशौ નહિ બહુ પાતળા न बहुत पतले, विस्तारोपपन्नौ વિસ્તારથી યુક્ત विस्तारसे युक्त, आस्य-प्रच्छादनौ મુખ ઢાંકનાર मुखको ढकनेवाले, रक्तौ અને લાલ और लाल, ओष्ठौ હોઠ ओष्ठ, महत्यौ મોટાં बडे, हनू જડબાં हनू, वृत्ता ગોળ गोल, नातिमहती નહિ બહુ મોટી न बहुत बड़ी, ग्रीवा ડોક ग्रीवा, व्यूढम् વિશાળ विशाल, उपचितम् તથા ભરાવદાર और भरी हुई, उर છાતી छाती, गूढम् ગૂઢ गूढ, जत्रु હાંસડી जत्रु, पृष्ठवंश च અને પૃષ્ઠવંશ और पृष्ठवश, विप्रकृष्ट-अन्तरौ પરસ્પર દૂર અન્તરવાળાં परस्पर दूरवर्ती अन्तरवाले, स्तनौ સ્તન स्तन, असंपातिनी સુનિર્ગત सुनिर्गत, स्थिरे તથા સ્થિર एवं स्थिर, पार्श्वे પડખાં पार्श्व, वृत्त- ગોળ गोल, परिपूर्ण- ભરેલા भरे हुए, आयतौ અને લાંબા और लम्बे, बाहू બાહુ बाहु, सक्थिनी સાથળો सक्थियां, अङ्गुलय च અને આંગળિયો और अंगुलियॉ, महत् મોટા बड़े, उपचितम् તથા પુષ્ટ और पुष्ट, पाणिपादम् હાથપગ हाथपॉव, स्थिरा: સ્થિર स्थिर, वृत्ता: ગોળ गोल स्निग्धा સ્નિગ્ધ स्निग्ध, ताम्रा તામ્ર રંગના ताम्रवर्णके, तुङ्गा ઊંચા ऊंचे, कूर्माकारा અને કાચબાના આકારના और कछुएकी पीठके समान, करजा: નખ नख, प्रदक्षिणावर्ता જમણા

વળાંકવાળી दक्षिणावर्तयुक्त, सोत्सङ्गा च અને ગંભીરતાયુક્ત और गम्भीरतायुक्त, नाभिः નાભિ नाभि, उरस्त्रिभागहीना પહોળાઈમાં છાતીથી તૃતીયાંશ ઓછી चौडाईमें छातीसे तृतीयांश कम, समा સમાન समान, समुपचितमांसा તથા પુષ્ટ માંસવાળી एवं पुष्ट मांसवाली, कटी કમર कमर, वृत्तौ ગોળ गोल, स्थिरोपचित- સ્થિર અને પુષ્ટ स्थिर और पुष्ट, मांसौ માંસવાળા मांसवाले, न-अति-उन्नतौ નહિ બહુ ઊંચા न तो बहुत उठे हुए, न-अति-अवनतौ તથા નહિ બહુ બેઠેલા तथा न तो बहुत दवे हुए, स्फिचौ નિતંબ नितंब, अनुपूर्वम् ક્રમશઃ क्रमशः, वृत्तौ ગોળ गोल, उपचययुक्तौ પુષ્ટિયુક્ત पुष्टियुक्त, ऊरू સાથળો ऊरू, न-अति-उपचिते નહિ બહુ પુષ્ટ न तो बहुत पुष्ट, न-अति-अपचिते તેમ નહિ બહુ કૃશ और न बहुत कृश, एणीपदे હરિણીના પગ જેવી हरिणीके पदके समान, प्रगूढ-सिरा-अस्थि-सन्धी જેનાં સિરા તથા અસ્થિસંધિ ઢંકાયેલાં છે એવી जिनकी सिरा तथा अस्थिसन्धियाँ ढंकी हुई है ऐसी, जङ्घे પિંડીઓ जघाएँ, न-अति-उपचितौ નહિ બહુ પુષ્ટ न तो बहुत पुष्ट, न-अति-अपचितौ તેમ નહિ બહુ કૃશ और न तो बहुत कृश, गुल्फौ ઘૂંટીઓ गुल्फ, पूर्वोपदिष्टगुणौ પહેલાં કહેલા ગુણોવાળા पूर्वकथित गुणयुक्त, कूर्माकारौ અને કાચબાના આકારના और कछुएके आकारके, पादौ પગ पैर, प्रकृतियुक्तानि પ્રકૃતિયુક્ત प्रकृतियुक्त, वातमूत्रपुरीष- વાયુ-મૂત્ર-પુરીષ वायु-मूत्र-पुरीष, गुह्यानि અને ગુહ્ય ઇન્દ્રિયો और गुह्येन्द्रिया, तथा તથા तथा, स्वप्ननिद्रा નિદ્રા निद्रा, जागरण- જાગરણ जागरण, आयास- પરિશ્રમ परिश्रम, स्मित- સ્મિત हास्य, रुदित- રોવું रोना, स्तनग्रहणानि અને સ્તનગ્રહણ और स्तनग्रहण, अन्यत् च અને બીજું और दूसरा, यत् किंचित् अपि જે કંઈ जो कुछ, अनुक्तम् अस्ति કહ્યું નથી नहीं कहा गया, तत् सर्वम् अपि તે બધુંય वह सब ही, प्रकृतिसम्पन्नम् પ્રકૃતિસંપન્ન प्रकृतिसपन्न, इष्टम् ઇષ્ટ છે इष्ट है, विपरीतम् पुनः અને વિપરીત और विपरीत, अनिष्टम् અનિષ્ટ છે अनिष्ट है, इति એ ये, दीर्घायु - દીર્ઘાયુનાં दीर्घायुके, लक्षणानि લક્ષણો છે लक्षण है ॥ ५१ ॥

51. Thus they commend hair of the head that grows singly in separate follicles, is soft, sparse, oily, firmly rooted, and black; skin that is taut and thick-layered; head that is normal, endowed more than usually with the traits of excellence, a little in excess of the normal measurements, proportionate and resembling an umbrella in shape; fore-head that is broad, firm, even, well-knit in the skull, joints showing vertical lines, plump, wrinkled and shaped like the half-moon, ears that are plump, broad and even in the lobes, well-matched, pendulous, depressed in the back, well jointed in the concha and large-holed, eye-brows that are slightly drooping at the ends not joined together, well-matched, thick-set and large, eyes that are well-matched, straight-seeing, well-defined in all parts, strong, endowed with lustre, beautiful in them-selves and in their corners; nose that is straight, capable of deep-breathing, well-bridged and slightly curved in the tip (aquiline); mouth that is large, straight and provided with well-set teeth; tongue that is long, wide smooth, slender and of a healthy color; palate that is smooth, moderately fleshy, warm and red; voice that is mighty, not plaintive, endearing, resonant, deep-toned and inspirating; lips that are neither too thick nor too thin, well extended so as to screen the mouth and red jaws that are large; neck that is rounded and not over-large; chest that is wide and plump; the collar-bone and the spine that are inconspicuous; breasts that are wide-

spaced, sides that taper down and are firm, arms, thighs and fingers that are rounded, full and extended, hands and feet that are large and plump, nails that are firm, rounded, oily, pink, convex and shaped like a tortoise; navel that has a right whirl and is well depressed, waist that is two-thirds of the chest in circumference, straight and evenly fleshy, buttocks that are rounded, compact, plump, neither very elevated nor very depressed; thighs that taper down gradually and are plump; shanks that are neither too fleshy nor void of flesh in the ankles like those of the deer and have nerves, bones and joints well-covered, ankles that are neither very fleshy nor void of flesh, feet of the description given earlier and tortoise-shaped, and flatus, urine, stools, and anus as also sleep, waking, movements, crowing, crying and sucking that conform to the norm, whatever else has been left unmentioned here, if conforming to what is exce llent in nature, should be regarded as desirable, what is contrary to this is to be considered undesirable Thus have been described the signs of longevity

धात्रीपरीक्षा—

अतो धात्रीपरीक्षामुपदेक्ष्यामः । अथ ब्रूयात्—धात्रीमानय समानवर्णां यौवनस्थां निभृतामनातुरामव्यङ्गामव्यसनामविरूपामजुगुप्सितां देशजातीयामक्षुद्रामक्षुद्रकर्मिणीं कुले जातां वत्सलामरोगां जीवद्वत्सां पुंवत्सां दोग्ध्रीमप्रमत्तामनुच्चारशायिनीमनन्त्यावसायिनीं कुशलोपचारां शुचिमशुचिद्वेषिणीं स्तनस्तन्यसंपदुपेतामिति ॥ ५२ ॥

अत. અહીંથી यहांसे, **धात्री-** ધાવની धात्रीकी, **परीक्षाम्** પરીક્ષા परीक्षाको, **उपदेक्ष्याम.** કહેશું कहेंगे, **अथ** પછી फिर, **समानवर्णाम्** સમાન જાતિની समान वर्णकी, **यौवनस्थाम्** યુવતિ युवति, **निभृताम्** વિનયશીલ विनयशील, **अनातुराम्** રોગરહિત नीरोग, **अव्यङ्गाम्** ખોડખાંપણ વિનાની न्यूनाधिक अंगरहित, **अविरूपाम्** વિરૂપ ન હોય એવી विरूप न हो ऐसी, **अजुगुप्सिताम्** અનિન્દિત अनिन्दित, **देशजातीयाम्** પોતાના દેશમાં જન્મેલી अपने देशमें उत्पन्न हुई, **अक्षुद्राम्** ક્ષુદ્રતારહિત क्षुद्रतारहित, **अक्षुद्रकर्मिणीम्** ક્ષુદ્રકર્મ ન કરનારી क्षुद्रकर्म न करनेवाली, **कुले जाताम्** ઉત્તમ કુળમાં જન્મેલી उत्तम कुलमें उत्पन्न हुई, **वत्सलाम्** વહાલ રાખનારી प्रेम रखनेवाली, **अरोगाम्** રોગરહિત रोगरहित, **जीवद्वत्साम्** જીવિત સંતાનવાળી जीवित संतानवाली, **पुंवत्साम्** પુત્રવતી पुत्रवती, **दोग्ध्रीम्** બહુ દૂધવાળી प्रचुरदुग्धयुक्त, **अप्रमत्ताम्** અપ્રમાદી प्रमादरहित, **अनुच्चारशायिनीम्** બાળકના મળમૂત્ર પર નહિ સૂનારી बच्चेके मलमूत्र पर नहीं सोनेवाली, **अनन्त्यावसायिनीम्** પતિત ન હોય એવી पातित्यदोषरहित, **कुशलोपचाराम्** ઉપચારકુશળ उपचारमें कुशल, **शुचिम्** પવિત્ર पवित्र, **अशुचि-** મલિનતાનો मलिनताका **द्वेषिणीम्** દ્વેષ કરનારી द्वेष करनेवाली, **स्तन-** સ્તન स्तन, **स्तन्य-** અને દૂધની और दूधकी, **संपत्-** સંપત્તિથી संपत्तिसे, **उपेताम्** યુક્ત युक्त, **धात्रीम्** ધાવને धात्रीको, **आनय** લઈ આવો ले आओ, **इति** એ પ્રમાણે इस प्रकार, **ब्रूयात्** કહેવું જોઈએ कहना चाहिए ॥ ५२ ॥

52. We shall now teach how to carry out the examination of the wet-nurse The physician should say thus.—"Bring a wet-nurse who belongs to the same caste as the infant's

५२ अविरूपामजुगुप्सिता—अविजुगुप्सामजुगुप्सिता (ध)
,, वत्सलामरोगा—वत्सला (ख. ध)

५२. अप्रमत्तामनुच्चारशायिनीम्—अप्रमत्तामशायिनीमनुच्चारशायिनीम् (ध झ)

mother, who is in her youth, submissive, free from disease, not deficient in any limb, not given to unwholesome pursuits, not ugly, not ill-disposed, native of the country, not mean minded, not given to mean acts, well-born, affectionate towards children, free from any disease, whose children have not died, who is a mother of male children, who has plenty of milk who is never heedless, not given to sleeping in beds soiled with excrement, not given to low company, skilful in attendance clean, averse to unclean ways and endowed with the excellence of breasts and milk.

धात्र्या स्तनसपद्—

अभेषजमिति ज्ञेयं विपरीतं यदौषधात् ।
तदसेव्यं निषेव्यं तु प्रवक्ष्यामि यदौषधम् ॥१५॥

यत् જે जो, औषधात् ઔષધથી औषधसे, विपरीतम् વિપરીત હોય તે विपरीत होता है वह, अभेषजम् इति અભેષજ છે એમ अभेषज है ऐसा, ज्ञेयम् સમજવું समझना चाहिए, तत् તે वह असेव्यम् સેવવા યોગ્ય નથી सेवन योग्य नहीं है, यत् औषधम् तु પરંતુ જે ઔષધ परन्तु जो औषध, निषेव्यम् સેવવા યોગ્ય છે તે सेवन करनी चाहिए उसको, प्रवक्ष्यामि હું કહીશ मैं कहूंगा ॥ १५ ॥

15. That which is of a contrary character to medicine is to be known as "Contra-medicine." It is unfit for use. Accordingly we shall confine ourselves to describing that which alone is fit for use

द्विविधो रसायनप्रयोगः—

रसायनानां द्विविधं प्रयोगमृषयो विदुः ।
कुटीप्रावेशिकं चैव वातातपिकमेव च ॥ १६ ॥

ऋषयः ઋષિઓ ऋषि, रसायनानाम् રસાયનનો रसायनोंका, द्विविधम् બે પ્રકારનો दो प्रकारका, प्रयोगम् પ્રયોગ प्रयोग, विदुः જાણે છે जानते हैं, कुटीप्रावेशिकम्

१३ स्वस्थस्योर्जस्करं–स्वस्थस्यौजस्करं (च. द प.)
,, वक्ष्यते तच्चिकित्सिते–वक्ष्यतेऽतश्चिकित्सिते (च.)
१४. विधिश्चाग्रे–विधिश्चाग्र्यो (ग.)
१५. यदौषधात्–यदौषधम् (च.)
,, तदसेव्यं निषेव्यं तु–तदसिद्ध्यै निषेव्य च-(च.)

च एव कुटीप्रावेशिक कुटीप्रावेशिक, वातातपिकमेव च અને વાતાતપિક और वातातपिक ॥ १६ ॥

16. The sages adumbrated two modes of administering vitalization—one by immurement in a retreat, the other by recourse to air and sun-baths.

कुटीप्रावेशिकस्य विधि —

कुटीप्रावेशिकस्यादौ विधिः समुपदेक्ष्यते ।
नृपवैद्यद्विजातीनां साधूनां पुण्यकर्मणाम् ॥१८॥
निवासे निर्भये शस्ते प्राप्योपकरणे पुरे ।
दिशि पूर्वोत्तरस्यां च सुभूमौ कारयेत् कुटीम् ॥१८॥
विस्तारोत्सेधसंपन्नां त्रिगर्भां सूक्ष्मलोचनाम् ।
घनभित्तिमृतुसुखां सुस्पष्टां मनसः प्रियाम् ॥१९॥
शब्दादीनामशस्तानामगम्यां स्त्रीविवर्जिताम् ।
इष्टोपकरणोपेतां सज्जवैद्यौषधद्विजाम् ॥ २० ॥
अथोदगयने शुक्ले तिथिनक्षत्रपूजिते ।
मुहूर्तकरणोपेते प्रशस्ते कृतवापनः ॥ २१ ॥
धृतिस्मृतिबलं कृत्वा श्रद्धधानः समाहितः ।
विधूय मानसान् दोषान् मैत्रीं भूतेषु चिन्तयन् ॥२२॥
देवताः पूजयित्वाऽग्रे द्विजातींश्च प्रदक्षिणम् ।
देवगोब्राह्मणान् कृत्वा ततस्तां प्रविशेत् कुटीम् ॥२३॥

आदौ પ્રથમ प्रथम, कुटीप्रावेशिकस्य કુટીપ્રાવેશિકની कुटीप्रावेशिककी, विधिः વિધિ विधि, समुपदेक्ष्यते કહેવામાં આવશે कही जायगी, साधूनाम् સાધુ साधु, पुण्यकर्मणाम् તથા પુણ્ય કર્મવાળા तथा पुण्यवान, नृप-वैद्य- द्विजातीनाम् રાજા, વૈદ્યો અને બ્રાહ્મણોના राजा, वैद्य और ब्राह्मणलोगोंके, निवासे નિવાસરૂપ निवास रूप, निर्भये ભયરહિત निर्भय, शस्ते પ્રશસ્ત प्रशस्त, प्राप्योपकरणे અને સર્વ સાધનો મળી શકે એવા और सब साधनोंसे युक्त, पुरे નગરમાં नगरमें, पूर्वोत्तरस्याम् પૂર્વ કે ઉત્તર पूर्व अथवा उत्तर, दिशि દિશામાં दिशामें, सुभूमौ च શુભ ભૂમિ ઉપર अच्छी जमीन पर, विस्तार- પહોળાઈ विस्तार, उत्सेध-संपन्नाम् અને ઊંચાઈવાળી और ऊंचाईवाली, त्रिगर्भाम् ત્રણ ગર્ભવાળી तीन गर्भवाली, सूक्ष्मलोचनाम् નાની બારીબારણાંવાળી छोटी छोटी खड़कियोवाली, घनभित्तिम् જાડી ભીતવાળી चौड़ी दीवारवाली, ऋतुसुखाम् અને સર્વ ઋતુમાં સુખકર सब ऋतुमें सुखदायक, सुस्पष्टाम् પ્રકાશપૂર્ણ प्रकाशपूर्ण, मनसः प्रियाम् ચિત્તને આનંદ આપનારી मनको प्रिय, अशस्तानाम् અપ્રશસ્ત अप्रशस्त, शब्दादीनाम् શબ્દાદિનો शब्द आदिसे, अगम्याम् પ્રવેશ ન થઈ શકે એવી अगम्य, स्त्रीविवर्जिताम् સ્ત્રીરહિત તથા स्त्रियोंसे वर्जित, इष्ट-उपकरण- ઇષ્ટ સાધનોથી इष्ट उपकरणोंसे, उपेताम् યુક્ત युक्त, सज्ज-वैद्य ओषध-द्विजाम् જેમાં વૈદ્ય, ઔષધ અને બ્રાહ્મણ તૈયાર હોય એવી वैद्य, औषधि और ब्राह्मणोंसे सुसज्जित, कुटीम् કુટી कुटी कारयेत् કરાવવી बनाये, अथ પછી उसके बाद, उदगयने ઉત્તરાયણમાં उत्तरायणके, शुक्ले શુક્લ પક્ષમાં शुक्ल पक्षमें, तिथि नक्षत्र-पूजिते શુભ તિથિ અને નક્ષત્રવાળા शुभ तिथि और नक्षत्रवाले, मुहूर्तकरणोपेते શુભ મુહૂર્ત અને કરણથી યુક્ત शुभ मुहूर्त और करणसे युक्त, प्रशस्ते શુભ દિવસે शुभ दिनमें, कृतवापन મુંડન કરાવેલા क्षौर कर्म कराये हुए, धृति स्मृति-बलम् ધૈર્ય અને સ્મૃતિના બળનો धृति और स्मृतिके बलका, कृत्वा આશ્રય કરીને आश्रय ले कर. श्रद्धधानः શ્રદ્ધાયુક્ત श्रद्धासे युक्त, समाहित તથા એકાગ્ર મનવાળા મનુષ્યે तथा एकाग्र मनवाला मनुष्य, मानसान् માનસિક मानसिक, दोषान् દોષોને दोषोंको, विधूय દૂર કરીને निकाल करके, भूतेषु પ્રાણીમાત્ર તરફ सब प्राणियोंमें, मैत्रीम् મૈત્રીભાવનું मित्रभावको चिन्तयेत् ચિન્તન કરવું सोचे, अग्रे પ્રથમ प्रथम, देवताः દેવ देवता, द्विजातीन् च અને બ્રાહ્મણોની और ब्राह्मणोंकी, पूजयित्वा પૂજા કરીને पूजा करके, देवगोब्राह्मणान् च તથા દેવો, ગાયો અને

१८ निवासे—निवाते (प.)
,, व—तु (त.)
१९. घनभित्ति—दारुभित्ति (ग.)
,, सुस्पष्टां—सुमृष्टाम् (ध. प.)
२०. सज्ज—सक्त (ध.)
२२. धृतिस्मृतिबलं कृत्वा—धृतिस्मृतिबलोपेतः (प.)
२३. प्रदक्षिणम्—प्रदक्षिणाम् (ध.)
,, ब्राह्मणान्—ब्राह्मणम् (ध.)

બ્રાહ્મણોની तथा देव, गौ और ब्राह्मणको, प्रदक्षिणम् પ્રદક્ષિણા प्रदक्षिणा, कृत्वा કરીને करके, तत ત્યાર પછી उसके बाद, ताम् તે उस, कुटीम् કુટીમાં कुटीमे, प्रविशेत् પ્રવેશ કરવો प्रवेश करे ॥ १७-२३ ॥

17-23. We shall set down the procedure regarding the immurement therapy In an area resided in by princes, physicians, the twice-born communities, saintly men and men of virtuous deeds, free from alarm, salubrious, close to a city, where the necessary appurtenances may be had, one should, having selected a good site, cause a retreat to be built with its face towards either the east or the north It should be of the following description – high roofed and commodious; built in three concentric courts, furnished with narrow ventilators, thick-walled, congenial in all weathers, well lighted; pleasing to the mind; proof against noises and other disturbing agents, untenanted by women, equipped with all the requisite appurtenances, and having physicians, medicines and brahmanas ready at call Thereafter, during the sun's northern course, in the bright half of the month, when the day (tithi) and the constellation are propitious and the Muhurta and Karana are favourable, the man seeking rejuvenation should, being shaved, enter the retreat, having fortified himself in his resolution and purpose, full of faith and single-mindedness, having cast off all sins of the heart, cherishing good will for all creatures, having first worshipped the gods and then the twice-born, and having performed the circumambulation of the gods, the cows and the brahmanas.

तस्यां संशोधनैः शुद्धः सुखी जातबलः पुनः ।
रसायनं प्रयुञ्जीत तत्प्रवक्ष्यामि शोधनम् ॥ २४ ॥

तस्याम् તે કુટીમાં इस कुटीमें, संशोधनैः સંશોધન ઔષધોથી संशोधन औषधोंसे, शुद्धः શુદ્ધ થઈ शुद्ध हो कर, पुनः ફરીથી पुनः, सुखी નીરોગી नीरोग, जातबलः તથા શક્તિવાળો થાય ત્યારે જ और शक्तिशाली होनेपर, रसायनम् રસાયનનો रसायनका, प्रयुञ्जीत પ્રયોગ કરવો જોઈએ प्रयोग करना चाहिए, तत् તેથી इस लिये, शोधनम् સંશોધન ઔષધ संशोधन औषध, प्रवक्ष्यामि કહીશ कहूंगा ॥ २४ ॥

24. Therein, being cleansed with the purificatory measures and on having regained his happiness and normal strength, he should undergo the vitalization procedure. We shall first describe the cleansing procedure.

रसायनप्रयोगात् पूर्वं कोष्ठशोधनविधिः—

हरीतकीनां चूर्णानि सैन्धवामलके गुडम् ।
वचां विडङ्गं रजनीं पिप्पलीं विश्वभेषजम् ॥२५॥
पिबेदुष्णाम्बुना जन्तुः स्नेहस्वेदोपपादितः ।
तेन शुद्धशरीराय कृतसंसर्जनाय च ॥ २६ ॥
त्रिरात्रं यावकं दद्यात् पञ्चाहं वाऽपि सर्पिषा ।
सप्ताहं वा पुराणस्य यावच्छुद्धेस्तु वर्चसः ॥२७॥

स्नेह- સ્નેહન स्नेहन, स्वेद- અને સ્વેદનક્રિયા और स्वेदन, उपपादित કરાવેલા किये हुए, जन्तु પુરુષને पुरुषको, हरीतकीनाम् હરડેનું हरड़का, चूर्णानि ચૂર્ણ चूर्ण, सैन्धवामलके સિંધાલૂણ, આમળાં, सैन्धवनमक,

२४ तस्या—तस्माद् (प)
,, तत्प्रवक्ष्यामि—तता वक्ष्यामि (प. ध,
२७. यावकम्—पाचकम् (प०)

आवला, गुड- ગોળ गुड, वचाम् વજ वच, विडङ्गम् વાવડિંગ वायविडंग, रजनीम् હળદર हल्दी, पिप्पलीम् પીપર पिप्पली, विश्वभेषजम् અને સૂંઠ એઓને और सोंठ इन्हें, उष्णाम्बुना ગરમ પાણી સાથે गरम पानीके साथ, पिबेत् પીવા पीना चाहिए तेन તેનાથી इससे, शुद्धशरीराय શુદ્ધ શરીરવાળા शुद्ध शरीर हुए, कृतसंसर्जनाय च અને જેણે પેયા વગેરેનો ક્રમ કર્યો છે એવા તેને और पेया आदि संसर्जन क्रमका अनुष्ठान किये हुए उसको, त्रिरात्रम् ત્રણ રાત સુધી तीन रात्रि तक, पञ्चाहम् वा अपि અથવા પાંચ દિવસ સુધી या पांच दिन तक, सप्ताहम् वा કે સાત દિવસ સુધી या सात दिन तक, सर्पिषा घृताभिश्रत घृतमिश्रित, यावकम् યવનું ભોજન यवाग, पुराणस्य तु वर्चसः કોઠામાં ભરાયેલા જૂના મળની पुराना मल, यावत् शुद्धे જ્યાં સુધી શુદ્ધ થાય ત્યાં સુધી जहा तक साफ हो तब तक, दद्यात् આપવું देवे ॥ २५-२७ ॥

25-27. A person desiring vitalization should, after he has been subjected to the sudation and oleation procedures, drink in warm water, the powder of chebulic myrobalans, rock-salt, emblic myrobalans, gur, sweet flag, embelia, turmeric, long pepper and dry ginger, all in equal parts. After his body has thus been cleansed and he has been put on a rehabilitatory diet, he should be given to drink thin barley-gruel mixed with ghee, for a period either of three nights or five days or seven days, until his intestines have been purged of all fecal accumulations.

शुद्धकोष्ठं तु तं ज्ञात्वा रसायनमुपाचरेत् ।
वयःप्रकृतिसात्म्यज्ञो यौगिकं यस्य यद्भवेत् ॥२८॥

तम् तु તેને उसके, शुद्धकोष्ठम् શુદ્ધ કોઠાવાળો कोष्ठका शोधन हुआ, ज्ञात्वा જાણીને जान कर, वयः- વય वय, प्रकृति- પ્રકૃતિ प्रकृति, सात्म्यज्ञः તથા સાત્મ્યને જાણનાર વૈદ્ય तथा सात्म्यको जाननेवाला वैद्य, यस्य यत् જેને જે जिसको जो, यौगिकम् યોગ્ય योग्य, भवेत् હોય તો, रसायनम् તેને માટે તે રસાયનનો उसके लिए उस रसायनका, उपाचरेत् પ્રયોગ કરવો प्रयोग करे ॥ २८ ॥

28. On being satisfied that the person's bowels have been properly cleansed, the physician versed in the knowledge of age, habitus and homologation, should administer the procedure of vitalization that may be found suitable in a given case.

हरीतकीगुणा. —

हरीतकीं पञ्चरसामुष्णामलवणां शिवाम् ।
दोषानुलोमनीं लघ्वीं विद्याद्दीपनपाचनीम् ॥२९॥
आयुष्यां पौष्टिकीं धन्यां वयसः स्थापनीं पराम् ।
सर्वरोगप्रशमनीं बुद्धीन्द्रियबलप्रदाम् ॥ ३० ॥
कुष्ठं गुल्ममुदावर्तं शोषं पाण्ड्वामयं मदम् ।
अर्शांसि ग्रहणीदोषं पुराणं विषमज्वरम् ॥ ३१ ॥
हृद्रोगं सशिरोरोगमतीसारमरोचकम् ।
कासं प्रमेहमानाहं प्लीहानमुदरं नवम् ॥ ३२ ॥
कफप्रसेकं वैस्वर्यं वैवर्ण्यं कामलां क्रिमीन् ।
श्वयथुं तमकं छर्दिं क्लैब्यमङ्गावसादनम् ॥ ३३ ॥
स्रोतोविबन्धान् विविधान् प्रलेपं हृदयोरसोः ।
स्मृतिबुद्धिप्रमोहं च जयेच्छीघ्रं हरीतकी ॥ ३४ ॥

हरीतकीम् હરડે हरड, अलवणाम् લવણ રસ વિનાની लवण रसके बिना, पञ्चरसाम् પાંચ રસવાળી पाँच रसवाली, उष्णाम् ઉષ્ણ વીર્યવાળી उष्णवीर्य,

२८. उपाचरेत्—उपाहरेत् (थ.)
,, यौगिकं यस्य यद्भवेत्—यस्तस्मै यौगिकं भवेत् (ब.

२९ शिवाम्—शुभाम् (थ.)
३३. अवसादनम्—अवसादकम् (त.)
३५. अर्दिताश्च ये—छर्दिनाश्च ये (ग

शिवाम् કલ્યાણ કરનારી कल्याणकर, दोषानुलोमनीम् દોષોનું અનુલોમન કરનારી दोषोंका अनुलोमन करनेवाली, लघ्वीम् પચવામાં હલકી लघु, दीपनपाचनीम् દીપનપાચન दीपनपाचन, आयुष्याम् આયુષ્યવર્ધક आयुष्य बढानेवाली, पौष्टिकीम् પુષ્ટિને કરનારી पौष्टिक, धन्याम् શ્રેષ્ઠ श्रेष्ठ, पराम् ઉત્તમ उत्तम, वयस्थापनीम् વય સ્થાપક वयःस्थापक, सर्वरोगप्रशमनीम् સર્વ રોગોનું પ્રશમન કરનારી सब रोगोंको शांत करनेवाली, बुद्धीन्द्रिय-बलप्रदाम् તેમજ બુદ્ધિ તથા ઇન્દ્રિયને બલ આપનારી एवं बुद्धि और इन्द्रियको बल देनेवाली, विद्यात् જાણવી जाननी चाहिए, हरीतकी હરડે हरड, कुष्ठम् કુષ્ઠ कुष्ठ, गुल्मम् ગુલ્મ गुल्म, उदावर्तम् ઉદાવર્ત उदावर्त, शोषम् શોષરોગ शोष, पाण्ड्वामयम् પાંડુરોગ पाडुरोग, मदम् મદ मद, अर्शांसि અર્શ अर्श, ग्रहणीदोषम् ગ્રહણીદોષ ग्रहणीदोष, पुराणम् विषमज्वरम् જૂનો વિષમ જ્વર पुराना विषम ज्वर, हृद्रोगम् હૃદ્રોગ हृद्रोग, सशिरोरोगम् શિરોરોગસહિત शिरोरोगसहित, अतीसारम् અતિસાર अतिसार, अरोचकम् અરોચક अरोचक, कासम् કાસ कास, प्रमेहम् પ્રમેહ प्रमेह, आनाहम् આનાહ आनाह, प्लीहानम् પ્લીહા प्लीहरोग, नवम् उदरम् નવો ઉદરરોગ नवोत्पन्न उदर, कफप्रसेकम् કફપ્રસેક कफप्रसेक, वैस्वर्यम् સ્વરભંગ वैस्वर्य, वैवर्ण्यम् વિવર્ણતા वैवर्ण्य, कामलाम् કમળો पीलिया, क्रिमीन् ક્રિમિ कृमिरोग, श्वयथुम् સોજો श्वयथु, तमकम् તમકશ્વાસ तमकश्वास, छर्दिम् ઉલટી छर्दि, क्लैब्यम् નપુંસકતા नपुसकता, अङ्गावसादनम् અંગોની શિથિલતા अंगोंमें थकावट, विविधान् અનેક પ્રકારની विविध प्रकारकी, स्रोतोविबन्धान् સ્રોતોની અટકાયતો स्रोतोंकी रुकावट, हृदय-उरसो હૃદય અને છાતીનું हृदय और छातीका, प्रलेपम् કફથી લેપાઈ જવું कफसे लिप्त होना, स्मृति-बुद्धि- તેમજ સ્મૃતિ અને બુદ્ધિનો एवं स्मृति और बुद्धिका, प्रमोहम् च નાશ એઓને नाश इनको, शीघ्रम् શીઘ્ર तुरंत, जयेत् જીતે છે जीत लेती है ॥ २९-३४ ॥

29-34 The chebulic myrobalan, it should be known, contains all the tastes except one, i. e. salt taste, is hot, beneficial, corrective of the humors, light, stimulative of the gastric fire and digestive, promotive of life, roborant, auspicious, the best of vitalizers, a panacea, promotive of the intellect and sense-vigour The chebulic myrobalan is a quick subduer of the following disorders -dermatosis, gulma misperistalsis, consumption, anemia, intoxication, piles, the assimilation disorders, chronic irregular fever, cardiac disorders, diseases of the head, diarrhea anorexia, cough, urinary anomalies, abdominal distention, splenic disorders, recent abdominal affections, discharge of mucus, hoarseness of voice, impairment of complexion, jaundice helminthiasis, edema, asthma, vomiting, impotence, lassitude of the limbs, various kinds of obstruction of body-channels, collection of fluids or fat about the lungs or the heart, and stupefaction of memory and understanding.

हरीतकीसेवनानर्हाः—

(अजीर्णिनो रूक्षभुजः स्त्रीमद्यविषकर्शिताः ।
सेवेरन्नाभयामेते क्षुत्तृष्णोष्णार्दिताश्च ये ॥ ३५ ॥)

अजीर्णिन અજીર્ણવાળા अजीर्णवाले, रूक्षभुज. રૂક્ષ ભોજન કરનારા रूक्ष भोजन करनेवाले, स्त्री-मद्य-विष- તથા સ્ત્રી, મદ્ય અને વિષથી तथा स्त्रीसंग, मद्यपान और विषमे, कर्शिता દુર્બળ થયેલા कृश हुए, ये च અને જે મનુષ્યો और जो मनुष्य, क्षुत्-तृष्णा- ભૂખ, તરસ भूख, प्यास, उष्णार्दिता તેમજ ગરમીથી પીડાયેલા હોય एवं गरमीसे पीडित हों, एते તેઓએ વે, अभयाम् હરડેનું हरडका, न सेवेरन् સેવન ન કરવું सेवन न करे ॥ ३५ ॥

३५. अर्दिताश्च ये–र्दितास्च ये (च)

35. Dyspeptics, eaters of 'dry' foods, those who have been weakened by indulgence in women, drink and poisonous addictions, and those who are afflicted with hunger, thirst and heat, should not take the chebulic myrobalan; that is to say, it is contra-indicated in such conditions

आमलकगुणाः—

तान् गुणांस्तानि कर्माणि विद्यादामलकीष्वपि ।
यान्युक्तानि हरीतक्या वीर्यस्य तु विपर्ययः ॥३६॥
अतश्चामृतकल्पानि विद्यात् कर्मभिरीदृशैः ।
हरीतकीनां शस्यानि भिषगामलकस्य च ॥३७॥

हरीतक्या. હરડેના हरड़के, यानि જે जो, उक्तानि ગુણો તથા કર્મો કહ્યાં છે गुण तथा कर्म कहे है, तान् તે उन, गुणान् ગુણો गुणों, तानि कर्माणि અને તે કર્મો और उन कर्मोंको, आमलकेषु આમળામાં आंवलेमें, अपि પણ भी विद्यात् જાણવાં समझना चाहिए, वीर्यस्य तु પરંતુ વીર્યની परंतु वीर्यकी, विपर्यय· વિપરીતતા છે विपरीतता है, अतः આથી इस लिए, भिषक् વૈદ્ય वैद्य, ईदृशैः આવાં ऐसे कर्मभि કર્મોને લીધે कर्मोंके कारण, हरीतकीनाम् હરડેનાં हरड़के, आमलकस्य च અને આમળાનાં और आवलेके, शस्यानि ઠળિયા વિનાનાં ફળોને बीजरहित फलोंको, अमृत-कल्पानि અમૃતતુલ્ય अमृतके समान, विद्यात् જાણવાં माने ॥ ३६-३७ ॥

36-37. It should be known that all these virtues spoken of in connection with the chebulic myrobalan are also found in the emblic myrobalan; the potency, however, is of the opposite type. In view of the above consideration the physician should esteem the pulp of both chebulic and emblic myrobalans as being equal in virtue to nectar the food of the gods itself.

भेषजग्रहणविधि·—

ओषधीनां परा भूमिर्हिमवाञ् शैलसत्तमः ।
तस्मात्फलानि तज्जानि ग्राहयेत्कालजानि तु ॥३८॥
आपूर्णरसवीर्याणि काले काले यथाविधि ।
आदित्यपवनच्छायासलिलप्रीणितानि च ॥ ३९ ॥
यान्यजग्धान्यपूतीनि निर्व्रणान्यगदानि च ।
तेषां प्रयोगं वक्ष्यामि फलानां कर्म चोत्तमम् ॥४०॥

शैलसत्तम. પર્વતોમાં ઉત્તમ पर्वतमें श्रेष्ठ, हिमवान् હિમાલય हिमालय, ओषधीनाम् ઔષધિઓનું ओषधियोंकी, परा શ્રેષ્ઠ उत्कृष्ट, भूमिः ઉત્પત્તિસ્થાન છે भूमि है, तस्मात् तु માટે इस लिए, तज्जानि તેમાં ઉત્પન્ન થયેલાં उसमें उत्पन्न हुए, यानि तु જે जो, कालजानि ઋતુમાં ઉત્પન્ન થયેલાં योग्य कालमे उत्पन्न, आपूर्णरसवीर्याणि સંપૂર્ણ રસ અને વીર્યવાળાં रस और वीर्यसे भरे, आदित्य- સૂર્ય सूर्य, सलिल- જલ पानी, छाया- છાયા छाया, पवन અને પવનથી और वायुसे, प्रीणितानि પુષ્ટ થયેલાં હોય पुष्ट हों, अजग्धानि કીડાઓથી નહિ ખાધેલાં હોય कीड़ोंसे न खाये हों, अपूतीनि દુર્ગંધિરહિત હોય सड़े न हों, निर्व्रणानि ક્ષત વગરનાં હોય दागसे रहित हों, अगदानि च અને રોગરહિત હોય और रोगरहित हों, काले काले તે ફળો પાકવાને કાળે उन फलोंके पकनेके समय पर, यथाविधि વિધિ પ્રમાણે यथाविधि, ग्राहयेत् લેવાં लेवे, तेषाम् फलानाम् તે ફળોના उन फलोंके, उत्तमम् ઉત્તમ उत्तम, प्रयोगम् પ્રયોગ प्रयोग, कर्म च અને કર્મ और कर्मको, वक्ष्यामि હું કહીશ मै कहूगा ॥३८-४०॥

38-40 The best of habitats for medicinal plants is the Himalayas, the most majestic of mountains It is the fruits grown in the Himalayas that

१६. तान् गुणान्–तान् रसान् (थ.)
,, आमलकीष्वपि–आमलकेष्वपि (थ.)
१७. भिषगामलकस्य च–भिषगामलकानि च (द)

३९ आदित्यपवनच्छाया–आदित्यसलिलच्छाया (क. द)
४० यान्यजग्धानि–यान्यदग्धानि (ष द थ प.)
,, निर्व्रणानि–प्रीणनानि (थ.)

are therefore to be properly culled every season, selecting such fruits as are in season, rich with juice and potency, mellowed by the sun, wind, shade and water, unnibbled at by bird or beast, unspoiled, and unmarked with cuts or diseases We shall now describe the modes of administration and the excellent effects of these fruits

ब्राह्मरसायनं प्रथमम् -

पञ्चानां पञ्चमूलानां भागान् दशपलोन्मितान् ।
हरीतकीसहस्रं च त्रिगुणामलकं नवम् ॥ ४१ ॥
विदारिगन्धां बृहतीं पृश्निपर्णीं निदिग्धिकाम् ।
विद्याद्विदारिगन्धाद्यं श्वदंष्ट्रापञ्चमं गणम् ॥४२॥
बिल्वाग्निमन्थश्योनाकं काश्मर्यमथ पाटलाम् ।
पुनर्नवां शूर्पपर्ण्यौ बलामेरण्डमेव च ॥ ४३ ॥
जीवकर्षभकौ मेदां जीवन्तीं सशतावरीम् ।
शरेक्षुदर्भकाशानां शालीनां मूलमेव च ॥ ४४ ॥
इत्येषां पञ्चमूलानां पञ्चानामुपकल्पयेत् ।
भागान् यथोक्तांस्तत्सर्वं साध्यं दशगुणेऽम्भसि ॥४५॥
दशभागावशेषं तु पूतं तं ग्राहयेद्रसम् ।
हरीतकीश्च ताः सर्वाः सर्वाण्यामलकानि च ॥४६॥
तानि सर्वाण्यनस्थीनि फलान्यापोथ्य कूर्चनैः ।
विनीय तस्मिन्निर्यूहे चूर्णानीमानि दापयेत् ॥४७॥

पञ्चानाम् પાંચ પ્રકારનાં પાચોં પ્રકારકે पञ्चमूलानाम् પાંચ મૂળો પ્રત્યેક દ્રવ્ય પંચમૂલકે प्रत्येक द्रव्य, दशपलोन्मितान् ४० તોલા ४० तोला, भागाम् ભાગ प्रमाणमें, हरीतकी-सहस्रम् नवम् નવી હરડે નગ ૧૦૦૦ हरड ताजी १००० संख्यासे, त्रिगुण-आमलकम् च અને ત્રણ ગણાં (નગ ૩૦૦૦) આમળાં લેવાં और आवले ३००० संख्यासे लेवे, विदारिगन्धाम् શાલપર્ણી शालपर्णी, बृहतीम् ઊભી ભોરીંગણી बडी कटेरी, पृश्निपर्णीम् પૃશ્નિપર્ણી पृश्निपर्णी, निदिग्धिकाम् અને બેઠી ભોરીંગણી और छोटी कटेरी, विदारिगन्धाद्यम् આમ શાલપર્ણી જેમાં પ્રથમ છે इस प्रकार शालपर्णी जिनमें प्रथम है, श्वदंष्ट्रा-पञ्चमम् અને ગોખરુ જેમાં પાંચમાં છે એવી આ ઓષધિઓ और गोखरू जिनमें पॉचवा है ऐसी इन ओषधियोंको, गणम् પંચમૂલનો પહેલો ગણ पञ्चमूलका प्रथम गण, विद्यात् જાણવો समझे, बिल्व- બીલી बेल, अग्निमन्थ- અરણી अरणी, श्योनाकम् અરડૂસો श्योनाक, काश्मर्यम् શીવણી गम्भारी, अथ पाटलाम् અને પાટલા આ ઓષધિઓને પંચમૂલનો બીજો ગણ જાણવો और पाटला इन ओषधियोंको पंच मूलका दूसरा गण समझे, पुनर्नवाम् સાટોડી पुनर्नवा, शूर्पपर्ण्यौ મુદ્ગપર્ણી- માષપર્ણી मुद्गपर्णी-मापपर्णी, बलाम् બલા बला एरण्डम् च एव અને એરંડો આ ઓષધિઓને પંચમૂલનો ત્રીજો ગણ જાણવો और एरण्ड इन ओषधियोंको पचमूलका तीसरा गण समझे, जीवक- જીવક जीवक, ऋषभकौ ઋષભક ऋषभक, मेदाम् મેદા मेदा, सशतावरीम् અને શતાવરીસહિત और शतावरी-सहित, जीवन्तीम् ખરખોડી આ ઓષધિઓને પંચમૂલનો ચોથો ગણ જાણવો जीवन्ती इन ओषधियोंको पंचमूलका चौथा गण समझे, शर- બરુ शर, इक्षु- શેરડી ईख, दर्भ- દર્ભ दर्भ, काश- કાશ काश, शालीनाम् અને શાળનાં तथा शालिके, मूलम् च एव મૂળ આ ઓષધિઓને પંચ મૂલનો પાંચમો ગણ જાણવો मूल इन ओषधियोंको पच मूलका पाचवा गण समझे, इति આ પ્રમાણે इसप्रकार एषाम् આ इन, पञ्चानाम् પાંચેય पाच, पञ्चमूलानाम् પંચમૂળોના पचमूलोंको, यथोक्तान् કહ્યા પ્રમાણેના कहे हुए, भागान् ભાગો प्रमाणमें, उपकल्पयेत् લેવા लेवे, तत् તે इन, सर्वम् બધું सबको, दशगुणे દશગણા दसगुने, अम्भसि પાણીમાં जलमें, साध्यम् પકાવવુ पकावे, तम् તે वह, रसम् રસ જ્યારે रस जब, दशभाग- દશમા ભાગનો दसवा भाग, अवशेषम् બાકી રહે ત્યારે તેને शेष रहे तब उसको, पूतम् વસ્ત્રથી ગાળી वस्त्रसे छान कर, ग्राहयेत् લેવો लेवे, ताः તે इन, सर्वाः સર્વ सब हरीतकी च હરડે हरड, सर्वाणि અને બધાં और सब, आमलकानि च આમળાં आवले, तानि તે इन, सर्वाणि સર્વે सब, अनस्थीनि ઠળિયા વગરનાં गुठलिया निकाले हुए, फलानि ફળોને फलोंको, कूर्चनैः ખાંડવાના સાધનથી कूर्चनसे, आपोथ्य

४३ बिल्वाग्निमन्थश्योनाकम् काश्मर्यमथ पाटलाम्–बिल्वाग्निमन्थश्योनाकौ काश्मर्यं पाटलिस्तथा (ग घ)
४५ इत्येषा पञ्चमूलानाम्–इत्यासा पञ्चमूलीनाम् (ग. घ.)

ખાંડીને कूट कर, तस्मिन् તે उस, निर्यूहे ક્વાથમાં काथमें, विनीय ભેળવીને मिला कर, इमानि આ नीचे લખેલાં इन निम्न लिखित, चूर्णानि ચૂર્ણો चूर्णोंको, दापयेत् નાખવાં डाले ॥ ४१-४७ ॥

41-47. Take forty tolas of each of the five groups of penta-radices, a thousand fruits of chebulic myrobalans and thrice that number of fresh emblic myrobalans. The five groups, each group consisting of five roots, are as follows·— (a) Ticktrefoil, indian night shade, painted leaved uraria, yellow-berried night-shade, and small caltrops, constitute the first group called 'The ticktrefoil group.' (b) Bael tree, wind killer, indian calosanthes, white teak, wild snake gourd, constitute the second group called 'The bael group' (c) Hog's weed, the two surpa parnis viz., wild green gram, and wild black gram heart-leaved sida and castor oil plant constitute the third group called 'The castor oil plant group.' (d) Jivaka, rishabhaka, meda, cork swallow wort and climbing asparagus constitute the fourth group called 'The jivaka group.' (e) Small sacrificial grass, sugarcane, sacrificial grass, thatch grass and paddy roots constitute the fifth group called 'The grass group' Of each of these five groups of penta-radices, take as instructed above and mixing them, boil the whole in ten times the quantity of water; when the decoction has boiled down to a tenth of its quantity, it should be filtered and the fluid part kept. Take now the fruits of the chebulic and emblic myrobalans and after de-seeding and crushing them in a mortar with a pestle, throw the pulp into the decoction mentioned above.

मण्डूकपर्ण्याः पिप्पल्याः शङ्खपुष्प्याः प्लवस्य च ।
मुस्तानां सविडङ्गानां चन्दनागुरुणोस्तथा ॥४८॥
मधुकस्य हरिद्राया वचायाः कनकस्य च ।
भागांश्चतुष्पलान् कृत्वा सूक्ष्मैलायास्त्वचस्तथा ४९
सितोपलासहस्रं च चूर्णितं तुलयाऽधिकम् ।
तैलस्य ह्याढकं तत्र दद्यात त्रीणि च सर्पिषः ॥५०॥
साध्यमौदुम्बरे पात्रे तत् सर्वं मृदुनाऽग्निना ।
ज्ञात्वा लेह्यमदग्धं च शीतं क्षौद्रेण संसृजेत् ॥५१॥
क्षौद्रप्रमाणं स्नेहार्धं तत् सर्वं घृतभाजने ।
तिष्ठेत्संमूर्च्छितं तस्य मात्रां काले प्रयोजयेत् ॥५२॥
या नोपरुन्ध्यादाहारमेकं मात्रा जरां प्रति ।
षष्टिक पयसा चात्र जीर्णे भोजनमिष्यते ॥५३॥

मण्डूकपर्ण्या. બ્રાહ્મી ब्राह्मी, पिप्पल्या· પીપર पिप्पली शङ्खपुष्प्याः શંખાવળી शंखपुष्पी, प्लवस्य च કેવડીમોથ कैवर्तमुस्ता, सविडङ्गानाम् વાવડિંગસહિત वायविडगसहित, मुस्तानाम् નાગરમોથના मोथा, तथा તથા तथा, चन्दनागुरुणो શ્વેતચંદન અને અગર चन्दन और अगर, मधुकस्य જેઠીમધ मुलहठी, हरिद्रायाः હળદર हल्दी, वचाया વજ वच, कनकस्य च અને નાગકેસર और नागकेसर, सूक्ष्मैलाया. નાની એલચી छोटी इलायची, तथा त्वच तथा તજ तथा दालचीनी, चतुष्पलान् પ્રત્યેકના ૧૬ તોલાના प्रत्येकके १६ तोलेके, भागान् ભાગ भाग, कृत्वा લઈ ले कर, तत्र च તેમાં इनमें, चूर्णितम् ખાંડેલ बारीक की, तुलया अधिकम् સો પલની અધિકતાવાળી सौ पलकी अधिकतावाली, सहस्रम् એક હજાર પલ અર્થાત્ એક હજાર એકસો પલ एक हजार पल अर्थात् एक हजार एकसौ पल, सितोपला સાકર चीनी, तैलस्य

४८ प्लवस्य—फलस्य (प)

५१ लेह्यमदग्ध—लेह्मदग्ध (क, ब ज च फ.)

५३ आहारमेक—आहारमेवं (च प)

તલનું તેલ तैल, आढकम् ૫૧૨ તોલા ५१२ तोला, सर्पिषः અને ઘીના और घृतके, त्रीणि च ત્રણ આઢક (૭૬૮ તોલા) ७६८ तोले, दद्यात् મેળવવાં मिलावे, तत् તે इन, सर्वम् સર્વ सबको, औदुम्बरे તાંબાના तांबेके, पात्रे પાત્રમાં पात्रमें, मृदुना મંદ मद, अग्निना અગ્નિથી आँचसे, साध्यम् પકાવવું पकावे, लेह्यम् તેને ચાટવા જેવું लेह जैसा, अदग्धम् નહિ દાઝેલું न जला हुआ, शीतम् च તથા નીચે ઉતરતાં ઠંડું થયેલ तथा नीचे उतरने पर ठंडा हुआ, ज्ञात्वा જાણીને जान कर, क्षौद्रेण તેને મધની સાથે इसमें मधु, संसृजेत् મેળવવું मिलावे, क्षौद्रप्रमाणम् મધ મેળવવાનું પ્રમાણ मधुका प्रमाण, स्नेहार्धम् તેલના પ્રમાણથી અર્ધું લેવું तैलसे आधा ले, तत् આ यह, सर्वम् સર્વ सब, सम्मूर्च्छितम् કડછીથી મેળવીને मिला कर, घृतभाजने ઘીવાળા રીઢા પાત્રમાં घी चुपडे हुए पात्रमें, तिष्ठेत् રહેવા દેવું रक्खे, काले હમેશાં પ્રાતઃકાળમાં प्रतिदिन प्रातः, तस्य તે રસાયનની इस रसायनको, मात्राम् યોગ્ય માત્રા मात्राके अनुसार, प्रयोजयेत् લેવી उपयोग करे, या मात्रा જે માત્રા जो मात्रा, एकम् आहारम् કોઈ એક આહારને किसी एक आहारके, जराम् प्रति પચી જવા માટે पाचनमें, न उपरुन्ध्यात् ઉપરોધ કરનારી ન હોવી જોઈએ बाधक न होनी चाहिए, अत्र च આ રસાયન માત્રાના इस रसायनकी मात्रा, जीर्णे પચી ગયા પછી पच जानेपर, पयसा દૂધની સાથે दूधके साथ, षष्टिक. સાઠી ચોખા साठी चावलका, भोजनम् ભોજન માટે લેવા भोजन, इष्यते આ ઇચ્છવા યોગ્ય છે करना योग्य है ॥ ४८-५३ ॥

48-53 Add to this the powder of the following, the measure of each ingredient being 16 tolas—Indian pennywort, long pepper, kidney leaved ipomea, rush-nut, nut grass, embelia, sandalwood, aloe wood, liquorice, turmeric, sweet flag, fragrant poon, the small cardamom and cinnamon. Add to this the powder of sugar-candy, measuring 4,400 tolas in weight, 512 tolas of oil and 768 tolas of ghee. Boil all this in a copper vessel on a low fire, taking care to see that the decoction has passed into a linctus but is not burnt. Take it down and after it has cooled, add to it honey. The measure of honey to be added is half that of the oil and ghee combined. The whole linctus should be kept well-mixed in an earthen jar which has been saturated with ghee. It may then be administered in proper dosage and at the proper time. The dose should be such as not to interfere with the taking of the patient's meals. When the medicine has been digested, the patient should be given to eat a dish of shashtika rice with cow's milk.

वैखानसा वालखिल्यास्तथा चान्ये तपोधनाः ।
रसायनमिदं प्राश्य बभूवुरमितायुषः ॥ ५४ ॥
मुक्त्वा जीर्णं वपुश्चाग्र्यमवापुस्तरुणं वयः ।
वीततन्द्राक्लमश्वासा निरातङ्काः समाहिताः ॥५५॥
मेधास्मृतिबलोपेताश्चिररात्रं तपोधनाः ।
ब्राह्मं तपो ब्रह्मचर्यं चेरुश्चात्यन्तनिष्ठया ॥५६॥

वैखानसा. વાનપ્રસ્થો वानप्रस्थ, वालखिल्याः વાલખિલ્ય वालखिल्य, तथा च अन्ये અને બીજા तथा अन्य, तपोधनाः તપસ્વીઓ तपस्वियोंने, इदम् ઉપર કહેલા इस, रसायनम् બ્રાહ્મ રસાયનનો ब्राह्म रसायनका, प्राश्य ઉપયોગ કરીને उपयोग करके, अमितायुषः અમિત આયુષ્યવાળા दीर्घायु, बभूवु થયા હતા हुए थे, जीर्णम् જીર્ણ થઈ ગયેલા जीर्ण हुए, वपुः શરીરને शरीरको, मुक्त्वा બદલીને त्याग कर, अग्र्यम् શ્રેષ્ઠ नये, तरुणम् તરુણ तरुण, वय વયને वयको, अवापु પામ્યા હતા प्राप्त हुए थे, तपोधनाः તે તપોધનો वे तपोधन, वीततन्द्राक्लमश्वासा. તન્દ્રા, શ્રમ અને શ્વાસથી

५४. प्राश्य–प्राप्य (द. प.)

रहित तन्द्रा, थकान और श्वासरहित, निरातङ्काः નીરોગ रोगरहित, समाहिताः એકાગ્ર મનવાળા एकाग्र मनवाले, मेधा- તથા ધારણાશક્તિ मेधा स्मृति- સ્મરણશક્તિ स्मृति, बलोपेताः તથા બળથી યુક્ત થઈ तथा बलसे युक्त हो कर, अत्यन्तनिष्ठया અત્યંત નિષ્ઠા- પૂર્વક अत्यन्त निष्ठापूर्वक ब्राह्मम् ઉત્તમ ब्राह्म, तप તપ तप, ब्रह्मचर्यम् અને બ્રહ્મચર્ય और ब्रह्मचर्यको, चिररात्रम् લાંબા વખત સુધી दीर्घकाल तक, चेरु આચરતા હતા पालन करते थे ॥ ५४-५६ ॥

54-56 The hermits known as the Vaikhanasas and the Valakhilyas and likewise other celebrated ascetics attained immense longevity from the use of this 'Rasayana' Shuffling off their decayed bodies, they secured for themselves fresh youth, freed themselves from langour, weariness and dyspnea and were unhampered by disease, were single-minded, and endowed with intelligence, memory and strength. These mighty ascetics practised spiritual austerities and celibacy for unending years with exceeding devotion

रसायनमिदं ब्राह्ममायुष्कामः प्रयोजयेत् ।
दीर्घमायुर्वयश्चाग्र्यं कामांश्चेष्टान् समश्नुते ॥५७॥
(इति ब्राह्मरसायनम्)

आयुष्काम આયુષ્ય વધારવાની ઇચ્છાવાળા પુરુષે दीर्घ आयुकी इच्छावालेको, इदम् આ इस, ब्राह्मम् रसायनम् બ્રાહ્મ રસાયનનો ब्राह्म रसायनका, प्रयोजयेत् પ્રયોગ કરવો જોઈએ प्रयोग करना चाहिए, दीर्घम् એથી તે દીર્ઘ उसके कारण वह दीर्घ, आयु: આયુષ્યને आयु, अग्र्यम् શ્રેષ્ઠ श्रेष्ठ, वयः च જુવાની जवानी, इष्टान् અને ઇષ્ટ और अभीष्ट, कामान् च મનોરથોને પણ कामना ओंको भी, समश्नुते પ્રાપ્ત કરે છે प्राप्त करता है, इति ब्राह्म- रसायनम् આ બ્રાહ્મ રસાયન છે यह ब्राह्म रसायन है॥५७॥

५७. इति ब्राह्मरसायनम्—इति रसायनप्रयोगः प्रथमः (ब.)

57 This divine Rasayana should be made use of by one who desires long life, by so doing he will attain longevity, rejuvenation and all the desires of his heart. Thus has been described the Brahma Rasayana.

ब्राह्मरसायनं द्वितीयम्—

यथोक्तगुणानामामलकानां सहस्रं पिष्टस्वेदनविधिना पयस ऊष्मणा सुस्विन्नमनातपशुष्कमनस्थि चूर्णयेत् । तदामलकसहस्रस्वरसपरिपीतं स्थिरापुनर्नवाजीवन्तीनागबलाब्रह्मसुवर्चलामण्डूकपर्णी-शतावरीशङ्खपुष्पीपिप्पलीवचाविडङ्गस्वयङ्गुप्ताम्-ताचन्दनागुरुमधुकमधूकपुष्पोत्पलपद्ममालतीयुवतीयूथिकाचूर्णाष्टभागसंयुक्तं पुनर्नागबलासहस्रपलस्वरसपरिपीतमनातपशुष्कं द्विगुणितसर्पिषा क्षौद्रसर्पिषा वा क्षुद्रगुडाकृतिं कृत्वा शुचौ दृढे घृतभाविते कुम्भे भस्मराशेरधः स्थापयेदन्तर्भूमेः पक्षं कृतरक्षाविधानमथर्ववेदविदा, पक्षात्यये चोद्धृत्य कनकरजतताम्रप्रवालकालायसचूर्णाष्टभागसंयुक्तमर्धकर्षवृद्ध्या यथोक्तेन विधिना प्रातः प्रातः प्रयुञ्जानोऽग्निबलमभिसमीक्ष्य, जीर्णे च षष्टिकं पयसा ससर्पिष्कमुपसेवमानो यथोक्तान् गुणान् समश्नुत इति ॥५८॥

यथोक्तगुणानाम् પૂર્વોક્ત ગુણવાળાં पूर्वोक्त गुणवाले, आमलकानाम् આમળાંઓ आवलोंको, सहस्रम् १००० નગ १००० संख्यामें, पिष्टस्वेदन- પિષ્ટસ્વેદનની पिष्ट- स्वेदन विधिना વિધિથી विधिसे, पयस. દૂધની दूधकी, ऊष्मणा બાફથી भाफसे, सुस्विन्नम् સારી રીતે બાફીને भली भाति स्विन्न करके, अनातप- છાયામાં छायामें, शुष्कम् સૂકવીને सुखा कर अनस्थि ઠળિયા વિનાના કરીને गुठली निकालकर, चूर्णयेत् ચૂર્ણ કરવું चूर्ण करना चाहिए, तत् તે ચૂર્ણને इस चूर्णका, आमलक-

'१८. मधुकमधूकपुष्प—मधूकपुष्प (प
,, द्विगुणितसर्पिषा—द्विगुणितमधुसर्पिषा (य)
,, मथर्ववेदविदा—मथर्ववेदविद (ग.)
,, मर्धकर्षवृद्ध्या—अर्धाकर्षद्विगुणितसर्पिषा वृद्ध्या (य)

सहस्र- એક હજાર આમળાંના एक हजार आवलेके, स्वरसपरिपीतम् સ્વરસની ભાવના આપીને स्वरससे भावना दे कर, स्थिरा- શાલપર્ણી शालपर्णी, पुनर्नवा- પુનર્નવા पुनर्नवा, जीवन्ती- ખરખોડી जीवन्ती, नागबला- નાગબલા नागबला, ब्रह्मसुवर्चला સૂરજમુખી ब्रह्मसुवर्चला, मण्डूकपर्णी- બ્રાહ્મી मण्डूकपर्णी शतावरी- શતાવરી सतावर, शङ्खपुष्पी- શંખપુષ્પી शंखपुष्पी, पिप्पली- પીપર पिप्पली, वचा- વજ વચ, विडङ्ग- વાવડિંગ वायविडंग, स्वयङ्गुप्ता- કૌચાં कौंच, अमृता ગળો गिलोय, चन्दन- શ્વેતચંદન चन्दन, अगुरु- અગર अगुरु, मधुक જેઠીમધ मुलहठी, मधूकपुष्प મહુડાંના ફૂલ महुवेके फूल, उत्पल- નીલકમલ नील कमल, पद्म- કમળ पद्म, मालती- માલતી चमेली, युवती- જાઈ जूही, यूथिका- અને જૂઈનાં ફૂલો એઓના और यूथिका इनके, चूर्णाष्टभाग- આમળાંના ચૂર્ણના અષ્ટમાંશ જેટલા ચૂર્ણમાં आवलेके चूर्णसे अष्टमाश चूर्णमें, संयुक्तम् મેળવવુ मिलाये, पुनः ફરી તેને फिर उसको, नागबला- નાગબલાના नागबलाके, सहस्रपल- ૪૦૦૦ તોલા ४००० तोले, स्वरस- સ્વરસની स्वरससे, परिपीतम् ભાવના આપીને भावना देकर, अनातपशुष्कम् છાયામાં સૂકવીને छायामें सुखाकर, द्विगुणित- ચૂર્ણના પ્રમાણ કરતાં બમણા चूर्णके प्रमाणसे दुगुने, सर्पिषा ગાયના ઘીમાં घी, क्षौद्रसर्पिषा वा અથવા ચૂર્ણના તોલ પ્રમાણે એકત્ર કરેલાં ઘી તથા મધમાં નાખી या चूर्णके बराबर एकत्रित किये घी तथा मधुमे डाल कर, क्षुद्रगुडाकृतिम् રાબના રૂપમાં फाणितके आकारमें, कृत्वा બનાવીને बनाकर, शुचौ પવિત્ર पवित्र, दृढे મજબૂત मजबूत, घृतभाविते તથા અંદર ઘી ચોપડેલા अन्दर घृतसे लिप्त, कुम्भे ઘડામાં घड़ेमें रख कर, भूमेः જમીનમાં ખાડો ખોદીને जमीनमें गर्त खोद कर, अन्तः તેમાં इसमें, भस्मराशेः રાખના ઢગલા राखकी ढेरीके, अधः નીચે नीचे, अथर्ववेदविदा અથર્વવેદોક્ત મંત્રો જાણનારથી अथर्ववेदके जानने-वालेसे, कृतरक्षाविधानम् રક્ષાવિધાન કરાવીને रक्षा कराके, पक्षम् એક પખવાડિયુ पन्द्रह दिन तक, स्थापयेत् રાખવુ रख देवे, पक्षात्यये પખવાડિયુ પૂરુ થયા પછી पन्द्रह दिनके बाद, तदुद्धृत्य च બહાર કાઢીને તેમાં बाहिर निकाल कर उसमें, सुवर्ण- સુવર્ણ सुवर्ण, रजत- રજત चांदी, ताम्र- તામ્ર ताम्र प्रवाल- પ્રવાલ मूगा, कालायस- અને કાલલોહ और काललोह, चूर्णाष्टभाग- ચૂર્ણથી આઠમો ભાગ चूर्णसे आठवाँ भाग, संयुक्तम् ભેળવીને मिलाकर, अग्निबलम् જઠરાગ્નિનું બળ अग्निबलके, अभिसमीक्ष्य જોઈને अनुसार, अर्धकर्षवृद्धया અર્ધો અર્ધો તોલો વધારીને आधा आधा कर्ष बढ़ाते हुए, यथोक्तेन ઉપર દર્શાવ્યા પ્રમાણે यथोक्त, विधिना વિધિથી विधिसे, प्रातः प्रातः હમેશાં સવારમાં प्रतिदिन प्रात कालमे, प्रयुञ्जानः ઉપયોગ કરતો उपयोग करता हुआ, जीर्णे च અને જીર્ણ થયા પછી और जीर्ण हो जाने पर, पयसा દૂધ સાથે दूधके साथ, ससर्पिष्कम् ઘીવાળા घीसे युक्त, षष्टिकम् સાઠી ચોખાનુ साठी चावलका, उपसेवमानः સેવન કરતો મનુષ્ય सेवन करता हुआ मनुष्य, यथोक्तान् શાસ્ત્રમાં કહ્યા પ્રમાણે शास्त्रमें कहे अनुसार, गुणान् રસાયનના ગુણોને रसायनके गुणोंको, समश्नुते इति પ્રાપ્ત કરે છે प्राप्त करता है ॥५८॥

58. Take a thousand fruits of the emblic myrobalan, of the qualities described above. Soften them well by the steam-process by keeping over a kettle of boiling milk, and dry them in the shade and after de-seeding them, crush them to powder. This powder should then be macerated in the expressed juice of a thousand fresh fruits of the emblic myrobalan. Add to it the following, each, of the measure of an eighth part of the powder of the emblic myrobalan Tick-trefoil, hog's weed, cork swallow wort, gingo fruit, heliotrope, indian penny wort, climbing asparagus, kidney leaved ipomea, long pepper, sweet flag, embelia, cowage, guduch, sandal-wood, eagle-wood, liquorice and flowers of mahwah, blue water lily, lotus, arabian jasmine, rose,

small jasmine, yellow jasmine. The compound should then be macerated in the expressed juice of 4,000 tolas of gingo fruit plant It should then be dried in the shade Ghee of twice the measure oi ghee and honey of twice the measure should then be mixed with it The whole mass should be reduced to look like liquid gur and kept in a clean and strong earthen vessel that has been saturated with ghee. The vessel, having been sealed and made secure by one who is versed in the Atharveda, should be deposited under ground below a heap of ashes for a fortnight When the prescribed period is over it should be unearthed and the contents mixed with the powder of gold, silver, copper, coral and iron, the measure of these being one eighth of the whole mass It should be taken each morning in a gradually increasing dose, beginning with half a tola, with due heed to one's strength of digestion. When the dose has been fully digested, a meal consisting of cooked shashtika rice and milk seasoned with ghee, should be eaten Taking this medicine in this manner one attains all the benefits described earlier in the case of the first Brahma Rasayana.

भवन्ति चात्र—

इदं रसायनं ब्राह्मं महर्षिगणसेवितम् ।
भवत्यरोगो दीर्घायुः प्रयुञ्जानो महाबलः ॥५९॥
कान्तः प्रजानां सिद्धार्थश्चन्द्रादित्यसमद्युतिः ।
श्रुतं धारयते सत्त्वमार्षं चास्य प्रवर्तते ॥ ६० ॥
धरणीधरसारश्च वायुना समविक्रमः ।
स भवत्यविषं चास्य गात्रे संपद्यते विषम् ॥ ६१ ॥

(इति द्वितीयं ब्राह्मरसायनम्।)

अत्र च આ વિષયમાં इस विषयमें, भवन्ति શ્લોકો છે કે श्लोक है कि महर्षिगणसेवितम् મહર્ષિઓના સમુદાયે સેવેલા महर्षिसमूहसे सेवित, इदम् આ इस, ब्राह्मम् બ્રાહ્મ ब्राह्म, रसायनम् રસાયનનો रसायनको, प्रयुञ्जान પ્રયોગ કરતો પુરુષ सेवन करके मनुष्य, अरोग. રોગ વિનાનો नीरोग, दीर्घायु દીર્ઘ આયુષ્યવાળો दीर्घायु, महाबलः મહાન બળવાન बहुत बलवान, प्रजानाम् પ્રજાઓમાં प्रजाओंका, कान्त પ્રિય प्रिय, सिद्धार्थ દરેક મનોરથને સફળ કરનારો सिद्धमनोरथवाला, चन्द्रादित्य- તથા ચંદ્ર અને સૂર્યની तथा चँद्र और सूर्यके, समद्युति સમાન પ્રભાવાળો समान कान्तिवाला, भवति થાય છે होता है, श्रुतम् આ પુરુષ શાસ્ત્રાભ્યાસને यह पुरुष सुनते ही, धारयते ધારણ કરી શકે છે धारण कर लेता है, अस्य च અને એનુ और इसका, सत्त्वम् મન मन, आर्षम् ઋષિયોના જેવુ ऋषियोंके समान, प्रवर्तते થઈ જાય છે हो जाता है, स વળી તે फिर वह पुरुष, धरणीधरसारः च પર્વતના જેવી દૃઢતાવાળો पर्वतके समान सारवाला, वायुना અને વાયુના और वायुके, समविक्रम સમાન પરાક્રમવાળો समान पौरुषवाला, भवति થાય છે होता है, अस्य અને આના और इसके, गात्रे च ગાત્રમાં शरीरमें, विषम् च વિષ પણ विष भी, अविषम् અવિષ (પ્રભાવરહિત) अविष (प्रभावरहित), संपद्यते થાય છે होता है ॥ ५९-६१ ॥ (इति આ यह, द्वितीयम् બીજું दूसरा, ब्राह्मरसायनम् બ્રાહ્મ રસાયન છે ब्राह्मरसायन है।)

Here are verses again—

59-61. The Brahma Rasayana described above was made use of by the great sages Using it, one becomes

५९ अरोग.–अरोगी (ध)

६१. धरणीधर–पृथिवीधर (ग)

,, इति द्वितीय ब्राह्मरसायनम्–इति ब्राह्मरसायनेद्वितीययोगः (च.ध.)

immune to disease, long-lived, endowed with great strength, attractive to people, fulfilled of desires and equal in lustre to the sun and the moon One will be able to retain in memory all that one has heard, and will possess the mental faculties of the seers One will, moreover, have a frame like adamant and strength like that of the wind In such a body even poison will be rendered innocuous Thus has been described the second Brahma Rasayana.

च्यवनप्राश —

बिल्वोऽग्निमन्थ· श्योनाकः काश्मर्यः पाटलिर्बला ।
पर्ण्यश्चतस्रः पिप्पल्यः श्वदंष्ट्रा बृहतीद्वयम् ॥६२॥
शृङ्गी तामलकी द्राक्षा जीवन्ती पुष्कराग्रुरु ।
अभया चामृता ऋद्धिर्जीवकर्षभकौ शटी ॥६३॥
मुस्तं पुनर्नवा मेदा सैला चन्दनमुत्पलम् ।
विदारी वृषमूलानि काकोली काकनासिका ॥६४॥
एषां पलोन्मितान् भागाञ्छतान्यामलकस्य च ।
पञ्च दद्यात्तदैकध्यं जलद्रोणे विपाचयेत् ॥६५॥
ज्ञात्वा गतरसान्येतान्यौषधान्यथ तं रसम् ।
तच्चामलकमुद्धृत्य निष्कुलं तैलसर्पिषोः ॥६६॥
पलद्वादशके भृष्ट्वा दत्त्वा चार्धतुलां भिषक् ।
मत्स्यण्डिकायाः पूताया लेहवत्साधु साधयेत् ॥६७॥
षट्पलं मधुनश्चात्र सिद्धशीते प्रदापयेत् ।
चतुष्पलं तुगाक्षीर्याः पिप्पलीद्विपलं तथा ॥६८॥
पलमेकं निदध्याच्च त्वगेलापत्रकेशरात् ।
इत्ययं च्यवनप्राशः परमुक्तो रसायनः ॥६९॥
कासश्वासहरश्चैव विशेषेणोपदिश्यते ।
क्षीणक्षतानां वृद्धानां बालानां चाङ्गवर्धनः ॥७०॥
स्वरक्षयमुरोरोगं हृद्रोग वातशोणितम् ।
पिपासां मूत्रशुक्रस्थान् दोषांश्चाप्यपकर्षति ॥७१॥
अस्य मात्रां प्रयुञ्जीत योपरुन्ध्यान्न भोजनम् ।
अस्य प्रयोगाच्च्यवनः सुवृद्धोऽभूत् पुनर्युवा ॥७२॥

मेधां स्मृतिं कान्तिमनामयत्व-
आयुःप्रकर्षं बलमिन्द्रियाणाम् ।
स्त्रीषु प्रहर्षं परमग्निवृद्धिं
वर्णप्रसादं पवनानुलोम्यम् ॥ ७३ ॥
रसायनस्यास्य नरः प्रयोगा-
ल्लभेत जीर्णोऽपि कुटीप्रवेशात् ।
जराकृतं रूपमपास्य सर्वं
बिभर्ति रूपं नवयौवनस्य ॥ ७४ ॥

(इति च्यवनप्राशः।)

बिल्व- બીલી बिल्व, अग्निमन्थौ અરણી अग्निमन्थ, श्योनाक· અરલુ श्योनाक, काश्मर्य સીવણ गम्भारी, पाटलि પાડળમૂળ पाटला, बला ખપાટ बला, चतस्र पर्ण्य ચાર પર્ણી—શાલપર્ણી, પૃશ્નિપર્ણી, મુદ્ગપર્ણી અને માષપર્ણી चार पर्णिया—शालपर्णी, पृश्निपर्णी, मुद्गपर्णी और माषपर्णी, पिप्पल्य· પીપર पिप्पली, श्वदंष्ट्रा ગોખરુ गोखरू, बृहतीद्वय ઊભી ભોરી ગણી, બેઠી ભોરી ગણી छोटी कटेरी, बडी कटेरी शृङ्गी કાકડાશીંગી काकडाशृङ्गी, तामलकी ભોંઆમલી भुई आवला, द्राक्षा કાળી દ્રાક્ષ द्राक्ष, जीवन्ती ખરખોડી जीवन्ती, पुष्कर- પુષ્કરમૂળ पुष्करमूल, अगुरु અગર अगुरु अभया હરડે हरड़, अमृता च ગળો गिलोय, ऋद्धि ઋદ્ધિ ऋद्धि, जीवक- જીવક जीवक, ऋषभकौ ઋષભક ऋषभक, शटी કચૂરો कचूर, मुस्तम् મોથ मुस्ता, पुनर्नवा સાટોડી पुनर्नवा,

६२ श्योनाक काश्मर्यः–स्योनाक काश्मरी (क)
६४ सैला–एला (ध.)
,, सैला चन्दनमुत्पलम्–सूक्ष्मैलोत्पलचन्दने (ग ध.)
६५. दद्यात्तदैकध्य–दद्यात्तदेकत्र (घ)
६६ निष्कुल तैलसर्पिषो –कुडव तैलसर्पिषो (ध)
६७ साधु साधयेत्–साधयेद्भिषक् (ध)
६८. प्रदापयेत्–समावपेत् (क, घ, च छ.)
६९. च्यवनप्राश –च्यावनप्राश (फ)
७३. स्त्रीषु प्रहर्ष–स्त्रीषु प्रकर्ष (ध)
,, वर्णप्रसाद–विवर्णसादं (ध)
७४ सर्व–पूर्व (ध)
,, नवयौवनस्य–नवयौवनानाम् (ध)
,, इति च्यवनप्राश –इति च्यवनप्राशरसायन तृतीययोग·(ध)

सैला એલચી સાથે इलायचीके साथ, मेदा મેદા मेदा, चन्दनम् શ્વેત ચન્દન चन्दन, उत्पलम् કાળું કમળ नीलोफर, विदारी વિદારીકંદ विदारीकंद, वृषमूलानि અરડૂસાનાં મૂળ अडूसेकी जड़, काकोली કાકોલી काकोली, काकनासिका કાકડોળીઓ काकनासिका, एषाम् આ ઔષધોના इन औषधोंके, पलोन्मितान् પ્રત્યેકના ૪--૪ તોલા प्रत्येकके ४ ४ तोले, भागान् ભાગ भाग, आमलकस्य અને આમળાં और आवले, पञ्चशतानि च ૫૦૦ નંગ ૫૦૦ गिनतीमें, दद्यात् લેવાં लेवे, तत् આ સર્વને इन सबको, जलद्रोणे ૧૦૨૪ તોલા પાણીમાં १०२४ तोले जलमे, ऐकध्यम् એકઠાં કરીને एकसाथ, विपाचयेत् ઉકાળવાં पकाये, एतानि આ બધાં इन सब, औषधानि ઔષધોનો ओषधियोंका, गतरसानि રસ નીકળી ગયો છે रस निकल गया है, ज्ञात्वा એમ જાણી ऐसा समझ कर, तम् रसम् તે રસને उस रसको, आमलकम् અને આમળાંને और आवलोंको, उद्धृत्य च બહાર કાઢીને निकाल कर, निष्कुलम् ઠળિયા વિનાનાં કરીને गुठलीसे रहित कर, तैलसर्पिषो મેળવેલાં તેલ અને ઘી मिलाये हुए तैल और घृत, पलद्वादशके ૪૮ તોલામાં बारह पलमें, भृष्ट्वा શેકીને भून कर, पूताया તેમાં શુદ્ધ उनमे शुद्ध, मत्स्यण्डिकाया દાણાદાર ખાંડ दानेदार खाड, अर्धतुलाम् च ૨૦૦ તોલા ५० पल, दत्त्वा ભેળવીને मिला कर, भिषक् વૈદ્ય वैद्य, लेहवत् અવલેહની પેઠે अवलेहके समान, साधु ધીમી ધીમી આંચથી मन्द मन्द आचसे, साधयेत् પકાવવાં पकाये, सिद्धशीते આ અવલેહ જેવો પદાર્થ થઈ ઠંડો થયા પછી अवलेह जैसे सिद्ध हुए इस पदार्थके शीतल होने पर, अत्र એમાં इसमें, मधुन. મધ मधु, षट्पलम् ૨૪ તોલા २४ तोले, तुगाक्षीर्या વંશલોચન वंशलोचन, चतुष्पलम् ૧૬ તોલા १६ तोले, तथा તથા तथा, पिप्पलीद्विपलम् પીપર ૮ તોલા पिप्पली ८ तोले, प्रदापयेत् નાખવાં मिलाये, त्वक्-तज दालचीनी, एला- એલચી इलायची, पत्र- તમાલપત્ર तेजपत्र, केशरान् અને નાગકેશર और नागकेशर, एकम् એક એક एक एक, पलम् च પલ पल, निदध्यात् મેળવવું मिलाये, इति આ પ્રમાણે इस प्रकार. अयम् આ इस, च्यवनप्राशः ચ્યવનપ્રાશને च्यवनप्राशको, परम् ઉત્તમ श्रेष्ठ, रसायन. રસાયન रसायन,

उक्त કહેલ છે कहा है, विशेषेण અને તે ખાસ કરીને और वह विशेष कर, कास- કાસ कास, श्वासहरः च एव અને શ્વાસને હરનારો और श्वासनाशक, उपदिश्यते કહેવામાં આવે છે कहा जाता है, क्षीण- ક્ષીણ થયેલાઓને क्षीण, क्षतानाम् જેઓને છાતીમાં ક્ષત થયેલ હોય તેઓને क्षत, वृद्धानाम् વૃદ્ધોને वृद्ध, बालानाम् च તથા બાળકોને માટે तथा बालकोंके लिए, अङ्गवर्धन અંગોની વૃદ્ધિ કરનારો છે अंगवर्धक है, स्वरक्षयम् સ્વરક્ષયને स्वरक्षय, उरोरोगम् છાતીના રોગને छातीके रोग, हृद्रोगम् હૃદ્રોગને हृदयरोग, वातशोणितम् વાતરક્તને वातरक्त, पिपासाम् પિપાસાને प्यास, मूत्र- शुक्रस्थान् અને મૂત્રના તથા શુક્રના और मूत्र तथा शुक्रके, दोषान् च अपि દોષોને दोषको, अपकर्षति હઠાવે છે नष्ट करता है, अस्य આ ચ્યવનપ્રાશ અવલેહની इस च्यवनप्राशको, मात्राम् તે માત્રાનો उस मात्रामें प्रयुञ्जीत ઉપયોગ કરવો खाये, या જે जो, भोजनम् ભોજન લેવામાં भोजन लेनेमें, न उपरुन्ध्यात् હરકત ન કરે रुकावट न करे, अस्य આ રસાયનના इस रसायनके, प्रयोगात् પ્રયોગથી प्रयोगसे, सुवृद्ध સારી રીતે વૃદ્ધ થઈ ગયા છતાં પણ अति वृद्ध, च्यवनः ચ્યવન ઋષિ च्यवन ऋषि, पुन ફરીથી फिरसे, युवा નવયુવાન युवा, अभूत થયા હતા बन गये थे, नर: પુરુષ पुरुष, जीर्ण शरीरे જીર્ણ થયો હોય जीर्ण होने पर, अपि છતાં પણ भी, अस्य रसायनस्य આ ચ્યવનપ્રાશ રસાયનનો इस च्यवनप्राश रसायनको, कुटी-प्रवेशात् કુટી પ્રાવેશિક વિધિથી कुटीप्रवेशकी विधिके अनुसार, प्रयोगात् પ્રયોગ કરે તો प्रयोग करे तो, मेधाम् ધારણાશક્તિ धारणाशक्ति, स्मृतिम् સ્મૃતિ स्मृति, कान्तिम् કાંતિ कान्ति, अनामयत्वम् આરોગ્ય नीरोगता, आयु प्रकर्षम् દીર્ઘાયુ आयुकी वृद्धि, इन्द्रियाणाम् અને ઇન્દ્રિયોનું और इन्द्रियोंका, बलम् બલ बल, स्त्रीषु સ્ત્રીઓના સેવનમાં स्त्रियोंको भोगनेमें, परम् प्रहर्षम् અતિહર્ષ अतिशय हर्ष, अग्निवृद्धिम् જઠરાગ્નિની વૃદ્ધિ अग्निकी वृद्धि, वर्णप्रसादम् શરીરના વર્ણની નિર્મળતા वर्णकी निर्मलता, पवन- અને વાયુની और वायुकी, आनुलोम्यम् અનુલોમ ગતિને अनुलोम गतिको, लभेत પ્રાપ્ત કરે છે प्राप्त करता है, जराकृतम्

તેમજ વૃદ્ધાવસ્થાએ કરેલા एवं वृद्धावस्थासे प्राप्त, सर्वद् સર્વ સ્વ. रूपम् રૂપનો रूपको, अपास्य ત્યાગ કરીને छोड कर, नवयौवनस्य નવયૌવનના नूतन यौवनके रूपम् રૂપને रूपको, बिभर्ति ધારણ કરે છે धारण करता है ॥ ६२-७४ ॥ (इति આ यह, च्यवनप्राश. ચ્યવનપ્રાશ છે च्यवनप्राश है।)

62-74 Take 4 tolas of each of the following —Bael, wind killer, indian trumpet flower, white teak, trumpet flower, heart leaved sida, the four parnis, tick trefoil, painted leaved uraria, wild green gram and wild black gram, long pepper, small caltrops, the two Brihatis, viz ; indian night-shade and yellow-berried night shade, galls, tamalaki, grapes, cork swallow-wort, german iris, eagle-wood, chebulic myrobalans, heart-leaved moon-seed, riddhi, jiwaka, rishabhaka, zedoary, nut grass, hog's weed, meda, cardamom, sandal-wood, blue lily, white yam, vasaka root, kakoli, and small stinking swallow wort; to these add five hundred fruits of the emblic myrobalans Boil the whole in 1024 tolas of water. On ascertaining that the drugs have been thoroughly decocted, the brew together with emblic myrobalans, should be taken down The myrobalans should be removed and de-seeded They should then be fried in 48 tolas of ghee and oil The physician should then boil the fried substance in the decoction already obtained adding to it two hundred tolas of pure candied sugar He should keep stirring the whole with a clean iron ladle till it is reduced to ths proper consistency, when it should be taken down. After it has cooled, mix it with 24 tolas of honey, 16 tolas of bamboo manna, 8 tolas of long pepper, 4 tolas of cinnamon bark, cardamoms, the leaves of the cinnamon tree and of fragrant poon combined and all ground to powder This is that very Chyavana-prasa the elixir of the Rishi Chyavana, which is celebrated as the highest Rasayana It is specially recommended for the cure of cough and dyspnea and as a body-builder for the wasted, for those suffering from pectoral lesions, the old and for the children. It also subdues such disorders as loss of voice, diseases of the chest, diseases of the heart, thirst and disorders of the rheumatic condition It should be made use of in such doses as will not interfere with the ordinary eating of meals By its use, Chyavana, though grown very old, became young once again Intelligence, memory, lustre, immunity from disease, longevity, increased sense power, amative delights, hightened activity of the gastric fire, clearness of complexion, the regularity of the peristalsis —all this does a man obtain from the use of this Rasayana By retiring into a retreat and resorting to this medicine a man will shed his infirmities and emerge with fresh youth. Thus has been described the 'Chyavana-prasa linctus'

आमलकरसायनम्—

अथामलकहरीतकीनामामलकविभीतकानां हरी-

७५. अथ-अथ च (थ)

तकीविभीतकानामामलकहरीतकीविभीतकानां वा पलाशत्वगवनद्धानां मृदाऽवलिप्तानां कुकूलस्विन्नानामकुलकानां पलसहस्रमुलूखले संपोथ्य दधिघृतमधुपललतैलशर्करासंयुक्तं भक्षयेदनन्नभुग्यथोक्तेन विधिना; तस्यान्ते यवाग्वादिभिः प्रत्यवस्थापनम्, अभ्यङ्गोत्सादनं सर्पिषा यवचूर्णैश्च, अयं च रसायनप्रयोगप्रकर्षो द्विस्तावदग्निबलमभिसमीक्ष्य, प्रतिभोजनं यूषेण पयसा वा षष्टिकः ससर्पिष्कः, अतः परं यथासुखविहारः कामभक्ष्यः स्यात्। अनेन प्रयोगेणर्षयः पुनर्युवत्वमवापुर्बभूवुश्चानेकवर्षशतजीविनो निर्विकाराः परंशरीरबुद्धीन्द्रियबलसमुदिताश्चेरुश्चात्यन्तनिष्ठया तपः ॥७५॥

(इति चतुर्थामलकरसायनम्।)

अथ आमलक- આમળાં आवले, हरीतकीनाम् અને હરડે और हरड़ आमलक- અથવા આમળાં या आवले, बिभीतकानाम् અને બહેડાં और बहेड़े, हरीतकी- અથવા હરડે या हरड़, बिभीतकानाम् અને બહેડાં और बहेड़े, आमलक- અથવા આમળાં या आवले, हरीतकी- હરડે हरड़ बिभीतकानाम् वा અને બહેડાં એઓને और बहेड़े इनको पलाशत्वक्- ખાખરાની તાજી છાલથી ढाककी ताजी छालमें अवनद्धानाम् લપેટીને लपेट कर, मृदा तथा તે ઉપર ચીકણી માટી इनके ऊपर चिकनी मिट्टी, अवलिप्तानाम् ચોપડીને लगा कर, कुकूलक- અડાયાંના અગ્નિથી उपलोंकी अग्निसे, स्विन्नानाम् બાફીને स्वेदन कर, अकुलकानाम् તે સર્વના ઠળિયા કાઢીને फिर इनकी गुठलियोंको निकाल कर, पलसहस्रम् ४००० તોલા પ્રમાણમાં લઈને एक हजार पलको, उलूखले ખાંડણિયામાં ऊखलमें, संपोथ्य ખાંડીને कूट कर, दधि દહીં दही, घृत- ઘી घृत, मधु- મધ मधु, पलल- તલનો કલ્ક तिलकल्क, तैल તેલ तैल, शर्करा- અને સાકર और शर्करा, संयुक्तम् મિશ્રિત કરીને मिला कर, अनन्नभुक् કંઈ પણ અન્ન ખાધા સિવાય बिना कुछ खाये, यथोक्तेन ઉપર કહેલ કુટીપ્રાવેશિક यथोक्त, विधिना વિધિથી विधिसे, भक्षयेत् ખાવું सेवन करे, तस्य अन्ते તે પછી इसके बाद, यवाग्वादिभिः યવાગૂ વગેરેના ક્રમથી यवागूआदिके क्रमसे, प्रत्यवस्थापनम् પ્રયોગ કરનારને પ્રકૃતિમાં લાવવો प्रयोग करनेवालेको प्रकृतिमें ले आये, सर्पिषा ઘીથી घृतसे, यवचूर्णैः च અને યવચૂર્ણથી और यवचूर्णसे, अभ्यङ्गोत्सादनम् અભ્યંગ અને ઉત્સાદન કરવું अभ्यंग और उत्सादन करे, अयम् આ इस, रसायन- રસાયનનો रसायनका, प्रयोगप्रकर्ष च પ્રયોગ વધારેમાં વધારે प्रयोग अधिकसे अधिक, द्वि तावत् દિવસમાં બે વાર दिनमें दो बार, अग्निबलम् જઠરાગ્નિના બળને अग्निके बलको अभिसमीक्ष्य જોઈ કરવો देख कर करे, प्रतिभोजनम् અને ભોજન સમયે और भोजनके समय, यूषेण યૂષની સાથે यूषके साथ, पयसा वा અથવા દૂધની સાથે अथवा दूधके साथ, ससर्पिष्क- ઘીવાળા घृतयुक्त, षष्टिक સાઠી ચોખાનું ભોજન કરે साठीके भातको खाये, अतः परम् ત્યાર પછી तदनन्तर, यथासुखविहार- શરીરને માફક આવે તેવો વિહાર शरीरके आरोग्यके अनुकूल विहार, कामभक्ष्य- च અને યથેચ્છ આહાર કરનાર और यथेच्छ आहार करनेवाला, स्यात् થવું बने, ऋषय ઋષિઓ ऋषिलोग, अनेन આ इस, प्रयोगेण પ્રયોગથી प्रयोगसे, पुनर्युवत्वम् નવી યુવાની पुनः युवा, अवापु પામ્યા હતા हो गये थे, अनेक- અનેક अनेक, वर्षशतजीविन- સેંકડો સુધી જીવનારા सैकड़ों वर्ष तक जीवित रहनेवाले, निर्विकाराः च અને નીરોગ और नीरोग, बभूवु થયા હતા हुए थे शरीर- તેમજ શરીર एवं शरीर, बुद्धि- બુદ્ધિ बुद्धि, इन्द्रिय- અને ઇન્દ્રિયોના और इन्द्रियोंके, बलसमुदिता- બળથી યુક્ત થઈને बलसे युक्त हो कर, अत्यन्तनिष्ठया અત્યન્ત નિષ્ઠાપૂર્વક अत्यन्त निष्ठासे, परम् શ્રેષ્ઠ श्रेष्ठ, तप તપ तपको, चेरु આચરતા હતા करते रहे थे ॥ ७५ ॥ (इति આ यह चतुर्थ- ચોથું चौथा, आमलकरसायनम् આમલક રસાયન છે आमलक रसायन है)

७ सपोथ्य–सपेष्य (ढ)
,, शर्करासंयुक्तम्–शर्करासम्प्रयुक्तम् (थ)
,, यवाग्वादिभि प्रत्यवस्थापनम–यवाग्वादिरसैः प्रकृत्यवस्थापनम् (थ.)
,, प्रत्यवस्थापनम्–प्रकृत्यवस्थापनम् (ध ध)
,, अयं च–अपि च (ख)
,, अयं च रसायनप्रयोगप्रकर्षो–अपि चास्य रसायनप्रयोगस्य(क.)
,, यथासुखविहार –यथासुखविचार (थ)
,, अनेकवर्ष–अनेन वर्ष (ध)
,, °निष्ठया तप –°निष्ठं तप इति (त)
,, इति चतुर्थामलकरसायनम्–इति रसायनप्रयोगश्चतुर्थः (थ.)

75 Take a quantity of chebulic and emblic myrobalans or of emblic and beleric myrobalans, or chebulic and beleric myrobalans, or of all the three-chebulic, emblic and beleric. Wrap them in the bark of the palasa tree and smearing the exterior of the bundle with clay, heat them over a cowdung fire Removing the stones take a quantity weighing 4,000 tolas Crush this in a stone-mortar Mixing the paste with an equal quantity of curds, ghee, honey, til paste, til oil and sugar, take according to the rules laid down earlier, abstaining from diet the while. Thereafter the return to the normal mode of diet should be gradually effected through the taking of gruel etc., and one should take inunction with ghee and massage with the powder of barley. This may be increased to a course of two doses a day according to the strength of digestion The transition to normal diet must be effected through a course of cooked shashtikarice, seasoned with ghee taken either with gruel or milk Thereafter, one may conduct oneself according to one's inclinations and eat whatever one desires By the use of this Rasayana the sages regained their youth, lived for hundreds of years free from disease Besides possessed of the strength of body, mind and senses, they were able to prosecute their austerities with the greatest devotion. Thus has been described the fourth variety of Emblic Myrobalan Vitalizer.

हरीतक्यादियोगः —

हरीतक्यामलकबिभीतकपञ्चपञ्चमूलनिर्यूहे पिप्पलीमधुकमधूककाकोलीक्षीरकाकोल्यात्मगुप्ता-जीवकर्षभकक्षीरशुक्लाकल्कसप्रयुक्तेन विदारीस्वरसेन क्षीराष्टगुणसंप्रयुक्तेन च सर्पिषः कुम्भं साधयित्वा प्रयुञ्जानोऽग्निबलसमां मात्रां जीर्णे च क्षीरसर्पिर्भ्यां शालिषष्टिकमुष्णोदकानुपानमश्नञ्जराव्याधिपापाभिचारव्यपगतभयः शरीरेन्द्रियबुद्धिबलमतुलमुपलभ्याप्रतिहतसर्वारम्भः परमायुरवाप्नुयात् ॥ ७६ ॥

(इति पञ्चमो हरीतकीयोगः।)

हरीतकी- હરડે हरड, आमलक- આમળાં आवला, बिभीतक- બહેડાં बहेडा, पञ्च-पञ्चमूल- અને પાંચે પંચમૂળ और पाचों पचमूल, निर्यूहे તેઓના કવાથમાં इनके क्वाथमें, पिप्पली- પીપર पिप्पली, मधुक- જેઠીમધ मुलहठी, मधूक- મહુડાં महुवा, काकोली- કાકોલી काकोली, क्षीरकाकोली- ક્ષીરકાકોલી क्षीरकाकोली, आत्मगुप्ता- કૌચાં कौच, जीवक- જીવક जीवक, ऋषभक- ઋષભક ऋषभक, क्षीरशुक्ला- અને ક્ષીરવિદારી और क्षीरविदारी, कल्क- એઓના કલ્કથી इनके कल्कसे, सप्रयुक्तेन યુક્ત युक्त, क्षीर-अष्टगुण- આઠ ગણા ગાયના દૂધથી आठ गुने गौके दूधसे, सप्रयुक्तेन મેળવેલ मिलाया, विदारी- વિદારીકંદનો विदारीकंदका, स्वरसेन च સ્વરસ મેળવીને स्वरस मिलाकर, सर्पिषः ગાયનું ઘી घी, कुम्भम् २०४८ તોલા २०४८ तोले, साधयित्वा ઘૃતપાકની રીતથી તૈયાર કરીને घृतपाक विधिसे पका कर, अग्निबल- અગ્નિબળને अग्निबलके, समाम् યોગ્ય समान, मात्राम् માત્રાનો मात्रामे, प्रयुञ्जानः

७६ बिभीतकपञ्चपञ्चमूल°—बिभीतकपञ्चमूल° (प)
,, निर्यूहे—निर्यूहेण (थ)
, क्षीरशुक्लाकल्कसप्रयुक्तेन—क्षीरशुक्लामलककल्कसंप्रयुक्तेन (थ.)
,, प्रयुञ्जानोऽग्निबलसमा मात्रा—प्रयुञ्जीताग्निबल समवेक्ष्य (च ध क)
, शरीरेन्द्रियबुद्धिबलम्—शरीरबुद्धीन्द्रियबलम् (थ)
,, इति पञ्चमो हरीतकीयोग —इति रसायनप्रयोगः पञ्चमः (थ)
,, , —इति पञ्चमामलकरसायनम् (स.)

101. In the fever wherein the discordance of the vata is great, of the pitta moderate, and of the kapha slight, the following are considered to be the symptoms—dyspnea, cough, coryza, dryness of the mouth and severe pain in the sides.

वर्चोभेदोऽग्निदौर्बल्यं तृष्णा दाहोऽरुचिर्भ्रमः ।
कफहीने वातमध्ये लिङ्गं पित्ताधिके विदुः ॥ १०२॥

कफहीने કફની ન્યૂનતાવાળા हीनकफ, वातमध्ये વાતની મધ્યમતાવાળા मध्यवात, पित्ताधिके અને પિત્તની અધિકતાવાળા સન્નિપાતજ્વરમાં और पित्ताधिक सन्निपातज्वरमें, वर्चोभेद મળભેદ मलभेद, अग्निदौर्बल्यम् અગ્નિની દુર્બળતા अग्निकी दुर्बलता, तृष्णा તૃષા प्यास, दाहः દાહ दाह, अरुचि અરુચિ अरुचि, भ्रम અને ભ્રમ और चक्कर, लिङ्गम् એ લક્ષણો इन लक्षणोंको, विदु વૈદ્યો જાણે છે वैद्य जानते है ॥ १०२ ॥

102 In the fever wherein the discordance of the pitta is great, of the vata is moderate and of the kapha slight, the following symptoms are observed—loose stools, weakness of the gastric fire, thirst, burning, anorexia and giddiness.

सन्निपातज्वरस्य सामान्यलक्षणम्—

सन्निपातज्वरस्योर्ध्वमतो वक्ष्यामि लक्षणम् ।
क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा ॥१०३॥
सास्रावे कलुषे रक्ते निर्भुग्ने चापि दर्शने ।
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः ॥१०४॥
तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः ।
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम्॥ १०५॥
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ।
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा ॥१०६॥
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ।
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम् ॥१०७॥
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ।
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च ॥१०८॥
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः ।

अत. ऊर्ध्वम् હવે પછી इसके आगे, सन्निपातज्वरस्य સન્નિપાતજ્વરનાં सन्निपातज्वरके, लक्षणम् લક્ષણ लक्षण, वक्ष्यामि કહીશ कहूंगा, क्षणे दाह. ઘડીભર દાહ થાય क्षणमें दाह, क्षणे शीतम् ઘડીભર ટાઢ લાગે क्षणमें शीत, अस्थि-सन्धि-शिर -रुजा હાડકાંઓ, સાંધાઓ અને શિરમાં પીડા हड्डियों, संधियों और शिरमें दर्द, सास्रावे આંસુથી ભરાયેલ अश्रुपूर्ण, कलुषे મલિન कलुषित, रक्ते લાલ लाल, निर्भुग्ने च अपि તથા વાંકી और टेढे हुए, दर्शने આંખો नेत्र, सस्वनौ અવાજસહિત शब्द, सरुजौ અને પીડા સહિત एव पीड़ा जिनमें हों ऐसे, कर्णौ કાન कान, शूकैः શૂક शूकोंसे, आवृतः इव જાણે ભરાઈ ગયા હોય એવો आवृतकी तरह प्रतीत होता हुआ, कण्ठः કંઠ गला, तन्द्रा તન્દ્રા तन्द्रा, मोह મૂર્છા मोह प्रलाप च પ્રલાપ प्रलाप, कास ખાંસી कास, श्वास શ્વાસ श्वास, अरुचिः અરુચિ अरुचि, भ्रम ભ્રમ भ्रम, परिदग्धा ચોતરફ દાઝી ગયેલા જેવી चारों ओर दग्धके सदृश पीलीकाली, खरस्पर्शा અને ખરસટ और खर स्पर्शवाली, जिह्वा જીભ

१०२ वर्चोभेदो—पर्वभेदो (च द ध)
,, वर्चोभेदोऽग्निदौर्बल्य—पर्वभेदोऽग्निमान्द्यं च (ध)

१०४ निर्भुग्ने—निर्भग्ने (ग)
,, चापि दर्शने—चापि लोचने (थ ध फ.)
१०८. मूकत्व—पूतित्वम् (प.)

जिह्वा, परम् तथा અત્યંત अतीव, स्रस्ताङ्गता અંગોની શિથિલતા शरीरका शिथिल होना, कफेन કફની સાથે कफसे, उन्मिश्रितस्य મિશ્રિત मिश्रित रक्तपित्तस्य રક્ત અને પિત્તનું रक्त तथा पित्तका, ष्ठीवनम् થૂંકવુ थूकना, शिरस માથાનું शिरका, लोठनम् આમ તેમ ફેરવવું इधर उधर पटकना, तृष्णा તૃષા प्यास, निद्रानाश નિદ્રાનાશ निद्रानाश, हृदि અને હૃદયમાં हृदयमें, व्यथा વ્યથા व्यथा, स्वेद-मूत्र-पुरीषाणाम् પરસેવા, મૂત્ર અને મળનું पसीना, मूत्र और मलका, अल्पशः થોડા પ્રમાણમાં अल्प मात्रामें, चिरात् અને લાંબે સમયે और देरसे, दर्शनम् દેખાવુ दिखाई देना, गात्राणाम् ગાત્રો अंगोंका, न अति कृशत्वम् અતિ કૃશ ન થવાં अतिकृश न होना, प्रततम् નિરંતર निरंतर, कण्ठकूजनम् ગળામાંથી અવાજ નીકળવો कण्ठका कूजन, श्यावरक्तानाम् કાળાશ લેતા લાલ રંગના श्याव और रक्त वर्णके, कोठानाम् કોઠ कोठ, मण्डलानाम् च અને ચકામાં एव चकत्तोंका, दर्शनम् દેખાવાં दिखाई देना मूकत्वम् મૂંગાપણુ मूकता, स्रोतसाम् સ્રોતોનુ स्रोतोंका, पाकः પાકવું पक जाना, उदरस्य च અને પેટનું उदरका, गुरुत्वम् ભારેપણું भारी होना, दोषाणाम् તથા દોષોનો दोषोंका, चिरात् पाकः च લાંબે કાળે પાક देरसे पकना, सन्निपात- ज्वराकृति આ સર્વ સન્નિપાત-જ્વરનાં લક્ષણ છે ये सब सन्निपातज्वरके लक्षण है ॥ १०३-१०८½ ॥

103-108½. We shall now describe the characteristics of fever wherein the discordance of the three humors is equally severe Sudden alternation of burning and cold aches in the bones, joints and the head; eyes watering, dull, injected with blood and twisted awry; pain and buzzing noise in the ears, sensation in the throat as if pricked on all sides by thorns; torpor, stupefaction, raving, cough, dyspnea, anorexia, giddiness, tongue scorched as though by fire and rough to the touch, utter lassitude of the limbs, spitting of blood or bile mixed with phlegm, restless tossing of the head, thirst, loss of sleep, pain in the chest, delayed and scanty discharge of perspiration, urine and stools, slight emaciation of the limbs, continuous stertorous sounds in the throat, emergence of circular wheels or rashes of dark-red color, inaudibility of voice, inflammation of the body-channels, heaviness of the stomach and delayed maturing of the morbid humors—these are the manifestations of the fever of tridiscordance type.

सन्निपातज्वरस्य साध्यासाध्यलक्षणम्—

दोषे विबद्धे नष्टेऽग्नौ सर्वसंपूर्णलक्षणः ॥१०९॥
सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्त्वतोऽन्यथा ।

दोषे विबद्धे મળની કબજિયાત હોય दोषका विबंध होने पर, अग्नौ च અને અગ્નિનો और जठराग्निके, नष्टे નાશ થાય ત્યારે नष्ट होने पर, सर्वसंपूर्णलक्षणः સઘળાં અને પૂરાં લક્ષણવાળો सब और सम्पूर्ण बलवाले लक्षणोंसे युक्त, सन्निपातज्वरः સન્નિપાતજ્વર सन्निपातज्वर, असाध्यः અસાધ્ય છે असाध्य है, अतः अन्यथा આનાથી વિપરીત इससे विपरीत, तु कृच्छ्रसाध्यः કષ્ટસાધ્ય છે कृच्छ्रसाध्य है ॥ १०९½ ॥

109-109½. The fever born of tridiscordance, if marked by the retention of impurities and loss of the digestive fire and attended with all its symptoms, is impossible of cure. If otherwise, it may, with difficulty, be brought under control.

संसर्गसन्निपातजज्वराणामतिदेशेन लक्षणकथनम्—

निदाने त्रिविधा प्रोक्ता या पृथग्जज्वराकृतिः ॥११०॥
संसर्गसन्निपातानां तया चोक्तं सलक्षणम् ।

११०½. तथा–तया (च.)

निदाने જ્વરનિદાનમાં ज्वरनिदानमें, या જે जो, त्रिविधा ત્રણ પ્રકારનાં तीन प्रकारके, पृथग्ज જુદા જુદા દોષથી ઉત્પન્ન થયેલ पृथक् पृथक् दोषजन्य, ज्वराकृति જ્વરનાં લક્ષણો ज्वरके लक्षण, प्रोक्ता કહ્યાં છે कहे है, तथा च તેઓથી उनसे, संसर्ग- દ્વન્દ્વજ જ્વરોનાં द्वन्द्वज ज्वरके, सन्निपातानाम् અને સન્નિપાતજ જ્વરોનાં और सन्निपातज ज्वरके, स्वलक्षणम् પોતાનાં લક્ષણો अपने लक्षण, उक्तम् કહેવાઈ ગયાં છે कह दिये है ॥ ११०½ ॥

110-110½ The three-fold division of fever arising from the discordance of one or the other of the humors has been delineated in the section on Pathology, in view of which have also been described in greater detail the pathognomic symptoms of the fevers born of tri and bi-discordances of the humors.

आगन्तुज्वरभेदा —

आगन्तुरष्टमो यस्तु स निर्दिष्टश्चतुर्विधः ॥१११॥
अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः ।

यः तु જે जो, अष्टमः આઠમો आठवाँ, आगन्तु. આગન્તુક જ્વર છે आगन्तुक ज्वर है, सः તે वह, अभिघात- અભિઘાત अभिघात, अभिषङ्गाभ्याम् અભિષંગ अभिषग, अभिचार- અભિચાર अभिचार, अभिशापत અને અભિશાપથી और अभिशापसे, चतुर्विधः ચાર પ્રકારનો चार प्रकारका, निर्दिष्ट. દર્શાવ્યો છે बताया गया है ॥ १११½ ॥

111-111½ The eighth variety of fever, which arises from external factors, is classified into four kinds. Thus the exogenous fever is brought on by trauma, possession by evil spirits, black magic and imprecation.

अभिघातज्वरलक्षणम्—

शस्त्रलोष्टकशाकाष्ठमुष्ट्यरत्नितलद्विजैः ॥११२॥
तद्विधैश्च हते गात्रे ज्वरः स्यादभिघातजः ।

शस्त्र- શસ્ત્ર शस्त्र, लोष्ट- માટીનું ઢેફું मिट्टीका ढेला, कशा- ચાબુક चाबुक, काष्ठ- લાકડી लकडी, मुष्टि मुठी घूंसा अरत्नितल- હાથનું તળું (થપાટ) चपेटा, द्विजै તથા દાંતો એઓથી तथा दात इनसे, तद्विधै च અને તેવી જાતનાં અન્ય સાધનોથી और इनके सदृश अन्य हेतुओंसे, गात्रे ગાત્રમાં अगको, हते આઘાત થતાં चोट लगने पर, ज्वरः જ્વર ज्वर, स्यात् ઉત્પન્ન થાય છે होता है ॥ ११२½ ॥

112-112½. The traumatic fever is that which occurs as the result of the body being injured by weapons, brick-bats, whips, sticks, clenched fists, palms of the hands, teeth or by such other external agencies.

तत्राभिघातजे वायुः प्रायो रक्तं प्रदूषयन् ॥११३॥
सव्यथाशोफवैवर्ण्यं करोति सरुजं ज्वरम् ।

तत्र તે उस, अभिघातजे અભિઘાતથી થયેલા જ્વરમાં अभिघातज ज्वरमें, प्राय ઘણે ભાગે प्रायश, वायु વાયુ वायु, रक्तम् રક્તને रक्तको, प्रदूषयन् દૂષિત કરીને दूषित करके, सव्यथा- વ્યથા व्यथा, शोफ- સોજા सूजन, वैवर्ण्यम् તથા વિવર્ણતાસહિત और विवर्णता- युक्त, सरुजम् અને પીડાયુક્ત और पीडासहित, ज्वरम् જ્વરને ज्वरको, करोति ઉત્પન્ન કરે છે उत्पन्न करता है ॥ ११३½ ॥

113-113½ In the traumatic fever, it is the vata, that generally vitiating the blood gives rise to the fever accompanied by aches and pain, swelling and change of color.

अभिषङ्गज्वरलक्षणम्—

कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः ॥११४॥
सोऽभिषङ्गज्वरो ज्ञेयो यश्च भूताभिषङ्गजः ।

काम- કામ काम, शोक શોક शोक भय- ભય भय, क्रोधैः અને ક્રોધથી और क्रोध इनसे, अभिषक्तस्य પીડિત થયેલા મનુષ્યને पीड़ित पुरुषको य જે जो ज्वर જ્વર આવે છે ज्वर आता है य च અને જે और जो भूताभिषङ्गज ભૂતના આવેશથી થયેલો હોય છે भूतबाधासे आनेवाला है स· તેને उसको, अभिषङ्गज्वर અભિષંગજ્વર अभिषंगज्वर, ज्ञेय· જાણવો जानना चाहिए ॥ ११४½ ॥

114-114½ That variety of fever which is seen in persons who are seized with desire, grief fear or anger, as well as that which appears in persons who are seized by the spirits is to be known as fever born of 'seizure'

कामशोकभयाद्वायुः, क्रोधात् पित्तं, त्रयो मलाः ११५
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ।
भूताधिकारे व्याख्यातं तदष्टविधलक्षणम् ॥११६॥

काम-शोक-भयात् કામ, શોક અને ભયથી काम, शोक और भय इनसे, वायु વાયુ वायु, क्रोधात् ક્રોધથી क्रोधसे, पित्तम् પિત્ત पित्त, भूताभिषङ्गात् તથા ભૂતોના આવેશથી एवं भूताभिषंगसे, भूत-सामान्य लक्षणा ભૂતોનાં જેવાં લક્ષણ ધરાવતા भूत जैसे लक्षणवाले, त्रय मलाः ત્રણે દોષો तीनों दोष, कुप्यन्ति પ્રકોપ પામે છે प्रकुपित होते हैं तत् તે उस, अष्टविध लक्षणम् આઠ પ્રકારના ભુતાભિષંગનું લક્ષણ अष्टविध भूताभिषङ्गका लक्षण. भूताधिकारे ભૂતાધિકારમાં भूताधिकारमे, व्याख्यातम् કહ્યુ છે कहा गया है ॥ ११५-११६ ॥

115-116. If the invasion is by desire, grief or fear, it is the vata that gets provoked; if by anger, it is the pitta; and if by the genii it is any of the three humors corresponding to the nature of the particular genius This last, evincing eight kinds of characteristics has been fully described in the topic dealing with spirit-possession.

विषवृक्षानिलस्पर्शात्तथाऽन्यैर्विषसंभवैः ।
अभिषक्तस्य चाप्याहुर्ज्वरमेकेऽभिषङ्गजम् ॥११७॥

विषवृक्ष-अनिल स्पर्शात् વિષવૃક્ષના વાયુના સ્પર્શથી विषवृक्षकी हवाके स्पर्शसे, तथा તથા तथा, अन्यैः અન્ય अन्य, विषसंभवैः વિષવાળા પદાર્થોનો विषयुक्त वस्तुओंका अभिषक्तस्य સંબંધ થવાથી પુરુષને सबन्ध होनेसे पुरुषको, ज्वरम् જે જ્વર આવે છે તેને जो ज्वर आता है उसको, अपि પણ भी एके કેટલાક આચાર્યો कई आचार्य, अभिषङ्गजम् અભિષંગજ જ્વર अभिषंगजन्य ज्वर, आहु કહે છે कहते है ॥ ११७ ॥

117. Some physicians belonging to another school of thought maintain that even that fever which is seen in a person suffering from the effects of contact with poisonous plants of air or with other poisonous things, is also another variety of seizure fever.

अभिचाराभिशापजयोर्लक्षणम्—

चिकित्सया विषघ्न्यैव स शमं लभते नरः ।
अभिचाराभिशापाभ्यां सिद्धानां यः प्रवर्तते ॥११८॥
सन्निपातज्वरो घोरः स विज्ञेयः सुदुःसहः ।
सन्निपातज्वरस्योक्तं लिङ्गं यत्तस्य तत् स्मृतम् ११९

स· તે वह, नर· પુરુષ पुरुष, विषघ्न्या વિષને હણનારી विषघ्न, एव જ ही चिकित्सया ચિકિત્સા વડે चिकित्सासे शमम् શાન્તિને शान्ति, लभते પ્રાપ્ત કરે છે पाता है, सिद्धानाम् સિદ્ધ પુરુષોના सिद्ध ऋषि मुनियोंके, अभिचार- અભિચાર अभिचार अभिशापाभ्याम् અને અભિશાપથી तथा अभिशापसे, य જે जो, घोर ભયંકર भयंकर, सन्निपातज्वर· સન્નિપાતજ્વર सन्निपातज्वर, प्रवर्तते થાય છે होता है, स તેને उसे, सुदुःसह અત્યંત દુઃસહ अत्यन्त दुःसह, विज्ञेयः જાણવો समझना चाहिए, सन्निपातज्वरस्य सन्निपात-

११७ वृक्ष—सङ्ग प)
११८ स शम—प्रशम (ध)
,, ज्वर—नर. (द.)

જ્વરનું सन्निपातज्वरका, यत् लिङ्गम् જે લક્ષણ जो लक्षण, उक्तम् પહેલાં કહ્યું છે पूर्वमें कहा है तत् તેને वह, तस्य તેનું उसका, स्मृतम् લક્ષણ જાણવું लक्षण माना गया है ॥ ११८-११९ ॥

118-119. Accordingly, in their opinion, a patient afflicted with this kind of fever obtains relief by treatment with antidotes. That fever which is induced by black-magic or imprecation by Siddhas is characterised by the discordance of all the three humors, is very severe in nature and is most unbearable.

चित्तेन्द्रियशरीराणामर्तयोऽन्याश्च नैकशः ।
प्रयोगं त्वभिचारस्य दृष्ट्वा शापस्य चैव हि ॥१२०॥
स्वयं श्रुत्वाऽनुमानेन लक्ष्यते प्रशमेन वा ।
वैविध्यादभिचारस्य शापस्य च तदात्मके ॥१२१॥
यथाकर्मप्रयोगेण लक्षणं स्यात् पृथग्विधम् ।

चित्त- ચિત્ત चित्त, इन्द्रिय- ઇન્દ્રિય इन्द्रिय, शरीराणाम् તથા શરીરની तथा शरीरकी, अन्या: બીજી दूसरी, अर्तय च પીડાઓ पीडाये, न एकश અનેક પ્રકારની હોય છે તેઓને अनेक प्रकारकी होती है उनको, अभिचारस्य અભિચારના अभिचारके, शापस्य च एव અને શાપના एव शापके, प्रयोगम् तु પ્રયોગને प्रयोगको, स्वयम् પોતે स्वय, दृष्ट्वा જોઈને देख कर, श्रुत्वा સાંભળીને सुन कर, अनुमानेन તેમજ અનુમાનદ્વારા एवं अनुमानसे, प्रशमेन वा અથવા પ્રશમન વડે अथवा प्रशमनसे, लक्ष्यते हि અભિચારજ તથા અભિશાપજ જ્વરનું લક્ષણ જાણી શકાય છે अभिचारज तथा अभिशापज ज्वरका लक्षण जाना जाता है, अभिचारस्य અભિચારની अभिचारकी, शापस्य च અને અભિશાપની और अभिशापकी, वैविध्यात् વિવિધતાને લઈ विविधताके कारण, तदात्मके તેનાથી થયેલા જ્વરમાં उनसे उत्पन्न हुए ज्वरमें, यथा- कर्म- प्रयोगेण તે તે કર્મના પ્રયોગને અનુસરીને उस उस कर्मके प्रयोगके अनुसार, पृथग्विधम् જુદા જુદા પ્રકારનાં भिन्न भिन्न प्रकारके, लक्षणम् લક્ષણો लक्षण, स्यात् હોય છે होते है ॥ १२०-१२१½ ॥

120-121½. It should, however, be distinguished from other fevers coming under this categories of triple discordance by noting the precise character of the pain afflicting the mind, the senses and the body as well as diverse other symptoms of ill-being evinced by the patient, by personal experience of the *modus operandi* of black magic and curse, by what one has heard from authoritative sources concerning such things and also by the method of inference from the application of therapeutic tests. Since black magic and imprecation are of diverse modes, the fevers resulting from their employment are also diverse and are distinguished by symptoms corresponding to the particular mode

कामशोकभयक्रोधभूतावेश विषज-ज्वराणा लक्षणम्—

ध्याननिःश्वासबहुलं लिङ्गं कामज्वरे स्मृतम् ॥१२२॥
शोकजे बाष्पबहुलं त्रासप्रायं भयज्वरे ।
क्रोधजे बहुसंरम्भं भूतावेशे त्वमानुषम् ॥ १२३ ॥
मूर्च्छामोहमदग्लानिभूयिष्ठं विषसंभवे ।

कामज्वरे કામજ્વરમાં कामज्वरमें, ध्यान-नि श्वासबहुलम् બહુ ચિન્તા અને નિ શ્વાસ बहुत चिन्ता तथा उच्छ्वास, लिङ्गम् એ લક્ષણ ये लक्षण, स्मृतम् કહેલાં છે कहे गये है, शोकजे શોકજ જ્વરમાં शोकज ज्वरमें बाष्पबहुलम् બહુ આંસુ बहुत अश्रु, भयज्वरे ભયજ્વરમાં भयज्वरमें, त्रासप्रायम् બહુ ભય बहुत त्रास, क्रोधजे ક્રોધજ્વરમાં क्रोधज्वरमें, बहुसंरम्भम् બહુ કોપ बहुत कोप, भूतावेशे तु ભૂતાભિષંગજ્વરમાં भूतावेशज्वरमें, अमानुषम અમાનુષ ક્રિયાઓ છે अमानुष

१२१ लक्ष्यते—लक्षयेत् (ध)

क्रियार्थे, विषसंभवे અને વિષજ્વરમાં और विषज्वरमें, मूर्च्छा-मोह-मदग्लानि-भूयिष्ठम् બહુ મૂર્ચ્છા, મોહ, મદ અને ગ્લાનિ એ લક્ષણ કહેલાં છે बहुत मूर्च्छा, मोह, मद और थकान ये लक्षण कहे गये है ॥ १२२-१२३½ ॥

122-123½ In the fever of desire the symptom is obsession with constant sighing; the fever born of grief is marked by constant lachrymation, the fever born of fear by constant dread, the fever born of anger by much exasperation, the fever resulting from spirit-possession by super-human behaviour and the fever born of poisoning by much fainting, stupefaction, intoxication and depression.

केषाञ्चिद्देषां लिङ्गानां संतापो जायते पुरः ॥१२४॥
पश्चात्तुल्यं तु केषाञ्चिदेषु कामज्वरादिषु ।

एषु कामज्वरादिषु આ કામજ્વર વગેરેમાં इन काम ज्वर आदिमें, केषाञ्चिन् કેટલાએક પુરુષોને किन्हीं पुरुषोंको, एषाम् આ इन, लिङ्गानाम् લક્ષણોની लक्षणोंके, पुर પહેલાં पूर्व, पश्चात् કેટલાએક પુરુષોને પછી किन्हींको पीछे, केषाञ्चित् तु અને કેટલાએકને તો और किन्हींको तो, तुल्यम् સાથે સાથે साथ साथ, संताप સતાપ सन्ताप जायते ઉત્પન્ન થાય છે उत्पन्न होता है ॥ १२४½ ॥

124-124½. In some patients afflicted with the fever due to desire and the rest, the rise of temperature precedes the other symptoms, in some others the rise of temperature follows the other symptoms; while in some the rise of temperature and other symptoms appear simultaneously

कामादिजानामुद्दिष्टं ज्वराणां यद्विशेषणम् ॥१२५॥
कामादिजानां रोगाणामन्येषामपि तत् स्मृतम् ।

कामादिजानाम् કામ વગેરેથી થતા कामादिजनित, ज्वराणाम् જ્વરોનું ज्वरोंका, यत् જે जो, विशेषणम् લક્ષણ लक्षण, उद्दिष्टम् કહેલું છે कहा गया है, तत् તે वह, कामादिजानाम् કામ વગેરેથી થતા कामादिजनित, अन्येषाम् અન્ય अन्य, रोगाणाम् अपि રોગોનું પણ रोगोंका भी, स्मृतम् માનેલ છે माना गया है ॥ १२५½ ॥

125-125½ Some again of the symptoms which have been assigned to this or that in this relation of fevers beginning with that born of desire, are also seen in connection with other diseases born of same cause

आगन्तुज्वरेषु दोषादिविचार —

मनस्यभिहते पूर्वं कामाद्यैर्न तथा बलम् ॥१२६॥
ज्वरः प्राप्नोति वाताद्यैर्देहो यावन्न दुष्यति ।

कामाद्यै કામ વગેરેથી कामादिकसे, मनसि મન मनके, अभिहते दूषित થયા છતાં दूषित होने पर, यावत् જ્યાં સુધી जब तक वाताद्यै· વાત વગેરે દોષોથી वातादि दोषोंसे, देहः દેહ देह, न दुष्यति दूषित થતો નથી दूषित नहीं होता, तावत् ત્યાં સુધી तब तक, ज्वरः જ્વર ज्वर, पूर्वम् પ્રથમ प्रथम, तथा તેટલો उतना, बलम् न प्राप्नोति બળવાળો થતો નથી बलवान नहीं होता ॥ १२६½ ॥

126-126½ Even after the mind has become afflicted with disease etc., the fever does not become virulent so long as the body is free from vitiation by the morbific humors, vata etc

देहे चाभिह(द्रु)ते पूर्वं वाताद्यैर्न तथा बलम् ॥१२७॥
ज्वरः प्राप्नोति कामाद्यैर्मनो यावन्न दुष्यति ।

वाताद्यैः વાયુ વગેરે દોષોથી वातादि दोषोंसे, देहे च દેહ देहके, अभिह(द्रु)ते दूषित થયા છતાં दूषित होने पर, यावत् જ્યાં સુધી जब तक, मन· મન मन,

१२६ अभिहते—अभिद्रुते (त)
,, कामाद्यै —वाताद्यै (ब)

कामाद्यैः કામ વગેરેથી कामादिकोंसे **न दुष्यति** દૂષિત થતુ નથી नहीं दूषित होता, **तावत्** ત્યાં સુધી तब तक, **ज्वरः** જ્વર ज्वर, **पूर्वम्** પ્રથમ प्रथम, **तथा** તેટલા उतने, **बलम्** બળને बलको, **न प्राप्नोति** પ્રાપ્ત કરતો નથી नहीं प्राप्त होता ॥ १२७½ ॥

127-127½ And conversely, so long as the mind is unvitiated by desire etc., the fever fails to gather strength even if the body has been assailed by the morbific humors.

आगन्तोर्निजाद्भेदको धर्म —

ते पूर्वं केवलाः पश्चान्निजैर्व्यामिश्रलक्षणाः ॥१२८॥
हेत्वौषधविशिष्टाश्च भवन्त्यागन्तवो ज्वराः ।

ते તે वे, **आगन्तव** આગન્તુ आगन्तु, **ज्वरा** જ્વરો ज्वर, **पूर्वम्** પહેલાં प्रथम, **केवलाः** કેવળ केवल, **पश्चात्** અને પછી बादमें, **निजैः** નિજ દોષના निज दोषोंके, **व्यामिश्रलक्षणा** લક્ષણોથી યુક્ત लक्षणोंसे मिश्रित, **हेतु-औषध-विशिष्टा च** અને હેતુ તેમજ ઔષધોપચારમાં ભિન્નતાવાળા और हेतु एवं औषधमें भिन्नतावाले, **भवन्ति** હોય છે होते है ॥ १२८½ ॥

128 128½. These exogenous fevers are at the onset marked only by their own specific symptoms; thereafter they develop other and mixed symptoms Moreover all these fevers being exogenous, differ from the other endogenous types of fevers as regards both their causation and medication

ज्वरसम्प्राप्तिः —

संसृष्टाः सन्निपतिताः पृथग्वा कुपिता मलाः ॥१२९॥
रसाख्यं धातुमन्वेत्य पक्तिं स्थानान्निरस्य च ।
स्वेन तेनोष्मणा चैव कृत्वा देहोष्मणो बलम् ॥१३०॥
स्रोतांसि रुद्ध्वा संप्राप्ता केवलं देहमुल्बणाः ।
संतापमधिकं देहे जनयन्ति नरस्तदा ॥१३१॥
भवत्यत्युष्णसर्वाङ्गो ज्वरितस्तेन चोच्यते ।

संसृष्टा બબ્બે દોષોનો સંસર્ગ થઈને द्वन्द्वरूपसे, **पृथक् वा** અથવા જુદા જુદા या अलग अलग, **कुपिता** પ્રકોપ પામેલા कुपित हुए **मला** દોષો दोष, **रसाख्यम्** રસ નામના रसनामक **धातुम्** ધાતુને धातुको, **अन्वेत्य** પ્રાપ્ત થઈને पा कर, **स्थानात् च** જઠરસ્થાનમાંથી और पक्तिस्थानसे, **पक्तिम्** જઠરાગ્નિને जठराग्निको, **निरस्य** બહાર કાઢીને बाहिर निकाल कर, **स्वेन एव च** પોતાની निजकी, **तेन** તે उस, **ऊष्मणा** ગરમી વડે गरमीसे, **देहोष्मण** દેહની ગરમીનુ देहकी गरमीका, **बलम् कृत्वा** બળ વધારીને बल बढ़ा कर, **स्रोतांसि** સ્રોતોને स्रोतोंको, **रुद्ध्वा** રોકીને रुक कर, **उल्बणाः** પ્રબળ થઈ उल्बण हो कर, **केवलम्** તથા સમસ્ત तथा सम्पूर्ण, **देहम्** **सम्प्राप्ताः** દેહમાં ફરી વળી देहमें फैल कर, **देहे** દેહમાં शरीरमें, **अधिकम्** અધિક अधिक, **सन्तापम्** સંતાપ (ઉષ્ણતા) सन्ताप, **जनयन्ति** ઉત્પન્ન કરે છે पैदा करते है, **तदा** ત્યારે तब, **नर** પુરુષ पुरुष, **अत्युष्ण-सर्वाङ्ग** સર્વ અંગોમાં અતિ ઉષ્ણ अत्यन्त उष्ण शरीरवाला, **भवति** થાય છે हो जाता है, **तेन च** અને તેથી और उसीसे, **ज्वरित** જ્વરવાળો ज्वरवाला, **उच्यते** કહેવાય છે कहा जाता है ॥ १२९-१३१½ ॥

129-131½ The humors getting provoked, either singly, dually or totally (i e. all the three of them) invade first the body-element called the 'rasa', the body nutrient fluid, and displacing the gastric fire, augment the normal heat of the body by their own morbid heat conjoined to the heat of the displaced gastric fire; and thereafter obstructing the body-channels, finally run riot through the whole body, thus engendering excessive heat in the body As the result, the patient, at this time, becomes exceedingly heated in all the parts of his body, and is consequently spoken of as being fevered.

---

१३०. पक्तिं स्थानात्–पक्तिस्थानात् (च)

१३०½. रुद्ध्वा–बद्ध्वा (फ)

ज्वरे स्वेदाप्रवृत्तिहेतुः —

स्रोतसां संनिरुद्धत्वात् स्वेदं ना नाधिगच्छति १३२
स्वस्थानात् प्रच्युते चाग्नौ प्रायशस्तरुणे ज्वरे ।

स्रोतसाम् સ્રોતો स्रोतोंके, संनिरुद्धत्वात् રોકાઈ જવાથી रुक जानेसे, अग्नौ च અને અગ્નિ और अग्निके, स्वस्थानात् પોતાના સ્થાનથી ભ્રષ્ટ થવાથી अपने स्थानसे च्युत हो जानेसे, तरुणे ज्वरे તરતમાં ઉત્પન્ન થયેલા જ્વરમાં तरुण ज्वरमें, ना પુરુષને पुरुषको, प्रायशः ઘણું કરીને प्रायश स्वेदः પસેવો स्वेद, न अधिगच्छति આવતો નથી नही आता ॥ १३२½ ॥

132-132½ On account of the body-channels being obstructed and the gastric fire displaced, the sweat does not generally emerge to the skin-surface during the early stage of the fever

आमज्वरलक्षणम्—

अरुचिश्चाविपाकश्च गुरुत्वमुदरस्य च ॥१३३॥
हृदयस्याविशुद्धिश्च तन्द्रा चालस्यमेव च ।
ज्वरोऽविसर्गी बलवान् दोषाणामप्रवर्तनम् ॥१३४॥
लालाप्रसेको हृल्लासः क्षुन्नाशो विरसं मुखम् ।
स्तब्धसुप्तगुरुत्वं च गात्राणां बहुमूत्रता ॥१३५॥
न विड् जीर्णा न च ग्लानिर्ज्वरस्यामस्य लक्षणम् ।

अरुचि च અરુચિ अरुचि, अविपाक च અપચો अन्नका न पचना, उदरस्य પેટનું पेटका गुरुत्वम् च ભારેપણું भारीपन, हृदयस्य હૃદયની हृदयकी, अविशुद्धि च અવિશુદ્ધિ विशुद्धि न होना तन्द्रा च તન્દ્રા तन्द्रा, आलस्यम् एव च આળસ आलस्य, अविसर्गी નિરંતર રહેનારો अविसर्गी, बलवान् બળવાન बलवान, ज्वरः જ્વર ज्वर, दोषाणाम् દોષોનું दोषोंका, अप्रवर्तनम् ન નીકળવું न निकल जाना, लाला-प्रसेक લાળ આવવી लालाका टपकना, हृल्लासः મોળ जी मचलाना क्षुन्नाशः ભૂખનો નાશ क्षुधाका नाश, मुखम् विरसम् મુખનું વિરસપણું मुखकी विरसता, गात्राणाम् ગાત્રોનું अंगोंका, स्तब्ध જડની પેઠે સ્તબ્ધ થવું जड़की तरह स्तब्ध होना, सुप्त- સ્પર્શજ્ઞાનથી રહિત થવું सो जाना, गुरुत्वम् च અને ભારે થવું और भारीपन, बहुमूत्रता પેશાબ વધારે આવવો मूत्रका अधिक मात्रामें आना, विट् न जीर्णा મળની અપક્વતા मलका परिपक्व न होना, न च ग्लानिः કૃશ ન થવું कृशता न होनी, आमस्य ज्वरस्य આ આમ જ્વરનાં ये आम ज्वरके, लक्षणम् લક્ષણો છે लक्षण है ॥ १३५½ ॥

133-135½ The following are the symptoms of this immature stage of fever—anorexia, indigestion, heaviness in the abdomen, congested condition of the chest, torpor, lassitude, high unremitting fever, stoppage of the excretory functions, salivation, nausea, loss of hunger bad taste in the mouth, stiffness, numbness and heaviness of the limbs excessive micturition, undigested stools and absence of emaciation.

पच्यमानज्वरलक्षणम्—

ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः ॥१३६॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ।

ज्वर-वेग अधिक જ્વરનો અધિક વેગ ज्वरका अधिक वेग, तृष्णा તૃષા प्यास, प्रलाप પ્રલાપ प्रलाप, श्वसनम् શ્વાસ हाफना, भ्रमः ભ્રમ भ्रम, मलप्रवृत्तिः મળની પ્રવૃત્તિ मलकी प्रवृत्ति, उत्क्लेश ઉત્ક્લેશ जी मचलाना, पच्यमानस्य આ પચ્યમાન જ્વરનાં पच्यमान ज्वरके, लक्षणम् લક્ષણો છે लक्षण हैं ॥ १३६½ ॥

136-136½ Of the fever during the maturing stage, the symptoms are—greater intensity of the fever, thirst, raving, dyspnea, giddiness, resumption of the excretory functions and nausea.

१३२. स्रोतरुद्धत्वात्–सन्निबन्धत्वात् (फ)
१३४. दोषाणामप्रवर्तनम्–दोषाणामप्रवर्जनम् (व)
१३५. क्षुन्नाशो विरस–क्षुन्नाशोऽविशद (भ)

निरामज्वरलक्षणम् —

क्षुत् क्षामता लघुत्वं च गात्राणां ज्वरमार्दवम् ॥१३७॥
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ।

क्षुत् ભૂખ લાગવી भूख लगना, गात्राणाम् ગાત્રોનું अङ्गोंकी, क्षामता ક્ષીણપણું क्षीणता लघुत्वम् च અને હળવાપણું और लघुता, ज्वरमार्दवम् જ્વરની મૃદુતા ज्वरका कम होना, दोषप्रवृत्ति દોષોનું નીકળવું दोषोंका निकलना, अष्टाह અને આઠમો દિવસ और आठवा दिन, निरामज्वरलक्षणम् આ નિરામ જ્વરનાં લક્ષણો છે ये निराम ज्वरके लक्षण हैं ॥१३७½॥

137-137½. Of the phase of fever that has become fully matured, the symptoms are—return of hunger, emaciation, lightness of limbs, mildness of fever, restoration of the excretory functions, as also the lapse of eight days from the onset.

नवज्वरे निषिद्धानि—

नवज्वरे दिवास्वप्नस्नानाभ्यङ्गान्नमैथुनम् ॥१३८॥
क्रोधप्रवातव्यायामान् कषायांश्च विवर्जयेत् ।

नव- ज्वरे તરતના આવેલા જ્વરમાં नये ज्वरमें, दिवास्वप्न- દિવસે ઊંઘવું दिनमें सोना, स्नान- સ્નાન स्नान, अभ्यङ्ग- અભ્યંગ अभ्यङ्ग, अन्न- અન્ન अन्नसेवन मैथुनम् મૈથુન मैथुन, क्रोध- ક્રોધ क्रोध, प्रवात- પવનના ઝપાટા हवाका झोंका, व्यायामान् વ્યાયામ व्यायाम, कषायान् च અને કષાયનો और कषायको, विवर्जयेत् ત્યાગ કરવો छोड देना चाहिए ॥ १३८½ ॥

138-138½. In the early stage of the fever the patient should avoid day-sleep, bath, inunction, food, sex-act, anger, draughts, exercise and astringent articles

ज्वरे लङ्घनविचार.—

ज्वरे लङ्घनमेवादावुपदिष्टमृते ज्वरात् ॥१३९॥
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् ।

क्षय- ક્ષય क्षय, अनिल- વાયુ वात, भय- ભય भय, क्रोध- ક્રોધ क्रोध, काम કામ काम, शोक શોક शोक, श्रम- અને શ્રમથી और श्रमसे, उद्भवात् થયેલા उत्पन्न हुए, ज्वरात् ऋते જ્વરો સિવાયના ज्वरोंको छोड़कर, ज्वरे જ્વરોમાં शेष ज्वरोंमें, आदौ પહેલાં पहले, लङ्घनम् લંઘન लंघन, एव જ ही, उपदिष्टम् કહ્યું છે कहा गया है ॥ १३९½ ॥

139-139½. Lightening therapy is advised in the beginning of the fever, except in fevers due to wasting, vata, fear, anger desire, grief and fatigue

लङ्घनेन क्षयं नीते दोषे संधुक्षितेऽनले ॥१४०॥
विज्वरत्वं लघुत्वं च क्षुच्चैवास्योपजायते ।

लङ्घनेन લંઘનથી लङ्घनसे, दोषे દોષ दोषका, क्षयम् ક્ષય क्षय, नीते પામતાં हो जाने पर, अनले અને જઠરાગ્નિ और जठराग्निके, संधुक्षिते પ્રદીપ્ત થતાં प्रज्वलित होने पर, अस्य આ રોગીને इस रोगीको, विज्वरत्वम् જ્વરરહિતપણું ज्वरका नष्ट होना, लघुत्वम् च ગાત્રોનું હળવાપણું देहकी लघुता, क्षुत् च एव અને ભૂખ और क्षुधा, उपजायते ઉત્પન્ન થાય છે होती है ॥ १४०½ ॥

140 140½ The morbid matter being diminished and the gastric fire being reactivated by this lightening therapy, there will return to the patient freedom from fever, lightness of body and hunger.

प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत ॥ १४१ ॥
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ।

प्राण- બળનો बलका, अविरोधिना च ક્ષય ન કરે એવા क्षय न हो ऐसे लङ्घनेन લંઘનથી लंघनसे, एनम् એને इसकी, उपपादयेत् ચિકિત્સા કરવી चिकित्सा करे, यदर्थं કેમકે જેને માટે क्योंकि जिसके लिए अयम् આ यह, क्रियाक्रम ચિકિત્સાનો ક્રમ છે चिकित्साक्रम है, आरोग्यम् તે આરોગ્ય वह आरोग्य, बलाधिष्ठानम् બળને આધારે રહેલું છે बलके ही अधीन है ॥ १४१½ ॥

१४०½. विज्वरत्व लघुत्व च क्षुच्चैवास्योपजायते—लाघवं च शरीरस्य क्षुच्चैवास्योपजायते (च.)

141-141½. The lightening therapy, however, should not be pushed to the extent of imparing the patient's vitality as health is dependent on vitality and it is for the sa[1]e of health that all treatment is meant.

अविपक्वानां दोषाणां तरुणज्वरे पाचनानि—

लङ्घनं स्वेदनं कालो यवाग्वस्तिक्तको रसः ॥१४२॥
पाचनान्यविपक्वानां दोषाणां तरुणे ज्वरे ।

तरुणे ज्वरे તરુણ જ્વરમાં तरुणज्वरमें, लङ्घनम् લંઘન लंघन, स्वेदनम् સ્વેદન स्वेदन, काल કાળ काल, यवाग्व યવાગૂઓ यवागू, तिक्तक અને કડવો और तिक्त, रस રસ रस, अविपक्वानाम् નહિ પાકેલા अपक्व, दोषाणाम् દોષોને दोषोंके, पाचनानि પાચન કરનાર છે पाचन करनेवाले हैं ॥ १४२½ ॥

142-142½. In the early stage of fever, starvation, sudation, time-effect, diet of gruels and articles of bitter taste, digest the imperfectly digested morbid matter in the body.

कस्मिन् ज्वरे उष्णं जलं देयम्? कस्मिन् ज्वरे शृतशीतं जलं देयम्?—

तृष्यते सलिलं चोष्णं दद्याद्वातकफज्वरे ॥ १४३ ॥
मद्योत्थे पैत्तिके चाथ शीतलं तिक्तकैः शृतम् ।
दीपनं पाचनं चैव ज्वरघ्नमुभयं हि तत् ॥ १४४ ॥
स्रोतसां शोधनं बल्यं रुचिस्वेदकरं शिवम् ।

वातकफज्वरे વાત અને કફથી થયેલા જ્વરમાં वात और कफके ज्वरमें, तृष्यते તરસ્યા રોગીને प्यासवाले रोगीको, उष्णम् ઊનું गरम सलिलम् च પાણી जल, अथ અને और मद्योत्थे મદ્યપાનથી થયેલા मद्यसे उत्पन्न, पैत्तिके च તેમજ પિત્તના જ્વરમાં एव पित्तज्वरमें, तिक्तकैः કડવાં દ્રવ્યો સાથે तिक्त द्रव्योंके साथ, शृतम् ઉકાળેલું उबाला गया, शीतलम् અને ઠંડુ કરેલું જળ और फिर ठंडा किया गया जल, दद्यात् આપવું देवे, हि કારણ કે क्योंकि, तत् તે वे, उभयम् બન્ને दोनों, दीपनम् દીપન दीपन, पाचनम् પાચન पाचन, ज्वरघ्नम् જ્વરઘ્ન ज्वरघ्न, स्रोतसाम् સ્રોતોના स्रोतोंका, शोधनम् શોધન કરનાર शोधक, बल्यम् બળ આપનાર बल्य, रुचि-स्वेद-करम् રુચિ અને સ્વેદ કરનાર रुचिकर और स्वेदकर, शिवम् च एव તથા કલ્યાણકારી છે तथा कल्याणकारक है ॥ १४३-१४४½ ॥

143-144½ When the patient feels thirsty, he should be given warm water to drink if the fever is of the vata cum kapha type; and if the fever is due to alcoholism or pitta, he should be given potions of water prepared with bitter decoctives and well-cooled Both types of drink are gastric-stimulant, digestive, febrifuge, purificat oryof the body-channels, strength-giving, appetising, diaphoretic and generally beneficial.

पिपासाज्वरशान्तये षडङ्गपानीयम्—

मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ॥ १४५ ॥
शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये ।

मुस्त- મોથ मोथा, पर्पटक- ખડસલિયો पित्तपापड़ा, उशीर- વીરણવાળો खस, चन्दन- રક્ત ચંદન रक्त चन्दन, उदीच्य- સુગન્ધી વાળો सुगन्धवाला, नागरैः અને સૂંઠ વડે और सोंठसे, शृतशीतम् ઉકાળીને ઠારેલું उबाल कर ठण्डा किया हुआ, जलम् જળ जल, पिपासा- તૃષા प्यास, ज्वर- તથા જ્વરની और ज्वरकी, शान्तये શાન્તિ માટે शान्तिके लिए, दद्यात् આપવું જોઈએ देना चाहिए ॥ १४५½ ॥

145-145½. For the relief of thirst and fever, the patient may be given a beverage which has been prepared by

१४२ स्वेदन काल—स्वेदन काले य
१४२₂ तरुणे ज्वरे—तरुणज्वरे (य.)
१४३ तृष्यते—तृष्यत (य)
,, वातकफज्वरे—वातकफात्मके (य.
१४४ चाथ—चाद्य (य)

decocting nut-grass, trailing rungia, cuscus grass, sandal-wood, fragrant sticky mallow and dry ginger, and cooling it

ज्वरे वमन कदा देयम्?—

कफप्रधानानुत्क्लिष्टान् दोषानामाशयस्थितान् ॥१४६
बुद्ध्वा ज्वरकरान् काले वम्यानां वमनैर्हरेत् ।

आमाशयस्थितान् આમાશયમાં રહેલા आमाशयमें अवस्थित, उत्क्लिष्टान् બહાર નીકળવા ચાહતા बाहिर निकलनेके लिए उत्सुक, कफप्रधानान् કફપ્રધાન कफ-प्रधान, दोषान् દોષોને दोषोंको, ज्वरकरान् જ્વર કરનારા ज्वर करनेवाले बुद्ध्वा જાણીને जान कर, वम्यानाम् વમનયોગ્ય પુરુષોના તે દોષોને वमन-योग्य पुरुषों के उन दोषोंको, काले યોગ્ય સમયે योग्य समयमें, वमनैः વમનોદ્વારા वमनद्वारा, हरेत् હરણ કરવા જોઈએ निकाल देना चाहिए ॥ १४६½ ॥

146-146½. The physician, recognising that the fever-causing morbid humors are predominantly kapha and are lodged in the stomach, and have been precipitated and that the patient is fit to undergo emesis, should eliminate the morbid matter by emetics at the proper time.

अनुपस्थितदोषाणा वमनदाने दोषा —

अनुपस्थितदोषाणां वमनं तरुणे ज्वरे ॥१४७॥
हृद्रोगं श्वासमानाहं मोहं च जनयेद्भृशम् ।

तरुणे ज्वरे તરુણ જ્વરમાં तरुण ज्वरमें, अनुपस्थितदोषाणाम् જેના દોષો બહાર નીકળવામાં ઉન્મુખ ન હોય એવા મનુષ્યોને जिनके दोष बाहिर निकलनेमें उन्मुख नहीं है ऐसे मनुष्योंको, वमनम् આપેલુ વમન दिया हुआ वमन, हृद्रोगम् હૃદ્રોગ हृद्रोग, श्वासम् શ્વાસ श्वास, आनाहम् આનાહ आनाह, भृशम् मोहम् च અને અત્યન્ત મૂંઝવણ और अत्यन्त गबराहटको, जनयेत् ઉત્પન્ન કરે છે उत्पन्न करता है ॥ १४७½ ॥

147-147½ If emesis is performed in the very early stage of fever, when the morbid elements have not been precipitated, there will often occur cardiac disorder, dyspnea constipation and fainting.

सर्वदेहानुगाः सामा धातुस्था असुनिर्हराः ॥१४८॥
दोषाः फलानामामानां स्वरसा इव सात्ययाः ।

सर्वदेहानुगाः સર્વ દેહમાં વ્યાપેલા समस्त देहमें व्याप्त, सामा આમસહિત आमसहित, धातुस्थाः અને ધાતુઓમાં અત્યત પેઠેલા और धातुओंमें अत्यन्त प्रविष्ट, असुनिर्हराः અને સહેલાઈથી ન કાઢી શકાય એવા और सरलतासे न निकलनेवाले, दोषाः દોષો दोष, आमानाम् કાચા कच्चे, फलानाम् ફળોના फलोंके, स्वरसा इव સ્વરસોની પેઠે स्वरसोंकी भाति, सात्ययाः વિનાશક છે विनाशक है ॥ १४८½ ॥

148-148½. Because the morbid matter has pervaded the whole body and is immature and lodged in all the body-elements and is difficult to remove, its premature removal is attended with danger to life or with complications and may be likened to the forceful expression of juice from an unripe fruit.

ज्वरे यवागूप्रयोग —

वमितं लङ्घितं काले यवागूभिरुपाचरेत् ॥१४९॥
यथास्वौषधसिद्धाभिर्मण्डपूर्वाभिरादितः ।
यावज्ज्वरमृदूभावात् षडहं वा विचक्षणः ॥१५०॥
तस्याग्निर्दीप्यते ताभिः समिद्भिरिव पावकः ।

१४७½ मोहं च जनयेद्भृशम्—कास च कुरुते भृशम् (ध.)
,, जनयेद्भृशम्—कुरुते भृशम् (ध.)

१४८. सर्वदेहानुगा. सामा—सर्वदेहानुगा. सह (ध)
,, असुनिर्हरा—दुःखनिर्हरा (ध.)
१४८½ फलानामामाना—फलेभ्य आमेभ्यः (क ख. ग. च ड. ध.)

वमितम् વમન કરાવેલાને वमन कराये हुएको, लङ्घितम् અને લંઘન કરાવેલાને और लङ्घन कराये हुएको, काले ભોજન સમયે भोजनके समय, विचक्षण विचक्षणः वैद्ये विचक्षण वैद्यको, ज्वरमृदुभावात् यावत् જ્વર નરમ પડે ત્યાં સુધી ज्वर मृदु होवे तब तक, षडहम् वा અથવા ૭ દિવસ સુધી अथवा छः दिन पर्यन्त, यथास्वौषध- તે તે અવસ્થાને યોગ્ય ઔષધોથી उस उस अवस्थाके योग्य औषधोंसे, सिद्धाभिः સિદ્ધ કરેલી सिद्ध की हुई, यवागूभिः યવાગૂઓથી यवागुओंसे, आदितः પ્રથમ प्रथम, मण्डपूर्वाभिः મંડથી શરૂ કરીને मण्डसे शुरू करके, उपाचरेत् ઉપચર્યા કરવી જોઈએ उपचर्या करनी चाहिए, ताभिः તે યવાગૂઓથી उन यवागुओंसे, तस्य તેનો उसकी, अग्निः જઠરાગ્નિ जठराग्नि, समिद्भिः સમિધાઓથી समिधाओंसे, पावकः इव અગ્નિની પેઠે अग्निकी भांति, दीप्यते પ્રદીપ્ત થાય છે प्रदीप्त होती है ॥ १४९-१५०½ ॥

149-150½ After starvation and emesis have been gone through, the patient should be given at the proper time gruels prepared with suitable medications, giving thin gruels in the beginning. The wise physician should give these gruels till the fever becomes mild or for a period of six days By this the digestive power of the patient becomes stimulated, like fire by fuel

यवागूगुणा —

ताश्च भेषजसंयोगाल्लघुत्वाच्चाग्निदीपनाः ॥१५१॥
वातमूत्रपुरीषाणां दोषाणां चानुलोमनाः ।
स्वेदनाय द्रवोष्णत्वाद् द्रवत्वात्तृट्प्रशान्तये ॥१५२॥
आहारभावात् प्राणाय सरत्वाल्लाघवाय च ।
ज्वरघ्न्यो ज्वरसात्म्यत्वात्तस्मात् पेयाभिरादितः १५३
ज्वरानुपचरेद्धीमानृते मद्यसमुत्थितात् ।

ताः च વળી તે યવાગૂઓ और वे यवागुएं, लघुत्वात् હલકી હોવાથી लघु होनेसे, भेषजसंयोगात् च તથા ઔષધના સંયોગને લીધે तथा औषधके संयोगके कारण, अग्निदीपनाः અગ્નિને પ્રદીપ્ત કરનારી अग्निको प्रदीप्त करनेवाली, वातमूत्रपुरीषाणाम् તથા વાયુ, મૂત્ર, પુરીષ तथा वायु, मूत्र, पुरीष, दोषाणाम् च તેમજ દોષોનુ एव दोषोंको, अनुलोमनाः અનુલોમન કરનારી છે अनुलोमन करनेवाली हैं, द्रवोष्णत्वात् પ્રવાહી અને ગરમ હોવાથી द्रव और उष्ण होनेसे, स्वेदनाय પસીનો લાવવા માટે पसीना लानेके लिए, द्रवत्वात् દ્રવરૂપ હોવાથી द्रवरूप होनेसे, तृट्प्रशान्तये તરસ છિપાવવા માટે प्यासको शान्त करनेके लिए, आहारभावात् આહારરૂપ હોવાથી आहाररूप होनेसे, प्राणाय બળ આપવા માટે बल देनेके लिए, सरत्वात् च અને સર હોવાથી और दस्त लानेवाली होनेसे, लाघवाय શરીરને હળવુ રાખવા માટે ઉપયોગી છે शरीरको लघु रखनेके लिए उपयुक्त हैं, ज्वरसात्म्यत्वात् તથા જ્વરને સાત્મ્ય હોવાથી तथा ज्वरके लिए सात्म्य होनेसे, ज्वरघ्न्यः જ્વરનાશક છે ज्वरनाशक है, तस्मात् તેથી इस लिए, धीमान् બુદ્ધિમાન વૈદ્યે बुद्धिमान वैद्य, मद्यसमुत्थितात् મદ્યજનિત જ્વર मद्यजनित ज्वरको, ऋते સિવાયના छोड़ कर, ज्वरान् બાકીના જ્વરોમાં शेष ज्वरोंका, आदितः પ્રથમ प्रथम, पेयाभिः પેયાઓથી पेयाओंसे, उपचरेत् ઉપચાર કરવો उपचार करे ॥ १५१-१५३½ ॥

151-153½. These gruels, being medicated and light in nature, are stimulative of gastric fire and regulate the passage of flatus, urine, feces and morbid matter downwards. Being liquid and hot, they act as diaphoretic; being liquid they relieve thirst; being nutrition, they increase the vitality, being of a flowing nature, they lead to the lightness of body; and being wholesome in fever, they act as febrifuge There-

१५१ अग्निदीपनाः—अग्निदीपिका (च)
१५२. दोषाणां च—विबन्धस्य (द)
,, दोषाणां चानुलोमना—विबन्धस्यानुलोमिका (ग.घ.ध)
१५३ तस्मात् पेयाभिरादितः—तस्मात्पूर्वं समाचरेत् (च ध)
१५३½ ज्वरानुपचरेत् धीमान्—ज्वरानुपचरेद्विद्वान् (च ध)

fore the wise physician should treat the fever-patient with gruels from the very beginning, except in cases where the fever is due to alcoholism

येषां यवागूर्न हिता—

मदात्यये मद्यनित्ये ग्रीष्मे पित्तकफाधिके ॥१५४॥
ऊर्ध्वगे रक्तपित्ते च यवागूर्न हिता ज्वरे ।

मदात्यये મદાત્યયમાં मदात्ययमें, **मद्यनित्ये** નિત્ય મદ્ય સેવનારને नित्य मद्यसेवन करनेवालेको, **ग्रीष्मे** ગ્રીષ્મમાં ग्रीष्ममें, **पित्तकफाधिके** પિત્તકફની અધિકતાવાળા જ્વરમાં पित्तकफकी अधिकतावाले ज्वरमें **ऊर्ध्वगे रक्तपित्ते च** તથા ઊર્ધ્વગ રક્તપિત્તમાં तथा, ऊर्ध्वग रक्तपित्तमें, **ज्वरे** આવેલા જ્વરમાં आये हुए ज्वरमें, **यवागूः** યવાગૂ यवागू, **हिता न** હિતકારક નથી हितकारक नहीं है ॥ १५४½ ॥

154-154½ In morbid intoxication in summer and in conditions of pitta cum kapha as well as in hemothermia affecting the upper part of the body, gruels are not wholesome

तर्पणार्हा नरा. —

तत्र तर्पणमेवाग्रे प्रयोज्यं लाजसक्तुभिः ॥१५५॥
ज्वरापहैः फलरसैर्युक्तं समधुशर्करम् ।

तत्र તે જ્વરોમાં उन ज्वरोंमें, **अग्रे** પ્રથમ प्रथम, **ज्वरापहैः** જ્વરનાશક ज्वरघ्न, **फलरसैः** ફળોના રસોથી फलोंके रसोंसे, **युक्तम्** યુક્ત युक्त **लाजसक्तुभिः** લાજના સાથવાથી બનાવેલુ लाजाके सत्तुओंसे बने हुए, **तर्पणम् एव** તર્પણને જ तर्पणको ही, **समधुशर्करम्** મધ અને સાકર સાથે शहद और शर्कराके साथ, **प्रयोज्यम्** પ્રયોજવુ જોઈએ प्रयोग करना चाहिए ॥ १५५½ ॥

१५४½ यवागूर्न हिता–यवागूरहिता (च)
१५५. प्रयोज्यम्–प्रदेयम् (च थ ध.)
१५५½ 'समधुशर्करम्' इत्यत उपरिष्टात्—
"द्राक्षादाडिमखर्जूरप्रियालैः सपरूषकैः ।
तर्पणार्हेषु कर्तव्यं तर्पणं ज्वरनाशनम् ॥"
इत्यधिक पाठ (ध. द.) पुस्तकयो. ।

155 155½. In such fevers the demulcent drinks prepared of roasted paddy flour should be given in the beginning mixed with fever-curing fruit-juices, honey and sugar

जीर्णतर्पणस्य ज्वरितस्य भोजनविधानम्—

ततः सात्म्यबलापेक्षी भोजयेज्जीर्णतर्पणम् ॥१५६॥
तनुना मुद्गयूषेण जाङ्गलानां रसेन वा ।

ततः ત્યાર પછી इसके बाद, **सात्म्यबलापेक्षी** સાત્મ્ય અને બળનો વિચાર કરી વૈદ્ય सात्म्य और बलका विचार करके वैद्य, **जीर्णतर्पणम्** તર્પણ પચી ગયેલુ છે જેને એવા રોગીને तर्पण पच गया है जिसको ऐसे रोगीको **तनुना** પાતળા पतले, **मुद्गयूषेण** મગના યૂષથી मूँगके यूषसे, **जाङ्गलानाम् वा** અથવા જાંગલ પશુઓના अथवा जांगल पशुओंके, **रसेन** માંસરસ વડે मांसरससे, **भोजयेत्** ભોજન કરાવવુ भोजन करावे ॥१५६½ ॥

156-156½. The physician, keeping in view the homologation and vitality of the patient should, after the demulcent drink has been digested, put the patient on a diet of thin soup of green gram or the meat-juice of jangala creatures

अन्नकाले ज्वरिताय दन्तधावनम्—

अन्नकालेषु चाप्यस्मै विधेयं दन्तधावनम् ॥१५७॥
योऽस्य वक्त्ररसस्तस्माद्विपरीतं प्रियं च यत् ।

अन्नकालेषु च તથા અન્નકાળમાં तथा भोजनके समयोंमें, **यः** જે जो, **अस्य** એના इसके, **वक्त्ररसः** મુખનો રસ હોય मुखका रस हो, **तस्मात्** તેનાથી उससे, **विपरीतम्** વિપરીત રસવાળું विपरीत रसवाली, **यत् च** અને જે और जो, **प्रियम्** એને પ્રિય હોય इसे प्रिय होवे, **दन्तधावनम् अपि** તે દાતણ પણ उस दातौन भी, **अस्मै** એને इसको **विधेयम्** કરાવવુ જોઈએ करवानी चाहिए ॥ १५७½ ॥

157-157½ At the meal-time, he should be directed to clean his teeth with tooth-twigs which are of antagonistic taste to the taste in the mouth and which is liked by the patient

तदस्य मुखवैशद्यं प्रकाङ्क्षां चान्नपानयोः ॥१५८॥
धत्ते रसविशेषाणामभिज्ञत्वं करोति यत् ।

यत् જે દાતણ जो दातौन, रसविशेषाणाम् વિવિધ રસોનું भिन्न भिन्न रसोंका, अभिज्ञत्वम् જ્ઞાન ज्ञान, करोति કરાવે છે कराती है, तत् તે वह, अस्य આના इसके, मुखवैशद्यम् મુખની શુદ્ધિ मुखकी शुद्धि, अन्नपानयोः च અને ખાવાપીવામાં और खानपानमें, प्रकाङ्क्षाम् રુચિ रुचि, धत्ते કરે છે करती है ॥ १५८½ ॥

158-158½. This teeth-cleansing will produce clearness of the mouth, desire for food and drink, and increase the relish for tastes.

विशोध्य द्रुमशाखाग्रैरास्यं प्रक्षाल्य चासकृत् ॥१५९॥
मस्तिवक्षुरसमद्याद्यैर्यथाहारमवाप्नुयात् ।

द्रुमशाखाग्रै ઝાડની ડાળીઓના અગ્રભાગથી અર્થાત્ દાતણથી वृक्षकी शाखाओंके अग्रभागसे अर्थात् दातौनसे, आस्यम् મુખને मुखको, विशोध्य શુદ્ધ કરીને शुद्ध करके, असकृत् च તથા વારંવાર और वारवार, मस्तु- મસ્તુ मस्तु, इक्षुरस- શેરડીના રસ गन्नेका रस, मद्याद्यैः અને મદ્ય વગેરેના કવલ ધારણ વડે और मद्य आदिके कवलधारणद्वारा, प्रक्षाल्य ધોઈને धो कर. यथा- હિતકર हितकर, आहारम् આહાર आहार, अवाप्नुयात् કરવો करे ॥ १५९½ ॥

159-159½. Having cleansed the mouth with the ends of twigs of trees and having gargled the mouth frequently with whey, sugar-cane juice and wine etc., he should take proper diet

ज्वरे कषायविधानम्—

पाचनं शमनीयं वा कषायं पाययेद्भिषक् ॥१६०॥
ज्वरितं षडहेऽतीते लघ्वन्नप्रतिभोजितम् ।

भिषक् વૈદ્ય वैद्य, षडहे ૭ દિવસ छ दिन, अतीते વીત્યા પછી बीतने के बाद, लघ्वन्न- હલકુ અન્ન लघुभोजन, प्रतिभोजितम् ખવરાવેલુ છે જેને એવા खिलाया है जिसको ऐसे, ज्वरितम् જ્વરના રોગીને ज्वरके रोगीको, पाचनम् પાચન पाचन, शमनीयम् वा અથવા શમન अथवा शमन, कषायम् કષાય कषाय, पाययेत् પીવરાવવો पिलावे ॥ १६०½ ॥

160-160½ When six days have passed, the physician should give the fever-patient digestive or sedative decoction and light diet at every meal

तरुणज्वरे कषायरसनिषेधः —

स्तभ्यन्ते न विपच्यन्ते कुर्वन्ति विषमज्वरम् ॥१६१॥
दोषा बद्धाः कषायेण स्तम्भित्वात्तरुणे ज्वरे ।

तरुणे તરુણ नये, ज्वरे જ્વરમાં ज्वरमें, बद्धा છૂટા ન પડેલા बधे हुए, दोषा દોષો दोष, कषायेण કષાયદ્વારા कषायसे, स्तम्भित्वात् સ્તંભન કરવાના ગુણને લીધે स्तम्भन करनेके गुणसे, स्तभ्यन्ते સ્તબ્ધ થઈ જાય છે स्तब्ध हो जाते हैं, न विपच्यन्ते પાકતા નથી नहीं पचते, विषमज्वरम् અને વિષમજ્વર और विषमज्वरको, कुर्वन्ति ઉત્પન્ન કરે છે उत्पन्न करते है ॥ १६१½ ॥

161-161½ The morbid matter which is fixed in the early stage of fever becomes more fixed and is not digested by astringent decoctives due to astringent action and they cause irregular fever.

---

१६० पाययेद्भिषक्—पाययेच्च तम (थ.)

१६१ स्तभ्यन्ते—मुच्यन्ते (ग)

,, न विपच्यन्ते—न च्यवन्ते च (च. भ)

न तु कल्पनमुद्दिश्य कषायः प्रतिषिध्यते ॥१६२॥
यः कषायकषायः स्यात् स वर्ज्यस्तरुणज्वरे ।

कल्पनम् स्वरसादि કષાયોની કલ્પનાને कषायोंकी कल्पनाके, उद्दिश्य ઉદ્દેશીને उद्देशसे, तु તો तो, कषाय કષાયનો कषायका, न प्रतिषिध्यते પ્રતિષેધ કરવામાં આવતો નથી प्रतिषेध नहीं किया जाता है, य પરન્તુ જે परन्तु जो, कषायकषाय· કષાય રસવાળો કષાય कषायरसयुक्त कषाय, स्यात् હોય होवे, सः તે वह, तरुणज्वरे वर्ज्य. નવા જ્વરમાં વર્જ્ય છે नये ज्वरमें वर्ज्य है ॥ १६२½ ॥

162-162½. The prohibition laid down here against the use of 'kashaya' is not with reference to its technical meaning in pharmaceutics but it is with reference to its technical meaning relating to its property of astringency. In other words, decoctives of astringent taste or action are alone prohibited in the early stage of fever

ज्वरे यूषविधानम्—

यूषैरम्लैरनम्लैर्वा जाङ्गलैर्वा रसैर्हितैः ॥१६३॥
दशाहं यावदश्नीयाल्लघ्वन्नं ज्वरशान्तये ।

ज्वरशान्तये જ્વરની શાન્તિને માટે ज्वरकी शान्तिके लिए, दशाहम् यावत् દશ દિવસ સુધી दस दिन तक, हितै હિતકારક हितकारक, अम्लै અમ્લ अम्ल, अनम्लैः वा અથવા અમ્લતાથી રહિત अथवा अम्लतासे रहित, यूषै. યૂષો यूषो, जाङ्गलै. वा અથવા જાંગલ પશુઓના अथवा जांगल जानवरोंके, रसैः માંસરસો સાથે मांसरसोंके साथ, लघ्वन्नम् લઘુ અન્ન लघु अन्न, अश्नीयात् ખાવું જોઈએ खाना चाहिए ॥ १६३½ ॥

163-163½. For a period of ten days, the patient should live on a diet of light food mixed with acid or non-acid soups or wholesome flesh-juice of jangala animals, for the relief of fever.

१६३ कषायकषाय–कषाय कषाय (ध फ)
,, तरुणज्वरे-तरुणे ज्वरे (ध.)

ज्वरे सर्पिर्विधानम्—

अत ऊर्ध्वं कफे मन्दे वातपित्तोत्तरे ज्वरे ॥१६४॥
परिपक्वेषु दोषेषु सर्पिष्पानं यथाऽमृतम् ।

अत ऊर्ध्वम् આ પછી इसके बाद, ज्वरे જે જ્વરમાં जिस ज्वरमें, कफे मन्दे કફ મંદ હોય कफ मन्द हो, वातपित्तोत्तरे અને વાયુ તથા પિત્ત પ્રધાન હોય और वायु तथा पित्त प्रधान हों, दोषेषु परिपक्वेषु તેમાં દોષો પૂરા પાકી જતાં उसमें दोषोंके पूर्णतया पक जाने पर, सर्पिष्पानम् ઘીનું પાન घृतपान, अमृतम् અમૃત अमृतके, यथा જેવુ છે समान है ॥ १६४½ ॥

164-164½. Thereafter, if the kapha is mild, and vata and pitta are in excess and the morbid matter has all been fully digested, the potion of ghee acts like ambrosia in fever

ज्वरे मांसरसप्रयोग.—

निर्दशाहमपि ज्ञात्वा कफोत्तरमलङ्घितम् ॥१६५॥
न सर्पिः पाययेद्वैद्यः कषायैस्तमुपाचरेत् ।
यावल्लघुत्वादशनं दद्यान्मांसरसेन च ॥१६६॥
बलं ह्यलं निग्रहाय दोषाणां, बलकृच्च तत् ।

वैद्य વૈદ્ય वैद्य, निर्दशाहम् अपि દશ દિવસ વીત્યા બાદ પણ दस दिन बीत जाने पर भी, कफोत्तरम् રોગીને કફપ્રધાન रोगीको कफप्रधान, अलङ्घितम् અને

१६६ वैद्य.–प्राज्ञ· (च)
,, कषायैस्तमुपाचरेत्–शमनैस्तमुपाचरेत् (ख ध. च)
१६६½ बलं ह्यलं निग्रहाय दोषाणां बलकृच्च तत्–बलं ह्यलं दोषहरं परं तच्च बलप्रदम् (ध. त. च.)
,, ,, ,, ,, भवत्यलं निग्रहाय दोषाणां बलकृच्च तत् (ढ.)
,, बलं ह्यलं–परं ह्यलं (झ.)

લઘન કર્યા વગરનો विना लङ्घन किया हुआ, ज्ञात्वा જાણીને जान कर, सर्पि घी घी, न पाययेत् ન પાવું न पिलावे, तम પરંતુ તેનો किन्तु उसका, लघुत्वात् यावत् લઘુતા આવતાં સુધી लघुताकी प्राप्ति पर्यन्त, कषायैः કષાયોથી कषायोंसे, उपाचरेत् ઉપચાર કરવો उपचार करे, मांसरसेन च અને માંસરસની સાથે और मांसरसके साथ, अशनम् ભોજન भोजन, दद्यात् આપવુ देवे, हि કેમકે क्योंकि, बलम् બળ बल, दोषाणाम् દોષોના दोषोंके, निग्रहाय નિગ્રહ માટે निग्रह के लिए अलम् સમર્થ છે समर्थ है, तत् च અને તે માંસરસની સાથે ભોજન और वह मांसरसके साथ भोजन, बलकृत् બળ ઉત્પન્ન કરનાર છે बल करनेवाला है ॥ १६५-१६६½ ॥

165-166½. Knowing that ten days havs passed and still kapha is found to be in excess, or that the patient has not undergone starvation, the physician should not give him ghee but treat him with decoctives Till the lightness of body is induced, he should be given light food mixed with meat-juices This contributes to the natural vitality and natural vitality is sufficient to subdue the morbid humors.

ज्वरे पय प्रयोगः —

दाहतृष्णापरीतस्य वातपित्तोत्तरं ज्वरम् ॥१६७॥
बद्धप्रच्युतदोषं वा निरामं पयसा जयेत् ।

दाहतृष्णापरीतस्य દાહ અને તરસથી પીડાતા રોગીના दाह और तृषासे पीडित रोगीके, वातपित्त-उत्तरम् વાતપિત્તપ્રધાન वातपित्तप्रधान, बद्ध-प्रच्युत-दोषम् वा અથવા બધાયેલા હોવા છતાં પણ પોતાના સ્થાનથી ચલિત દોષવાળા अथवा बधे होने पर भी अपने स्थानसे चलित दोषोंवाले, निरामम् નિરામ निराम ज्वरम् જ્વરને ज्वरको, पयसा દૂધથી दूधसे जयेत् જીતવો જોઈએ जीतना चाहिए ॥ १६७½ ॥

167-167½ The condition of fever with vata and pitta in excess, occurring in a patient afflicted with burning and thirst, where there is alternate constipation and diarrhea and which is free from undigested matter, may be subdued by treatment with milk

ज्वरे विरेचनम्—

क्रियाभिराभिः प्रशमं न प्रयाति यदा ज्वरः ॥१६८॥
अक्षीणबलमांसाग्नेः शमयेत्तं विरेचनैः ।

यदा જો यदि, आभिः આ इन, क्रियाभिः ક્રિયાઓથી क्रियाओंसे, ज्वरः જ્વર ज्वर, प्रशमम् શાંતિ शान्तिको, न प्रयाति ન પામે न प्राप्त होवे, अक्षीण-बल-मांसाग्नेः તો જેનાં બળ, માંસ તથા અગ્નિ ક્ષીણ થયાં નથી એવા રોગીના तो जिसके बल, मांस तथा अग्नि क्षीण नहीं हुए हों ऐसे रोगीके, तम् તે જ્વરને उस ज्वरको, विरेचनैः વિરેચનોથી विरेचनोंसे, शमयेत् શાંત કરવો शान्त करे ॥ १६८½ ॥

168-168½ If the fever is not subdued by this line of treatment, it should be allayed by purgative and emetic procedures provided the patient's strength, flesh and digestive power are not diminished

ज्वरे निरूहबस्तिप्रयोग. –

ज्वरक्षीणस्य न हितं वमनं न विरेचनम् ॥१६९॥
कामं तु पयसा तस्य निरूहैर्वा हरेन्मलान् ।

ज्वरक्षीणस्य જ્વરથી દુર્બળ થયેલાને ज्वरसे क्षीण हुएको, न वमनम् ન તો વમન न तो वमन, न विरेचनम् કે ન તો વિરેચન अथवा न तो विरेचन, हितम् હિતકારક છે हितकर है, कामम् तु જો ઇષ્ટ હોય તો यदि इष्ट हो तो, तस्य मलान् તેના મળોને उसके मलोंको, पयसा દૂધના પ્રયોગથી दूधके प्रयोगसे, निरूहैः

१६८½ अक्षीणबलमांसाग्ने –अक्षीणबलमांसस्य (ज्ञ ग घ)
,, विरेचनै –वि ग्रण घ.)

અથવા આસ્થાપન બસ્તિથી અથવા आस्थापन बस्तिसे, हरेत् બહાર કાઢવા बाहिर निकाले ॥ १६९½ ॥

169-169½. Purgation or emesis is not advisable in the case of a patient emaciated with fever. It is better to eliminate the morbid matter in such a patient by a course of milk or by evacuative enema

निरूहो बलमग्निं च विज्वरत्वं मुदं रुचिम् ॥१७०॥
परिपक्वेषु दोषेषु प्रयुक्तः शीघ्रमावहेत् ।

दोषेषु દોષો दोषोंके, **परिपक्वेषु** પાકયા પછી पक जाने पर, **प्रयुक्तः** પ્રયોજેલ प्रयुक्त हुई, **निरूहः** નિરૂહ-બસ્તિ निरूहबस्ति, **बलम्** બળ बल, **अग्निम्** અગ્નિ अग्नि, **विज्वरत्वम्** જ્વરરહિતતા ज्वररहितता, **मुदम्** હર્ષ हर्ष, **रुचिं च** અને રુચિને और रुचिको, **शीघ्रम्** શીઘ્ર शीघ्र, **आवहेत्** લાવે છે आती है ॥ १७०½ ॥

170-170½ Evacuative enema if given when the morbid matter has been fully digested will immediately increase the vitality and digestive power and produce apyrexia, good cheer and appetite

पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत् ॥ १७१ ॥
स्रंसनं, त्रीन्मलान् बस्तिर्हरेत् पक्वाशयस्थितान् ।

स्रंसनम् વિરેચન विरेचन, **पित्ताशयगतम्** પિત્તાશયમાં રહેલા पित्ताशयमें स्थित **पित्तम् वा** પિત્તને पित्तको, **कफपित्तम् वा** અથવા કફપિત્તને अथवा कफपित्तको, **हरेत्** દૂર કરે છે दूर करता है, **बस्ति** અને બસ્તિ और बस्ति, **पक्वाशयस्थितान्** પકવાશયમાં રહેલા पक्वाशयमें स्थित, **त्रीन् मलान्** ત્રણે દોષોને तीनों दोषोंको, **हरेत्** દૂર કરે છે दूर करती है ॥ १७१½ ॥

171-171½. Laxation will eliminate pitta or kapha-pitta lodged in the habitat of the pitta, while enemata will eliminate all the three kinds of morbid matter lodged in the colon.

ज्वरे अनुवासनप्रयोगः—

ज्वरे पुराणे संक्षीणे कफपित्ते दृढाग्नये ॥१७२॥
रूक्षबद्धपुरीषाय प्रदद्यादनुवासनम् ।

पुराणे જૂના पुराने, **ज्वरे** તાવમાં ज्वरमें, **कफपित्ते** કફ અને પિત્ત कफ और पित्त, **संक्षीणे** ક્ષીણ થતાં क्षीण होने पर, **दृढाग्नये** પ્રદીપ્ત અગ્નિવાળા प्रदीप्त अग्निवाले, **रूक्षबद्धपुरीषाय** અને રૂક્ષ તથા બંધાયેલા મળવાળા રોગીને रूक्ष और ग्रथित मलवाले रोगीको, **अनुवासनम्** અનુવાસન अनुवासन, **प्रदद्यात्** આપવું देना चाहिए ॥ १७२½ ॥

172-172½. Unctuous enema should be given in chronic fever in conditions where the kapha and pitta have diminished, the digestive fire is strong and the stools are dry and constipated.

ज्वरे शिरोविरेचनप्रयोग —

गौरवे शिरसः शूले विबद्धेष्विन्द्रियेषु च ॥१७३॥
जीर्णज्वरे रुचिकरं कुर्यान्मूर्धविरेचनम् ।

जीर्णज्वरे જીર્ણજ્વરમાં जीर्णज्वरमें, **शिरसः** માથાના मस्तकके **गौरवे** ભારીપણામાં भारीपनमें, **शूले** તથા શૂલમાં तथा शूलमें, **इन्द्रियेषु विबद्धेषु च** અને ઇન્દ્રિયો પોતાના વિષયનું ગ્રહણ કરવામાં જડ થઈ ગઈ હોય ત્યારે और इन्द्रियोंके विषयग्रहणमें जडीभूत होने पर, **रुचिकरम्** રુચિકારક रुचिकारक, **मूर्धविरेचनम्** શિરોવિરેચન शिरोविरेचन, **कुर्यात्** કરવું જોઈએ करना चाहिए ॥ १७३½ ॥

173-173½ Agreeable errhine medications should be given in heaviness of the head, headache, and impairment

---

१७३½ कुर्यात्–दद्यात् ग)
,, कुर्यान्मूर्धविरेचनम्–दद्यात् शीर्षविरेचनम् (च)
,, मूर्धविरेचनम्–शीर्षविरेचनम् (य.)

of the sense-functions occurring in chronic fevers

जीर्णज्वरेऽभ्यङ्गादिविधानम्—

अभ्यङ्गांश्च प्रदेहांश्च परिषेकावगाहने ॥१७४॥
विभज्य शीतोष्णकृतं कुर्याज्जीर्णे ज्वरे भिषक् ।

जीर्णे ज्वरे જીર્ણ જ્વરમાં जीर्णज्वरमे, भिषक् વૈદ્ય वैद्यको, शीतोष्णकृतम् ઠંડી અને ગરમીથી થયેલા જ્વરનો शीत और उष्ण कारणसे हुए ज्वरका विभज्य વિવેક કરીને विवेक करके, अभ्यङ्गान् च અભ્યંગો अभ्यङ्ग, प्रदेहान् च પ્રદેહો प्रदेह, परिषेक- પરિષેક परिषेक, अवगाहने તથા અવગાહનનો तथा अवगाहनका, कुर्यात् પ્રયોગ કરવો જોઈએ प्रयोग करना चाहिए ॥ १७४½ ॥

174-174½. The physician having ascertained whether heat or cold is the causative factor of the chronic fever should administer suitable inunctions and applications, affusions and baths

तैराशु प्रशमं याति बहिर्मार्गगतो ज्वरः ॥१७५॥
लभन्ते सुखमङ्गानि बलं वर्णश्च वर्धते ।

तै તેઓથી उनसे बहिर्मार्गगत. બહિર્માર્ગગત बहिर्मार्गगत, ज्वरः જ્વર ज्वर, आशु જલદી शीघ्र, प्रशमम् પ્રશાન્ત प्रशान्त, याति થાય છે होता है, अङ्गानि અંગોને अंगोंको, सुखम् સુખ सुख लभन्ते પ્રાપ્ત થાય છે प्राप्त होता है, बलम् બળ बल, वर्ण च અને વર્ણની और वर्णकी, वर्धते વૃદ્ધિ થાય છે वृद्धि होती है ॥ १७५½ ॥

175-175½ By this means the fever which has remained only in the peripheral parts is soon removed, the body restored to ease, and vitality and complexion are enhanced

धूपनाञ्जनयोगैश्च यान्ति जीर्णज्वराः शमम् ॥१७६॥
त्वङ्मात्रशेषा येषां च भवत्यागन्तुरन्वयः ।

